नमात्वमपि शाधान्यमेवोचितं॥ तथाच॥ जसि श्रियाष्टन इत्येवस्यान्न तु श्रियाष्टा इत्याशंक्योक्तं
भाष्ये यथालक्षणमप्रयुक्तेष्टइति॥ न भवेत्येवात्रौत्वमिति कैयटः॥ वामनोपि॥ अष्टाभ्य ओशिति सू
त्रे तदन्तग्रहणान्नपरमाष्टाविति तुक्ता श्रियाष्टान इत्यत्राप्त्वस्याभावादौत्वं न भवति॥ इत्याह हरदत्तस्तु न
चेवप्रियाष्टा न इत्यत्र शतिरतिरियं यमुपादाय यथाष्टुनर्गौणतायामात्वं न भवति॥ तथा न द्विधा चेवव
त्यन्तरतिप्रतिज्ञाय अष्टनआ विभक्ताविति सूत्रे एकवचननिर्देशात्॥ उपसर्जनेष्यात्वं भविष्यति॥ आ
नोलोपः श्रियाष्टः पश्येत्यादि न दत्तरूर्वप्रतिज्ञातार्थविपरीत॥ भाष्यरत्यादि विरुद्धं च कथमभिहितवा
निति स एवप्रष्टव्यः॥ हलादौ वेति॥ य[illegible] पि हलीत्यस्यापकर्षमरत्वापि व्याख्यानं भाष्ये प्रतीयते॥
तथापि तस्यापरितोषग्रस्तत्वप्रपचितमन्यत्रेतिभावः॥ श्रियाष्टा इति प्रथमैकवचनं॥ उक्तं संग्रहेति॥ श्रि

मा॰

अष्टाभ्य २

यष्टु इति॥ नान्नाः। युदिति। बुध्यते:। क्विश॥ धान्नाः। ऋत्विग्दधृक्। किंविदिति॥ अत्रावुपपदे युजेः क्विन् घस्मोत्त
र्हि र्वचनमं नोहान्तत्वं चसत्जेः कर्मणि किन्। अमागमस्यादिशोः कर्मण्णि उत्तूर्वाम्हिहेः क्विन्। उपसर्गान्न
लोपः षत्वं अबेः सुप्युपदे किन चे स्पर्शः॥ युजेरिति। क्रुंचेश्च्येव। नलोपाभावस्त्वधिकः। कनाविति। रकारउ
सूबारणार्थ इति भावः। संनिरिति इति। यत्तु प्राचः। तृतीये धात्वधिकार इति तन्न। सन्निधिधोधानुग्रहण
स्य उत्तरत्रानुवृत्तेरभावे नाधिकारत्रयाभावात्॥ युजेरसमासे। सर्वेति। यत्तु [struck] [illegible]
[struck] प्राचोक्तं सुरीति। तन्न। सर्वनामस्थाने इत्यस्यैव प्रकृतत्वात्। लक्षणेसंज्ञीज
भावात्॥ क्लीबे युजीरति द्विवचने। तिव्याप्तेश्च॥ यत्तु वदन्ति। नपुंसके शसि युंजीत्यत्र नुमनस्यादिति
तन्न। नपुंसकस्य झलचरत्ति नुमः संभवात्॥ सुलोपइति। कुलस्यासिद्धत्वात् परत्वाद्दो नुम्॥ ततो ह
ल्ड्यादिलोप इति भावः। क्विन्प्रत्ययस्य कुः। पदान्ते इति। यत्तु प्राचोक्तं झलीति तन्न। झलीत्यस्यासंनिहित
त्वात्। निः फलत्वाच्च। यत्तु तेनसोत्रणव्याख्यातं झलो झलीत्यनेनोऽमरदकलुत्वा झलीत्यस्मिन्ननुवर्तमा
नेऽपि न कश्चिद्दोष इति। तन्न। स्पृशः। स्पृशिः इत्यादेऽग्रीति व्याप्तेः। खन्निति। खञ्जतीति खन्। खञ्जगतिवै
कल्ये॥ परौव्रजेः। दीर्घश्चेति। यत्तु प्राचा व्याख्यातं विष्णुलित्वादुपधायावृद्धिरिति। तन्न। पंचपाद्यां दश
पाद्यां चानेन क्विप् दीर्घयोरेव विधानात्। स्कोः संयोगेति। लुप्तषष्ठीकं पद। झलं तास्यां विशेष्यत इति व्या

म० २०

चरेपदांतस्यादिनाम अनीतिभृ क्विपायस्येति। जस्त्वस्यासिद्धत्वात् पूर्वं अत्वमित्युक्तेः। एतेन प्राचो विप
रीतोक्तिः परास्ता। उर्गिति। ऊर्जबलप्राणनयोः। अस्माच्चुरादिर्ण्यन्ताद् भ्राजभासेत्यादिना क्विप् णि
लोपः स च वाच्यः तेनस्यानिवत्पदांतविधित्वात् वेत्रासिद्धत्वाच्चा र ज्ञातेषवपाइति नोह तो मत्र
श्वनवहोकेथंतिध रत्वा वेयजइति विहितस्य णिवनस्तदपवादस्य परानेऽसम्बद्धाद सत्वात्। यत्तु
श्वतेवाकुक्यश्राश पुरोडासश्च र याजो ऽस्मिति प्राचोक्तं। तन्न। जसः पररूपनिभूतयोर्वी इयन्यादी
र्घाभावात्। यदपि पेश्चवय इति प्रोक्तं अनुपादृ्याशिवनिति प्राचा व्याख्याने। तन्न। अपवादस्य उत्सर्वि
षये उत्सर्गस्य णिवनो ग्रहणेः। तदसं भ्रमनत् तयोः किं इ स परत्वात्। यदासत्त्वबाधित्वा सत्वस्या
त्। यतनोः हल्ङ्यादिलोपे रुत्वविसर्गौ स्यातां। किंवा क्रियासेतिनस्यात्। वस्तुतस्तु। अनन्यगतस्तुणश
त्वमकर्तुमानवोत्तदोषः। पुनः प्रसंगविज्ञाने त्वदाद्यत्वसंभवात्सर। नाविति पदेऽपि नदोः सः
सावित्यस्यानंतरमदसइति योगं विभज्यादसएवदस्यसत्वं नान्यस्यदस्येति व्याख्यातुं शक्यत्वात्
। ननु यथान्यासे हीयतेः क्विपि स्वइति प्राप्नोति नियमे तु इतिस्यादिति चेत्। मैवं। गौणो लक्षणत्यसत्व
योरसंभवेनहीरित्यस्येवन्याय्यत्वात्। ङे प्रथमयोरम्। ङे इति ष्टयनूपदं लुप्तषष्ठीकं प्रथमाशब्दः

सावन्तायो:

र २

३

[illegible]

७९

प्रथमाद्वितीययोः समुदायेनोत्पन्न इति व्याचष्टे ॥ इत्युस्य त्यादिनाऽसुटो समन्ततिसुवचं ॥ अधिकरणत्वविवक्षय
ति । यदि तु शेषे इति विभक्तिविशेषणं स्यात्तदाऽस्मयमेव तत्त्वमात्वयत्वाभ्यां विशेषविहिताभ्यां स्वविषये लो
पस्य बाधसंभवात् । न चैवमनत्यलोप इति पदस्यानिरालेच न त्वापत्तिः साम आकमिति ससुडुनिर्देशेन ज्ञ
स्यापि ज्ञापितत्वादिति भावः ॥ युवं वस्त्राणीति । शेषे लोपः ॥ यत्तु काशिकायामुक्तं पंचम्याश्च चतुर्थ्या

त्वसंम

श्च षष्ठीप्रथमयोरपि यान्यद्विवचनान्यत्र शेषे लोपो विधीयत इति । तच्छापपत्तया । छंदसि तु प्रथमा
द्विवचनमपि शेषे लोपस्य विषय एवेति बोध्यं ॥ मपर्यन्तस्येति किमिति ॥ अधिकारसूत्रं किमर्थमिति
प्रश्नः ॥ अंगकार्यमिति ॥ एतेनांगवृत्ते पुनर्वृत्तावविधिरिति परिभाषार्थं तदुपनिबद्धं ॥ अंगेऽन्याधि

वि

कारे वृत्तं वर्तनं यस्य तदंगवृत्तं शास्त्रं तस्मिन्वृत्ते सति प्रवृत्ते सति पुनरन्यस्य प्रवर्तनोपदानावेमविधिरिति
हितस्यार्थः ॥ एषा परिभाषा ज्यादादीयसः ज्ञाजनोर्जेति सूत्रद्वयेऽपि ज्ञापितेति भाष्यस्थितं ॥ अन्यथा
हि ज्यादादिति आकारं न ब्रूयात् । वहोर्लोप इत्यतो लोपमेवानुवर्तयेत् ॥ अरत्सर्वेति दीर्घे सिद्धं स्याय
-नितिमिति ॥ ज्ञाजनोर्जा विदध्यात् ॥ अतो दीर्घो यञीति दीर्घो भविष्यतीति ॥ नचैवं राभ्यामित्यत्र त्यदाय
त्वे रत्ते सुपि चेति दीर्घो न स्यादिति वाच्यं ॥ द्वयोरकस्यत्यादिति निर्देशेनोक्तपरिभाषाया अनित्यत्वज्ञा
ता ॥ यत्तु कैश्चिदस्यां विनिष्ठतस्यानिपदं तिद्वाभ्यामिति तु दीर्घं विनानपरिनिष्ठितमिति वदन्ति तच्छाष्यविरुद्धम् ॥

म० २०

ऽभ्यम

ज्ञापयान् ज्ञानाति जायते इत्येतेषामपि दीर्घविधानार्थोपि निष्ठितत्वेन भाष्योक्तज्ञापकद्वयस्यापि शिथिलमूलत्वापत्तेः ॥ यदि
तु भ्यसोऽभ्यमिति सूत्रे भाष्येपि परिनिष्ठितस्यैवैत्वपाठस्तर्हि वाचनिकतामेवाश्रित्य पदांतरेतयायोज्यः ॥ अनित्यत्वबल
कल्पितार्थकथनेन [illegible] न तु ज्ञापकाश्रयत्वविष्टमिति वास्तु ॥ एवं तु काशिकादिग्रंथेपि कथंचिन्नेतुं शक्यमिति दिक् ॥
मकारांतरमित्युपलक्षणं । जसः शीत्यत्र जसः स इति सकारं उच्छिष्यसांतस्य जस इति व्याख्यानदर्शनात्मिति सूत्रे आद
स्यग्रहणमनुवर्त्यं अमश्च मेवेति व्याख्यानात् हेति बोध्यम् ॥ अविभक्तिकमिति ॥ तथा च ङे प्रथमयोरिति सू
त्रे सूत्रे ग्राह्यस्याम इति षष्ठ्यामिति भाष्यप्रोक्ते तेन तथैव किं न स्यादिति वाच्यं स्त्रीनपुंसकयोर्नत्वाद्ग्रा
ह्ययुष्मानस्मान् त्रपणीः कुलानि चा ॥ अलिंगत्वे युष्मानस्मानपि नित्यादेरपि असिद्धिप्रसंगात् वापि इत्यपि च
किं युवाभ्यां यदि तु युष्मदस्मदोरनादेश इत्यत्र रायोर्हलीत्यनुवर्त्तते तदा इत्यपि चेतिमास्तु परिशेषादेक सिद्धेः
। युष्मदस्मदोः हलादाविति योचीत्यत्र ग्रहणात्परिशेषसिद्धमिदं रायोर्हलीत्येतोनुवर्त्त्यालक्षणेनाद्वेव किमनु
द्शग्रहणेनेन न त्वादेशो हलादिरशक्ति तेन मा भ्यम इत्यत्वात् । अभ्यम् पक्षे तु योचीत्यत्रानुवर्त्यार्थमनादेशग्रहण
बोध्यं । पदात्स्थ्येपीति । न चांतलोपपक्षे पररूपं बाधित्वा सवर्णदीर्घः स्यात् । अकारोच्चारणसामर्थ्यादिति वाच्यं
णत्वनिवृत्याकारोच्चारणस्य चरितार्थत्वात् ॥ युष्मदस्मद्भ्यां ङसोश् । शित्वं सर्वादेशार्थं अन्यथा ह्यादेः पर
स्येति स्यात् । नन्वेवमप्यस्मि आदेशव्यपदेशनयत्वनिरस्यर्थत्वात् । न चावयवस्यादेशस्यापि विभक्तेरनादेश

च

८०

४०

पदार्थेति व्याख्यातं तत्फलं दर्शयति ॥ ... ॥ पंचकं ... प्रातिपदिकार्थ इति पक्षे संख्याया अपि प्रातिपदिका
तात्स्यत्वाभिवाच्यम् ॥ सर्वस्य सर्वपदादेशा इति सिद्धांतात् ॥ इदमेव सूचितं ज्ञापयति सर्वे सर्वपदादेशा इति ॥ अर्थवत्त्वे व्यवस्था
नादेशाभावविरोधाभिरित्यर्थः सिद्ध ऽऽऽदयस्तु वचनसामर्थ्यादनर्थकस्यापि भवेयुर्ज्ञापरिभाषानत्यंगाधिकारमात्र
परेति दुराग्रहस्त्वर्हि अशित्वाविनातु इति पररूपे एकारांतरं प्रश्लिष्य आकाररूपत्वे अशभवाभिन विक्रियेत तद्
नित्यारब्धेयं यत्तु स्यादेशस्यापवादोऽशिति तत्राशादेशप्रवृत्तिकाले शेषे लोपाभावेन स्यादेशस्याऽप्रसक्तेः ॥ और
तरि शेषे लोपे अकारांतत्वाभावात् सुट् सः सुडुस्यस्या निवर्त्तेत निर्देशसामर्थ्यान्निवर्त्तेत इति भावः शेषे लोपइ
ति पक्षे तु सुटस्तरंगत्वार्थमेव ॥ आत्वामिति दीर्घोच्चारणं सवर्णदीर्घार्थम् ॥ अन्यथा पररूपे स्यात् ॥ न चाकारोच्चार
णसामर्थ्यमत्र निवृत्त्यादस्माभिरिष्ट्वरितार्थत्वात् ॥ इह युवावौ द्विवचने त्वमावेकवचने इति सूत्रद्वये द्विवचनै
कवचनशब्दौ न प्रत्ययपरौ किं त्वर्थ... ॥ त्रिकपक्षे तु ... वाचिनी परावि इति व्याख्यातं तत्फलं दर्श
यति ॥ समस्यमानस्यादिना ॥ एकत्वेति ॥ पंचकं प्रातिपदिकार्थ इति पक्षे संख्याया अपि प्रातिपदिकार्थत्वादिति
भावः ॥ त्रिकपक्षे तु द्वेकार्थवाचिनी इति पाठः ॥ संख्याया विभक्त्यर्थत्वेपि संख्येयस्य प्रातिपदिकार्थत्वान पाया
त ॥ समासार्थो मुख्यविशेष्यं ॥ अन्यसंख्यत्वेष्वस्मदस्मदर्थेते गसंख्या नरसंख्यायुक्तश्चेदित्यर्थः ॥ त्वाहेति ॥
अर्थपरत्वाश्रयणसामर्थ्यादव्यभूतेत्यर्थगतेरपि स्त्रीकारांतात् प्रत्ययपरत्वे तु नस्यातामित्याहुः स्यादित्यर्थः
बोध्याः इदंत्त्व शेषे अंत्यलोपपक्षे अशः स्यादेशः जातु अंगवृत्तपरिभाषयानारंभणीयः ॥ यादितु अंगस्य यत्त्वार्थं न द्विषये २

र्थ

भावितत्व इति

शिलोप ५

म० २०

एवं चतुर्थश्लोकेपि न पुनरुक्तत्वमौचित्येन तु क्त्वार्थप्रसज्यपरत्वे ऽतिव्याप्तिर्द्धेनिमित्ता एवं चाव्याप्त्यतिव्याप्तिपरिहारायार्थ
परत्वमाश्रितमिति फलितार्थः नञ्‌रत्रिमन्यायविरोधः वचनग्रहणसामर्थ्यादेव तद्बाधात् ॥ अन्यथा हि द्वित्वे एक
त्वस्येव ब्रूयात् ॥ द्वि ते एकत्वे च यापि विभक्ति न तस्यामिति व्याख्यानसंभवादिति भावः ॥ अति त्वाकमतिमा
कामिति ॥ यत्तु वदन्ति ॥ सामन्त्राकमित्यत्र यद्यपि सुब्ग्रहणं न स्यात् विशेषणं बाधात् ॥ तथापि सुपलक्षणं तु
भवति ॥ तेन यस्यामः सुप्त्वेभावी न तस्येवामन्त्राकमा भवितव्यम् ॥ न चैतद्वारणत्वे संभवतीत्याकं तत्प्रवर्त्तते ॥ न
च समुदायनिर्देशे विशेषणत्वमुपलक्षणत्वं वा विहाय तृतीयः प्रकारोस्ति ॥ न च सुडामो [illegible] स्यानित्व
मिहातिदिश्यते ॥ यशाद्रस्य द्विवचनस्य चाभावात् ॥ यदि तु स च आम चेति समाहारद्वन्द्वे [illegible] येत योग्यत्वा
वलाव्यसशब्दे न सुडेकदेशेत ॥ तथापि यदि सुब्ग्रहणमन्वायविशिष्टं ततः समासो न स्याद्यन्यत्र तु साहित्यवि
वक्षया केवलस्याम्नो ऽप्रसक्तेरिति ॥ अत्रेदं वक्तव्यम् ॥ यस्यामः सुडागमे भावी त्यादिना विहितमन्त्राके माप्रतस्य
सुडन्वयाभावात् ॥ आमः सुड्भावीति चेत्तर्हि तमेवोपलक्षयेत् ॥ आदेशद्वारकेण परंपरासंबंधेन तस्या
निनमुपलक्षयतीति चेद् तैवं युष्माकमित्यादौ सुडश्रूयेत ॥ साम इति निर्देशसामर्थ्यात्तस्य यत इति चेत्त ॥ नि
र्देशस्य गौरण्याख्यस्याचरितार्थत्वेन सामर्थ्याभावात् ॥ यदपि समाहारद्वन्द्वं प्रक्रम्यान्वयविशिष्टत्वे दूष
णाभिधानं तदप्यसंभवदुक्तिकं ॥ साहित्यविवक्षया केवलस्याम्नो ऽप्रसक्तेरिति परमवशिष्यते ॥ तदपि

न

८१

नः॥ धक्रियादश्यायां स्थितस्सामर्थ्यं तत्कालभावित्वेनोत्पाद्यते तस्य सुदृश्यत्वं तु यत्परोहणोवसाहित्याभ्युप
गमात्॥ अतीतानागतयोः स्वयं दृष्टा इति वर्तमानेऽभयोरेकास्मिन्नेद दर्शनेन संबंधश्चोदितो यत्येकस्मिन्नाद
योरिति तुल्यं॥ तथा च रयोरिति सूत्रे दधुरन्यादौ धात्वोः रस्य इति [illegible] लोपे रभावेन तस्य कृतः भेद
ति तु चरितार्थेन तया रहितेर रयोरिति द्विवचननिर्देशगत्वात् णि कस्यापि रेभावः पुनः क्रियत इ
ति स्थितमाकरे॥ रयोरित्यकोपोषः॥ सामर्थ्यं तु द्वंद्वः सहविवक्षात् अयत्र तुल्येव॥ वस्तुतस्तु सा
मर्थ्यमाक्रमितिसूत्रे केवलोपाधान [illegible] एव निर्दिष्टः॥ तस्याकस्मिस्यानिवन्ध्या वनामत्वात्ससुदृक
त्वाच्च सामर्थ्यमिति प्रवर्तते॥ गोत्रत्वं तु प्रथमरस्येव पर्यवसानं॥ अत एव शेषलोपश्च लोपरतेप
देरास्य फलेश्च न पिसिध्यति सर्वथा पि ज्ञाति नया मतिमयामिति कोप्यद्यते तस्मिन् समर्थेपि
तु नाभिनिवेष्टव्यं॥ अतित्वाकमतिमाक्रमित्यादौ भाष्यस्तेनैवोदाहृतत्वादित्यादिकं॥ षष्ठ्या दिवि
शेषयोरिति॥ एतच्च सर्वं स्य पदस्येत्यधिकारालभ्यते॥ स्थानेऽन्तरतमं तु विभक्तोऽयं समासाया मेवय
थासंख्यमनुलुप्तायामित्यतदर्थमिति वक्ष्यति॥ वेदरशेषेरिति॥ युष्मानरत्नतु गोविंदरति तुष्वाचः
पाठः प्रत्युक्तः॥ असमानि तस्य समानेवाक्यस्य त्वाभावदेवाब्राह्मः॥ स्यादन्तरत्यादिति॥ तेषुनि

ग

म॰ २॰ रहानो वर्त्तते यथा समयेपनिश्च सुग्रीवेति समयं मा हासीरिति गम्यते तेन षष्ठ्यादीन विज्ञस्य नोरेवादेशा इत्यर्थः ॥
॥ युष्मत्पुत्र इति ॥ युवयोर्युष्माकं वा पुत्र इति विग्रहः ॥ पदात्परत्वं संपादयितुमिति ॥ शङ्कः ॥ वाचा तु नासौ
युक्तः ॥ तत्र पदात्परत्वाभावादेवादेशो न भविष्यतीति किं स्यादित्यनेन ॥ ... पादेपत्रकेनापंचानाम
ध्येऽन्यतमेन योग इत्यर्थः ॥ युक्ते इति ॥ नपुंसके भावे क्तः ॥ षष्ठ्यार्थैः ॥ अत एव निपातनाद्वेशाः ॥ दर्शनमप
श्यः ॥ तेनेह ज्ञानमात्रं ॥ अदर्शनं लोप इत्यत्र यथा न तु चाक्षुषज्ञानमेवानालोचनमिति निषेधात् ॥ तदत्र दाह
चाक्षुषज्ञानार्थैरिति ॥ भक्त इत्यादि ॥ अत्र व्याख्येयस्तु ॥ येन हरस्त्वं भक्तः तेनैवकारेणान्हमपि इति
याम्य ॥ यदि तु तेनेत्यनेन भक्तत्वं कारणे हेतु निर्दिश्यते तु तः सापेक्षविधानेत्सम एव तेदिमामति वत
अन्वादेशो न स्यादिति ॥ अत्रेदं वक्तव्यं ॥ सापेक्षविधानेऽन्वादेशत्वं नास्तीति मा ग्र्दसंगतं ॥ अ
देशो हि विधिः किंचिद्विधाय पश्चादितरविधिस्यान्वादेशः ॥ न तु निरपेक्षत्वगर्भः ॥ अन्वादेशार्थ
त्वाच्छास्त्रे तथा परिभाषितत्वाच्च ॥ न च प्रयोगदर्शनादेव तथा कल्प्यत इति वाच्यं ॥ वन्यादिपेत
न्याधितात्नगस्य ॥ प्रथेन मन्दस्तन या ग्रुश्य चेत्यादौ सापेक्षत्वेऽप्यन्वादेशदर्शनात् ॥ तत्र हेतुत्व
न शब्देनोपात्तमिति चेन्न ॥ तदनमुल्लंघितशासनं विधेर्विधेरिति नाशनिकेतनातिथिमित्रा

८१
81

ना

दित्र्ययोगवि[illegible]धानात्॥ नक्रंभीरुप्यमिति तु न विधिः किं त्वनुवादः॥ अतस्मादिममिति न विरुध्यते॥ एवं स्थि
ते येन त्वं भक्त इति यच्छब्दाध्याहारः क्लेशायार्थः॥ किं तु तेन आयत इत्येव संबंधः॥ त्वकोंनाथत्वा
नयच्छब्दापेक्षेति दिक्॥ यत्र तेनेति पूर्वविध्यमानपदतनो हरिरिति प्रथमानतनः परस्यादेशः नया
आयत इत्यस्मात्परं सरति प्रथमांतात्तन आयत इति भिन्नवाक्यस्यमिति अमितत्वं॥ सहरिस्त्वं मा
आयत इति तत्रोपात्तककारकसंबंधानात्॥ अनुपगमाभ्युपगमे पि एकतिङ्वाक्यमिति परिभाषितेन वा
ता॥ क्यानपायाच्च॥ सामंत्रिता संज्ञा विधावपि महासंज्ञाकरणं सामर्थ्यात् सुदंतस्य रूपं॥ आमंत्रणमामंत्रि
तं॥ उपचारात् तत्साधने वृत्तिः॥ विभक्त्यंतेन चामंत्र्यते तेन चामंत्र्यते न तु केवलया विभक्त्या इत्या
शयेनाह तदंतमिति॥ आमंत्रितं पूर्वमविद्यमानवत्॥ यत्तु पाचोक्तं विशेष्यपूर्वसंबोधने त
पूर्वं च संबोधनं हि त्वान्यस्मात्तं बोनात्परयोर्नित्यादेशा इति [illegible] तत्र केचिदित्यनुचितं
उक्तार्थस्य पदस्य नीद्धस्य चासिद्धत्वात्॥ यच्च व्याख्यातुः॥ त्रिसख्याश्रयमर्थ इति नन्वात्वनीयस्य आथे
स्यते नास स्पशीत॥ पादः पत॥ तदुवयवस्येति निर्दिश्यमानस्यादेशा इति परिभाषयेदलभ्यते त
॥ दाभाः॥ अग्निमयतीति निमन्नानेर्मंपते स्यादि पि एतदवेरूपं रादि नस्तुन लोपाभावादग्निमन्॥ अग्नि

म॰ २॰

मंयो। अग्निमंथः॥ यांता॥ ङकार इति। ओत इत्यस्मादिति भावः॥ ह्रस्वं यंतं न यो रिति। यंतं नस्यादि रु

स्वरेषत्सदृशः दीर्घस्तु विसदृशः इति भावः॥ उक्तं चेति। वार्त्तिककारेणेति शेषः॥ केचित्तु पूर्वस्यैव सूत्रस्यमुम

ङि-नुदाहरन्ति। तन्न। आद्यादेनोक्तमिति नु पोसिते॥ उदंत॥ अच इत्यस्यापवादः॥ चात्त्रा॥ अत्र सतस्य

याघातोः॥ एकाधातोरिति योसौ विभज्यते। तस्मात्परश्चादनेतरस्यासंनस्यैव ग्रानिषेधो नानात्वं तस्यति

केयटहरतादयः॥ तेदं तदर्शयति। धातुभिन्नासन्तस्य चेति॥ उभे भ्यस्तं॥ हिरन्यतु वर्सैवास्ति ह्य उभे

ष्टहर्णां समुदायस्येति पूर्वस्यर्थमिति व्याचष्टे। उभे समुप्तिरंति॥ अन्यथा हि नेनिजतीत्यत्राभ्यस्त

नामादिरित्याद्युदात्तत्वं स्यैकं पर्यायेणस्यात्। जक्षित्यादयः षट्। जक्षरितिरयवक्यदं॥ इति शब्देन

जक्षिरेवपरामृश्यते। इतिश्चादिर्थे वा मित्यतद्धि एषं विज्ञानेपि ह्रुवीहिस्तद्तदाह। षड् धातवो न्ये

ति। तांता॥ गोपायतीति गुपू कि पि विवक्षिते। आयादय आर्द्धधातुके वेति आयो भावः॥ पाता॥

न्यदाति॥ अनालोचने किं तत्पश्यतीति तद्दर्शः कर्मकर्त्तरि प्रवृत्तिर्दर्शिता। तमिव मे पश्यति जना

सरवाये पश्यतिज्ञानविषयो भवतीत्यर्थः। अत्र विषयत्वापत्तिमात्र वृत्तित्वापि विषयीकरणाद

त्तिवाद्ज्ञानार्थादिति संगच्छते॥ नशोर्वा॥ अत्र गुण्यपवीन्यपाणिनीयं॥ नष्टमित्यादाववेति समस्तं च॥

कर्माणपरा॥ ताद्दशाद्यम्य रूपत्वाद्समता मप्यवधा वार्येनन्नु स्याद्यतेअनत एवाज्ञा मा

८२

83

नशिति ॥ षडुकाः भ्रागवन् ॥ शांताः ॥ नुमविसर्जनीयशर्व्यवायेपि ॥ सुत्वेनेति ॥ सनः सस्य रुत्व
विसर्गयोः रुत्वयोः वा शरीति विकल्पात् पक्षे सकारः तेन शर्व्यवायेसुपः सस्य षत्वं रुत्वे स
सुत्वे नत्वादेशत्वरुत्वयोः प्रतिषेधः सपदान्तस्येति निषेधात् इति भावः ॥ एवं स्थिते सकारग्रहणेन
सिद्धे शर्ग्रहणं स्पष्टप्रयोजनं चिन्त्यं ॥ व्याख्यानादिति ॥ असंभवादिति हरदत्तोक्तिस्तु नातीव
ग्रस्तु हि त्सुरुत्वत्र संभवादिति भावः ॥ संयोगान्तेति ॥ नन्वस्मिन् कर्तव्ये बहिरंगत्वेन नलो
पस्यासिद्धत्वं शक्यं ॥ पदसंज्ञासापेक्षत्वेन संयोगान्तलोपस्यैव बहिरंगत्वात् ॥ कथं तर्हि
कार्यं कलत्रं शाल्वं चाव द्वाभ्यां संयोगान्तलोपो नेति प्राशुक्तमिति चेत्सत्य ॥ तत्र हि यणः प्र
तिषेधोन चाहलोलोपादिति पक्षद्वयेपि लोपाभावे निर्णीते तदेकरूप्याय पूर्वत्र पूर्वमंतरंग
मितिगवीतु युक्तं अतिदेशालभ्यस्य पक्षनस्यन्तसु नेलोपस्य चलत्स्य पूर्वभागे विसंगते
स्पष्टत्वात इह तु आश्रयपक्षद्वये संयोगान्तलोपस्य स्पष्टतया तदेकरूप्याय बहिरंगं तन्नि मि
त्तापेक्षत्व बहिरंगत्वमि त्यस्यैव न्याय्यत्वादिति दिक् ॥ नतिरश्रिभ्यामित्यादि ॥ यत्तु वदंति ॥ पुल्लि
ंगकंचाव द्वाभ्यां गबुकलोपः पुलश्च नत्सौ सुप्त्वा चैः चकोच सः ॥ कोश्च भ्यामिति नत्सोव

स्तुकं १ को:

मनेनवप्युक्तं ॥ अयं तु विशेषः । नकारकृतस्य त्वसंयोगांतलोपो नेति विवादः ॥ तत्रानुमो विद्वल्लेभ इति । दिधग्गिति ॥ यत्तु द
ह्रोर्ढः षढोरिति कत्वस्यासिद्धत्वात्संयोगांतलोपे उत्स्य जश्त्वे दिधग्भिरिति नैमिषीये नोक्तं ॥ तत्त्वामादिकं । दीर्घ
इति पत्वस्यटत्वत्वापवादस्य जागरूकत्वात् ॥ धात्वा ॥ विद्वानिति । वदः शानुर्वसुः अदादित्वाच्छपो लुक् ॥ से
दिवानिति ॥ भाषायां सद वस स्रुवः इति वसुः ॥ सेदुष इति ॥ ननु नदनुबंधकग्रहणे नातदनुबंधकस्येति
परिभाषया विदेर्वसुरित्यस्यैव । वसोः संप्रसारणं युक्तं न कसोः कस्य । वसोरुकारानुबंधकत्वेन कसो सामा
न्यग्रहणार्थं ॥ उगित्वस्यस्या निवृत्तावे नापि सिद्धेः इत्यगमि प्रभृतिभ्यः कसु नोदाहृतः छांदसत्वात् । क
यस्तु अयुंजते भेयापासि सर्वा एयधिजग्मुषस्ते ॥ तते स्थिवास नागरे । पेकठ इत्यादि छांदसा अपि क्वचिद्भा
षायां भवंतीति मासासंबंद सीति सामान्यापेक्षया तत्पकमासिन्त्य कथं चित्समाधेयं ॥ पुंसोसुङ् ॥ वि
वक्षितं इति । तेन परमपुमानित्यत्र परत्वादसुङ् । एते समासांतोदात्तत्वमसुङ् । एवाकारस्य भवति पर
सहत्वान्नुनेनत्रिध्यते ॥ सर्वनामस्थाने त्यतेः प्राग्वपुंस शब्दोकारस्योदात्तत्वे तेनस्व समनधर्मे ए
नुह्त्तस्य वचादेशास्य प्रसंगात् ॥ नेत्ताकारस्यासतेत्वेपरमेस्वे इतोपि स्वरो । नेत्यत्वान्निवर्त्तयिष्यते ॥
असुङ् स्थानेत्यात्कारिष्यतइति वाच्यं । ल्यतरंगेस्वरे कर्तव्ये वहिरंगस्यासुङोऽसिद्धत्वादिति भावः ॥ ए
तवकैयटहरदत्तादीनामनुरोधेनोक्तं । वस्तु तस्तु परस्समासमीपत्त्वोपि स्वपपादः ॥ अस्त्र तत्र स्पष्टपरिभा

यया: अङ्गसंज्ञापरिभाषावशादत्वादि स्यवधेयं ॥ ननु एवं मसमासेपि अमुष्टि: इत्यत्र प्रातिपदिकस्वरेण सतिशि
ष्टेन प्रत्ययस्वरस्य बाधात् अमुः उदात्तत्वं स्यात् इष्यते तु कारस्य तु मानं तु मासपरिवात्वित्यादौ तथैव पाठा
दिति चेत् । सत्यम् तु मस्तु नोतिनिकारणसामर्थ्यात् प्रातिपदिकस्वरो न भवतीति हरदत्तः नन्वेतदयुक्तं । प्र
त्ययविभागस्य त्यधव फिषरित्यस्य च इशेरितिवत्सत्त्वं ॥ किंचिन्मारवं अपि प्रत्यादिदं लिंगं ॥
॥ यया पि असि अवाहिरिंगमं तरंगमिति चेदसिद्धं तथापि वाहिरंगपरिभाषाया अनित्यत्वमपि ज्ञापयितुं नि
त्कारणमिति निः ष्कर्षः ॥ उच्चारणार्थ इति ॥ यत्तु प्राचोक्तं ङः अविता विनि ॥ यत्र तत्याज्ञेणाव्याख्यातं तु
कारः ङिग्नकार्यार्थ इति तदसंगतमिति भावः ॥ इदमुमन्निति ॥ असंबुद्धावित्युक्तेर्न दीर्घः ॥ पुत्रविति ॥
संयोगान्तलोपमो नुस्वारः ॥ नुमस्यानिकस्यैवानुस्वारस्योपलक्षणात् तुम विसर्जनीये निनष
त्वं ॥ अस्य सम्बुद्धाविति ॥ एतद्वचनं कायत्तु हरदत्तादय आहुः । सोर्डेति आक्षेपं नङ साविति
वचनेन कश्चिदनुः एव अवर्णस्य तत्रापि तत्वादेनासिद्धमिति ॥ ननु प्रागेव दूषितं अंगरेत्र परिभा
षयाबाधासमाधेयं ॥ अदस औसुलोपश्च ॥ ननु सोरेव औकारो विधीयतां तत्यदाद्यत्वेन असाविति
सिद्धं किं सुलोपविधानेनेमेवं । असकौ अध्रीत्य त्वरा पि च स्यपस्यादिति इत्व प्रसंगात् । असुकाइति ॥
ओत्वाभावे त्यदाद्यत्वसाद्गुत्वं असुक इति तत् साधुः । सत्वेन मुत्वस्य बाधात् ॥ एवं अमुकौ अमुकश्च

म. २.

मोरित्यादावोऽप्यसाधुरेव। अमुकाऽमदकः शर्मेत्यादेरेव न्याय्यत्वात्॥ एतेनेदं बहुवचने पारिभाषिकस्य ब-
हुवचनस्य ग्रहणादमीभिरित्यादिसिद्धावपि जशि अमी इति न सिध्येत्। न ह्यत्र एकारस्य बहुवचनपरतास्ति
अतो व्याचष्टे बहुत्वे इत्यर्थोक्ताविति॥ नमुने। ने इति विषयसप्तमीत्याह नाभावे कर्त्तव्य इति॥ अन्यथा बः
रत्वाभावान्नाभावो न स्यादिति भावः॥ नन्वेवमपि कृते नाभावे सुपि चेति दीर्घः स्यात्। दीर्घप्रतिसु
त्वस्यासिद्धत्वात्। अनजादेः॥ इनेचेति। सन्निपातपरिभाषया वा समाधेयं। अत्रेदमवधेयं। अमु
नेति वत्। अमुनेति वक्तव्ये नमुन इति उक्तिर्नेति योगविभागार्था तेन रामः रामेभ्य इत्यादि सि-
ध्यति॥ अन्यथा हि शेरसिद्धत्वात् उकारस्य इत्संज्ञालोपौ कथं स्यातां न चानुनासिकनिर्देशसाम-
र्थ्यादित्संज्ञालोपौ प्रत्यासिद्धत्वं नेति वाच्यं। तरुमूलमित्यादौ हि सिचेत्यस्य व्याख्यातत्वात्। नो रोरी
रित्यत्रानुनासिकस्यैव निर्देशेन तत्रैव चरितार्थत्वात्। न चानो रो रित्यत्र मास्त्वनुनासिकता प्र-
तिपदोक्तग्रहणेनैव निर्वाहादिति वाच्यं। एवमपि देवरुडीत्यत्र रुधातोर्दुर्वारत्वात्। रामस्त्यादा-
वपि अनुनासिकस्य शेः अवर्णस्यापाद्यमानतया चरितार्थत्वस्य सुवचत्वाच्च॥ एवं चस्यानि
नत्र चस्यापि प्रवृत्तौ पदत्वाहिसेर्गोपि लभ्यते। तं प्रत्ययः परश्चेत्यादिनिर्देशात् यत्वविधावश

८४
85

गृह्णाते वेदलिंगमित्यादि कृतास इति हलंताः पुंल्लिंगाः ॥ नहो धः ॥ ददस्येव नोक्तं तथा हि सन्निनद्धमित्यत्र
रत्नाभ्यामिति नत्वस्य ॥ झषस्तथोर्धोधः इति तस्यात्र ॥ अत्रैदमत्र धयं ॥ अनुष्ठुजस्त तद्धात्यस्यामितिव
कृतौ हेस्य नद्धानित्यादि पुंवद्रूपं पयनुगोरादि ङीष इत्वास्य नड्डो ह्येतुपानजुः ॥ नहिवृत्य ॥ अनु
नुपसर्जनाधिकारविरोधात् ॥ गोरिति ॥ गॄ निगारणे शा इत्येव क्विप् ॥ गीरिति इत्वं वोरुपधाया दी
र्घः ॥ पुरिति ॥ पॄ पालनपूरणयोः ॥ उदोष्ठ्यपूर्वस्येत्युत्वं ॥ आशीराशिषाविति ॥ आङः शासः क्वावुपसंख्या
नमित्युपधाया इत्वं षः ॥ सिवधुरीतिषत्वं ॥ ॥ इति हलंताः स्त्रीलिंगाः ॥ अन्वादेश इति ॥ अ
यं च अभ्यर्थेति व्याख्यातारः तस्य तु कालभूतत्वेपि वचनसामर्थ्यात् तदन्त्यस्य लक्षणामित्या
हुः ॥ वस्तुतस्तु सूत्र एवैनदकृत्यः ॥ एनं एनौ इत्यादि तु त्यदादेत्वेन सिद्धं क्लीवेगमिलुकालु
प्तिकारोद्धारणस्तामर्थ्यादेनदादेशः ॥ नचैवं एसं तच्छित तदस्याः आपितदापत्तिः एकपद
अप्यत्वेनांतरंगस्य मोलुकि चरितार्थत्वेन वहिरंगे सामासिके तु किंतदश्वरस्तेः ॥ रासु पि
अहभौतीति ॥ प्राचानुजस्तन्नित्युपन्यस्तं तदिहानुचितं ॥ अस्ता भ्यामिति तात्पर्यं तयाकर्यं वि
योज्यं ॥ अस्य सकृशादस्तित्वित ॥ एतज्ञदीरस्यामित्यस्य स्पष्टं ॥ बहुर्जीति ॥ अन्यादितिवाचनकं ॥ त

म. २.

याचवार्त्तिकं वद्धेर्जिब्रन्तिषेधः ॥ अन्त्यान्पूर्वो वानुमनेके ॥ भाष्ये नु अचः परो यो हल तदन्तस्य नुमरत्यर्थ
मान्त्रित्यप्रथमेन वार्त्तिकं वन्त्यारव्यातं ॥ एवं नुडर्द्धमाने गर्ह गर्हा याम्नित्यादीनामपि किं वं तानां नुमान
भाष्यमेवा यथोत्तरहिम नीनांग्रामासय मिति दिक् ॥ अल्लोपस्येति ॥ को लुप्तं नुस्थानिवदितितुनरा
श्रीयनेन तस्य काचित्कत्वात् ॥ कोविधिं प्रतिनस्थानिवदित्यस्येव सार्वत्रिकत्वादिति स्पष्टमाकरे ॥ अ
श्वान्निम्नतानीति ॥ सप्तविंशति अधिका पंचशती त्यर्थः ॥ तथाहि सोनवानां अंत्यस्यादि त्वे ष्ट
दश ॥ औङि चतुर्णां मध्ये पूर्वार्थानां त्रयाणां जद्वित्वसत्वे अनुनासिकस्तु नास्ति प्रगृह्यत्वात् ॥ ज
सि न द्वित्वस्यानुनासिकस्य च विकल्पात् द्वादश ॥ संकालनया सप्तत्रिंशत् ॥ एवं द्वितीयायामपि टाया
चतुर्दश भ्याम्भिस् अष्टचत्वारिंशत् भात्साज्य र्गोप्रमानां द्वित्वात् ॥ भिसि चतुर्विंशतिः ॥ ङयि सप्त अनु
नासिकस्तु नास्ति ॥ एकारस्यानत्यात् ॥ भ्यसिभ्याम्वत् ॥ ङ सौ ङ सा दिषु वके च वत्त्वे कं चतुर्दश ॥ सु
पि गत्यर्थे त्रयाणां ककारषकारयोर्द्वित्वेन उकारस्यानुनासिकेन च चतुर्विंशतिः ॥ एवं कुक प तेन षरसा
ङ षयोर्द्वित्वे अनुनासिके चाष्टचत्वारिंशत् ॥ कुग्भावे त्रयाणां ङकार द्वित्वे अनुनासिके च द्वादश ॥ सु ०
१२ औ १ जस १२ अम १८ औ १ शस १२ टा १४ भ्याम् ४८ भिस् २४ ङे ७ भ्याम् ४८ भ्यस् ४८ ङसि
१४ भ्याम ४८ ङस ओस आम् ङि ओस प्रभेक १४ सुप् ८४ ॥ अभेदमन्वये ॥ दूजायां न सिनु माग

६९
86

मस्तेन तस्य पाक्षिको द्वित्वे अकारत्रयसहितं रूपं भवति। एवं शस्य पौनःसंकलनया द्वादश। तथा च रूपं
त्रयाणामिति भाष्यव्यतिरिक्तमतेदिक्। यत्तु वदंति। उभयमेवं द्वित्वं पुनर्द्वित्वलोपविक
ल्पनेः अष्टपंचाशतो वृद्ध्या त्रिसप्तत्यधिकं शतं भवति। तच्चेत्यं। पुनर्द्वित्वस्याशास्त्रीयकत्वात् लो
पानंत्यप्रसंगजनकत्वाच्च अष्टपंचाशत्तो वृद्धेरुपपत्त्यभावाच्चेति दिक्। तिरश्चीति। अन्वादचश्चल्लो
पः अलोपश्च निवचनात् तिर्यादेशाभावः।। स्वपृशति। ग्राममनाप्नोपो ऽस्मिन्सरसि इति बहुव्रीहिः
अकृपूरितिसमासान्तेप्राप्ते न पूजनादिति निषेधः। यत्तु अनि त्यच्चादिति प्राचोक्तं तत्नमादिका
घ्नते रूपसर्गेभ्यः इति तु न भवति तत्रापइति एनसमासान्तस्यानुकरणमिति वक्ष्यमाणत्वात्।।
सुपुंमांसी इति। पुंसो ऽसुङिति सूत्रे सुरीति व्याचक्षाणस्य प्राचो मते शासिनैव सिद्धान्तः। औङि
चातिव्याप्तिः।। अस्माकं तु सर्वनामस्थाने इति। यथासूत्रं तुवनांम सर्वेष्टसिद्धिरिति भावः।। ।।
इति हलंता नपुंसकलिंगाः।। ।।स्वरादिनिपातमव्ययं।। स्वरादयश्च निपाताश्चानि सम मह
रद्धः।। स्वरिति स्वर्गे परलोके च।। अंतरमध्ये।। प्रातरप्रत्यूषे। पुनरप्रथमे विशेषे च। सनुतरन्त
र्धाने। स्वराद्याः पंचरेकान्ताः।। उच्चैस्महति। नीचैस्त्वल्पे। शनैस्तु क्रियामान्द्ये। ऋधक्सत्ये। वियो
गशीघ्रसामीप्यलाघवेष्वित्यपि। ऋते वर्जने। युगपदित्येककाले। आराद्दूरसामीप्ययोः। पृथग्भि

म. २.

न्ना।ह्यस् अतीतेह्नि।श्वोऽनागतेह्नि।दिवा दिवसे।रात्रावितिमितिनुशि।सायमिति निशामुखे।चिरस्मिति चिर
काले।मनाक् ईषदर्थे।मावल्पे।जोषं सुखे मौने च।तूष्णीमिति मौने।जटिस्या।अवसरो वाच्ये।समयाति
समीपे मध्ये च।निकषंस्यं निके।स्वयमिति आत्मनेत्यर्थे।रथैति व्यर्थो।नक्तमिति रात्रौ।नञ् निषेधे।
हेता शिति निमित्ते।ईदृतिज्ञाकाश्ये।अहइति स्फुरणधारणयोः।नत्वाति शपथे योगिन्नपके।सामीप्य
नुदुक्षितयोः।नतरेन तुल्यमित्यादि विविहितोजनिशब्दाय।यस्तूपसर्गान्त्यर्थे नेति दिदृक्षतः सन
उगृहीते।यदुकतो निवनोयासि।सनासनत् सनात् एते नित्ये।उपधाति भेदे।निरसंतनैर्यग्यार्थेपु
रिभवे च।अंतरेति मध्ये विनार्थे च।अन्तरेणाति वर्जने।ज्योगिति कालभूयस्त्वे प्रश्ने ज्ञीप्राय्ये स
प्रश्नार्थे च।कामिति निकामस्ये निंदासु सेषु।शंसुखे।सहसेत्याकस्मिकाविमृश्ययोः।विनेति वर्जने।
नानेत्यनेकविनार्थयोः।स्वस्तीति मंगले।स्वधा पितृदाने।अलं भूषणपर्याप्तिशक्तिवारणनिषेधेषु।
वषट् वौषट् श्रौषट् एते हविर्दाने।अन्यदित्यन्यार्थे।अस्तीति सत्तायां।उपांशु इत्यप्रकाशोच्चारणे।रह
स्ययोः।लमेति निःसंतो विल्लयसेति विषयार्थे।दोषेति रात्रौ।मृषा मिथ्येति एतौ वितथे।मुधेति व्यर्थे।
पुरेत्यादरे निरानीते भाविभविष्यदासन्ने च।मिथो मिथस्यरणोरहः सहार्थयोः।प्रायस् इति बाहुल्ये।मु
हुरसकृत् पुनरर्थे।अवाक् अकस्मिति समकाले उर्द्धार्थे च।प्रजाकेतिपाठं नरंसार्धदन्तमिति चलन्ति

८०
87

रे॥ आ कराय नस्तु आर्ये त्रिष्वति वंधो॥ हलमिति प्रतिषेध नादधेगि त्याहः॥ आभीक्ष्णमिति पौनःपुन्ये॥ आकंसा
ईषणे तोसलार्थे॥ नमस्तनतो॥ हिरुकु वर्जने॥ धिकृ निंदाभर्त्सनयोः॥ अम्रे शीघ्रे॥ स्मे च॥ आम् अंगीकारे॥ कमे लिंङ्
प्ययति काश्चव मयादि त्यादिभिस्माविहितः॥ प्रसयोपीह गत्य नरस्य के॥ अपाचितरां॥ कारयामास॥ व नाम
ग्लानो॥ प्रशाम समानार्थे॥ वतान विस्तारे॥ मा माङ् एतौ निषेधाशंकयोः॥ आरूनिग एग इति॥ तेनान्य
पिन्नेयाः॥ नथाहि॥ कामस्य कुर्य॥ प्रकाममति शाये॥ भूयइतितु नरर्थे॥ सांप्रतमिति न्याय्ये॥ परमिति कि
न्वर्थे॥ साक्षात् प्रत्यक्षे॥ साचीति तिर्यगर्थः॥ सत्यमित्यर्थे अंगीकारे॥ मंकु आशु एतौ शीघ्रे॥ सवत न वर्षे॥
अवश्यम निश्चये॥ सपदि शीघ्रे॥ बलवदिति अतिशये॥ प्रादुस् प्रादुर् इति प्रकाशे॥ अनिशं नित्यद
सदा अजस्रं सततं एते सातत्ये॥ उषेति रात्रो शेदसीयां शेष्यपर्थे॥ ओमित्यंगीकारे प्रणवे च॥
भूरिति पृथिव्यां॥ भुव इति अंतरिक्षे॥ स्वरिति अजिति नरसाइति शीघ्रे॥ स्तुतु अवभासायां॥ दुष्टु निरसोश्ह
पूजायां॥ अहह आश्चर्ये॥ कु इति कुत्सितेषदर्थयोः॥ अंजसेति तत्वशीघ्रार्थयोः॥ मिथुन इति मिथ्यार्थे
भाजकु शेषे॥ चिराय चिररात्राय चिरस्य चिरं चिरेण चिरात् इत्येते चिरार्थकाः॥ अस्तमिति विनाशे॥
आनुषक् आनुपूर्व्ये॥ अनुषक् अनुमाने॥ अस्तु शोपसमाजतिकराः॥ स्थाने इति युक्ते॥ वरमिति ईषद्
उत्कर्षे॥ सुदि शुक्लपक्षे॥ वदि कृष्णपक्षे॥ इत्यादीनि समुच्चयादिषु॥ आ स्यादीषत् कल्पोयमयोरेवार्थोपस

मुच्चये॥ हन्तेति प्रसिद्धौ॥ स्नेह प्रज्ञायां॥ एवेत्यवधारणे॥ नवं कृतौ च॥ एवमिति तु तत्परामर्शे॥ नूनमिति निश्चये वि
तर्के च॥ शश्वदिति पौनःपुन्ये नित्ये सहार्थे च॥ युगपदिति एककाले॥ भूयस्तु नवर्थे ऽप्याधिक्ये च॥ कूपादि
तिप्रश्ने प्रशंसायां च॥ कुविदिति भूयार्थे प्रसंशंसायां च॥ नेदिति शङ्कायां जनिषेध विचार समुच्चये
षु च॥ चेदिति यद्यर्थे वत्स्यर्थे ऽयं चेदर्थे णित्॥ समुच्चयादौ त्वनतु बंधः॥ कच्चिदिति इष्टप्रश्ने॥ यत्रेत्यन
कम्पामर्षगर्हाश्चर्येषु॥ नाव कल्पयामि नमर्षये गर्हे आश्चर्यं यत्र भवान् वृषलं याजयेत्॥ नहेति प्र
त्यारंभे॥ हन्तेति हर्षे विषादे ऽनुकम्पायां वाक्यारंभे च॥ माकिः माकीं नकिरिति त्रयोऽपि वर्जने॥ माङ्
नञोऽस्वरादिष्टकौ॥ हस्वपाठस्तु निपातत्वार्थः॥ तेनाद्युदात्तत्वं सिध्यतीति प्राचः॥ तच्चिन्त्यं॥ फिट्स्वरेणा
पि इष्टसिद्धेः॥ यच्च प्राहुः॥ सत्त्ववचनानामपि अव्ययसंज्ञार्थं स्वरादिपाठ इति॥ तदपि चिन्त्यं॥
लक्ष्मीवाचकस्य माशब्दस्याव्ययत्वापत्तेः॥ तस्मादुभयत्र पाठे फलं चिन्त्यं॥ यावत्तावदेतौ साक
ल्यावधिमानावधारणेषु॥ साकल्ये यावत्कार्यं तावत्कृतं॥ अवधौ यावद्गन्तव्यं तावत्तिष्ठ॥ मान
यावद्दत्तं तावद्भुक्तं॥ अवधारणे यावदमात्रं ब्राह्मणानामंत्रयस्व॥ त्वे विशेषवितर्कयोः॥ दैविन
केन्ये इति पाठान्तरं॥ रे दाने ऽप्याज्ञाना दरे च॥ रेकारान्ति दहतीत्यर्थः॥ त्वे रैकि कारिष्यासि॥ श्रौषट् वौषट्
तो हविर्दाने॥ स्वाहा देवताभ्यो दाने॥ स्वधेति पितृभ्यः॥ श्रौषडादीनामनेकाचामुभयत्र पाठः स्वरभेदार्थः॥

तुमिति तुंकारे ॥ तुरं तुंरं त्वं तुंकारः ॥ तथा हि ॥ इतीति निःस्थाने ॥ स्वस्ति निषेधे वाक्यालंकारे निश्चये च ॥ किलेति
वार्तायामलीके च ॥ अथेति मंगलानंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु ॥ अथ स्वरादिरूपि
॥ तेन मंगलवाचकस्य साफल्यत्वेपि अव्ययत्वं सिध्यति ॥ तथा च ओं रूपः ॥ उदस्य कुंभीरथ शातकुंभ
जाः अनुपचारुत्विषि विरदिको दरा ॥ यथा कुलाचारमथ पूर्वं नीन्द्र जां पुरंध्रिवर्गाः स्नपयांबभूवतामि
ति ॥ अथ ॥ अथ यस्तपयांबभूवेत्यस्य मंगलस्नपनचकारेत्यर्थः ॥ निपातस्तु स्वरूपेण मंगले
मृदंगध्वनिवत् ॥ सुष्ठु स्वरभेदार्थपाठः ॥ स्मेत्यतीते पादपूरणे च ॥ आदरेतु उपक्रमः ॥ इंसाकुन्तां
पुः अवद्यत्तमिति ॥ इह अनुपसर्गत्वात् अवउपसर्गा तरति न भवति ॥ अलमिति ॥ सुवंत प्रति
रूपकं ॥ ए नमस्कात्परमर्थः ॥ त्वामासि वच्मि ॥ ओं इत्युवाचेत्यर्थः ॥ आसीतिन भूवेत्यर्थः स्त्या
दि ॥ अइति संबोधने अधिक्षेपे निषेधे च ॥ आइति वाक्यस्मरणयोः ॥ इ संबोधन जुगुप्सा विस्मय
यो ॥ इ उ ऊ ए ऐ ओ औ संबोधने ॥ पशु सम्यगर्थः पशु मन्यमानाः ॥ शुकं शोष्य ॥ यथा कथा च तु
नादरे ॥ पाट प्याट अंग हे है भो अयि एतसंबोधने ॥ यन्ति ॥ हिंसाप्रातिलोम्यपादपूरणेषु ॥ चितु
नार्थः ॥ एकपदे इति ॥ अकस्मादित्यर्थः ॥ युत कुत्सायां ॥ आत इति इतोपीत्यर्थः ॥ आ इति गणइति ॥

म॰ न॰

तद्यथा ॥ यत्तदितिहन्तो । अहोस्विन विकल्पे ॥ सीमस सर्वतोभावे । कंपादपूरणे । स्कमतिशये ।
अनुकंपितर्के । शंवरश्चांतःकरणेऽभिमुख्ये च । वपादपूरणे स्वार्थे च ॥ दिष्ट्यानंदे ॥ चाटु चा
टुप्रियवाक्ये । कुत्सितभर्त्सने । स्वातेसादृश्ये । अद्यत्वेइदानीमित्यर्थे । इत्यादि । अत्रेदमवधेयं
। स्वरादिआद्योरारत्निगणत्वाविशेषेपि येषां निपातस्वर इष्टस्ते चादिषु अन्ये स्वरादिषु स्व
रद्वयभाजस्तु उभयत्रैवोच्याः । तद्यथा । उतशब्दः स्वरादिषु उदात्तान्तः न तु नेत्वं तोदात्तत्वप्रयो
गात् ॥ यत्तु उतशब्दस्य स्वरादित्वात्तु क्वापि निपातस्वरमाशंक्यांतोदात्तत्व निपातनाम ॥ अन्यस
मादद्यु स्वकमभसात् ॥ स्वरादेश निपातत्वात् ॥ अंतोदात्त निपातं न वेयमर्थात् । यदपि काशि
कायामुक्तं । स्वरशब्देन सत्वाधक ॥ देवा । रथा । नक्तमित्यादयोंतोदात्ता इति । यच्च । सनात
निरस ॥ एवमाद्यन्याद्युदात्ताः सन्ति । तत्सर्वं पूर्मादिकं लक्ष्यविसंवादात् निर्मूलत्वाबतिशाद्धकौस्तुभप्रपंचितं ॥ तद्धितश्चास
र्वविभक्तिः ॥ सर्वैति ॥ वचनत्रयान्विकेत्यर्थः ॥ नेति ॥ किंत्वेकवचनमेवात्यय तद्धित भावः ॥ तद्धितः किंरोके द्वौ त्रयः ॥
असर्वनाम्यादि किम्भोपगवः ॥ रत्नोजनः ॥ जीवसेति । तुमर्थसेसेनन्ति असेवत्प्रत्ययः ॥ पिवध्यैइति । निनेवसंशाध्येष
त्ययः पाश्चनिपिवादेशः ॥ यत्वादुः ॥ कर्तरिशाविति ॥ तदभसातं ॥ अव्ययरत्नोभावश्चेति सिद्धान्तात् ॥ अंतगमह
गमोपदेशिकत्वप्रतिपत्त्यर्थम् ॥ तेनह न । आधये । चिकीर्षवे ॥ लक्षणजनितपदोक्तसंनिपातपरिभाषाभ्यां

सिद्धतयोरनित्यत्वज्ञापनार्थमिदं ॥ क्त्वातोसुन्कसुनः ॥ उदितोरिति ॥ उत्पूर्वादिणो भावलक्षणेस्थेण्कृञ्वदिचरिहुतमि
जनिभ्यस्तोसुन् ॥ विसृप इति ॥ सृपितृदोः कसुन् ॥ आप्ग्रहणमिति ॥ तथा च वार्त्तिकं ॥ अव्ययादापो लुग्वच
नानर्थक्यं लिंगाभावादिति ॥ सूत्रस्योक्तिसंभवस्तु क्रियायामिति सूत्रेस्त्रीसमानाधिकरणादिति पदद्वार
हीत्वा बोध्यः स च नास्त्येव तः ॥ मूलेभियं ज्ञापरणीत्यादावपि व्याख्येः ॥ अलिंगत्वे आथर्वणव्रणवद्विद्या
गतस्तु निर्विरोधमाशंक्याह ॥ सदृशमिति ॥ लिंगकारकेति ॥ विभक्तिवचनशब्दौ कारकसंख्यापराविति भा
वः ॥ यथा वा चेति ॥ परिगणनमिदमित्येके ॥ अन्ये तूदाहरणमात्रमित्याहुः ॥ वगाह इति ॥ आदिर्वाका
रो लुप्यते नान्त्यः ॥ अपिनासाद्व्ययात् ॥ इत्यव्ययानि ॥ ॥ स्त्रीति ॥ अशुभ्रुषिलटि क्रीणाति शिभ्यः क
न ॥ पंचाजीति ॥ न चात्र तदंतविधिविरहादेव टाप् न भवतीति वाच्यं ॥ अमहन्नवं नगरेनुपसर्जनाधिका
रणाच स्त्रीप्रत्ययेषु तदंतविधिज्ञापनात् ॥ मूषिकेति ॥ इह केचिन्मूषः किकन्नित्यधिकारेनुषदीर्घश्चेति किकन्
इकारमध्याम्मूषिकशब्दः ॥ यस्तु मूषस्तेये इति दीर्घोपधात् ज्ञायापि कुनि मूषशब्दमाधवेनोक्तस्तेनोप्ययं
टाप् ॥ प्रत्ययस्थादिति इत्वमिति तु विशेषः ॥ यत्तु मूषकुन्तेत्यसो अजादिगणपाठ नवयुंक्ते ॥ तस्य ज्ञाति
लक्षणे नैष बाधनार्थत्वात् ॥ संज्ञायामस्य अजादित्वादित्याहुः ॥ तद्धितं ॥ आत्यादिवन्तं तत्त्वे पिजा
नित्यानपायात् ॥ भस्त्रेफलेति ॥ भस्त्रेव फला नियस्या इति विग्रहः ॥ आपो रिति ॥ एतद्भ्रफलानिः पत्ता

वितिधातोमाधवग्रंथेस्थितं॥ भाष्येतुज्ञापकादीर्घएवपठ्यते॥ अन्यकृदुष्येति॥ पाककरोत्यादिस्व
रस्यभाष्यवार्त्तिकपर्यालोचनयेदमुक्तं तेनसत्याकारेतिपाठोनादर्त्तव्यः॥ शूद्राचेति॥ शूद्रशब्दो
पमुत्पाद्यति॥ जातिरूपेत्त महत्सर्वसुनाजातित्वदितिरूपापिसंबध्यते॥ पुंयोगेत्विति॥ पुंयोगस्यद
प्रत्ययरूपावेतिननियमः किंतुजन्यजनकभावोपि॥ तेनवैश्यस्यशूद्रायोस्तुराजन्यान्माहिष्यायैसुतौस्मृत
वितिसिद्धं॥ महाशूद्रीति॥ आभीरीतुमहाशूद्रीजातिःपुंयोगयोः समत्वमरः॥ अत्रेदमवधेयम्॥ अ
ज्ञादिगणेशूद्रेत्येवपाठः॥ जातिरितित्वर्थमुख्यकार्यसंप्रयात् जातिलक्षणोङीषेवबाधिष्यते॥
पुंयोगेङीगौणीवृत्तिः॥ अमहदित्याद्यपिव्यर्थमहाशूद्रशब्दात्स्त्रियांविशेषणवजात्यंतरवर्त्तते॥ तत्र
अवयवस्यानर्थकतयाशूद्रशब्दार्थसमवेतस्त्रीजातित्वाभावात् टापः प्रसंगएवनास्ति॥ यत्तुमहती
शूद्रात्रमहाशूद्रेतीष्यतएव॥ क्रुंचेत्यादि॥ वयोथमीहलंतास्त्यके॥ क्रुंचानालभेत॥ उष्णिहकुकुभौ
इत्यादिप्रयोगमुदाहृत्यभदंतापिभाष्यस्वीकृताः॥ पुंयोगपीति॥ यदाज्येष्ठादयः प्रथमजातादौवर्त्तते॥
तदाभदंततत्वादेवटापसिद्धः यदातुज्येष्ठस्यस्त्रीत्यादिविवक्षा तदापुंयोगलक्षणोङीष्प्राप्तः सोनेन
बाध्यतइतिसूचयितुमपिशब्दः॥ मूलान्नञः॥ नञः किं शतमूली॥ अमूलेति॥ ओषधीजातिरियं॥
उष्णितख्या॥ भवतीति सर्वादिषु भवतुइत्युदितपठितः॥ भातेर्डवतुरितिसुत्यादितख्या॥ शत्रंताःनुङीपि

शश्वध्यनोरितिनिस्योनुम्॥ वनोरच॥ सुत्वानमिति। सुपज्ञोर्ङ्वनिप्। अतिधीवरीति। दधातेः क्वनिप्। श्व

र्वरीति॥ शृधातोर्वनिप्॥ गुणेकृते रसंतान्यरत्वेपि संतो ह्रितत्वाभावात् ङीबयोर्निषेधोन॥ अ

वावेति। न्यासकारस्तु प्रातिकार्यं निषेधः नेतन्नभावरीत्याह। नतु तत्र अभ्यादो दृष्ट। पद्दलाविति॥ तुधा

चोद्दिव वनेवक्रुधीयेविक्रुधीवनोवक्रुधीवरीतिरूपत्रयं भवतीति भावः॥ टाराबे। पूर्वेणाङ्प्राप्तस्यङी

पापवादः॥ असिद्धत्वादिति॥ कार्यकालपक्षेणेदं। यदितु यथोद्देशपक्षः संज्ञायदिवा उपदेशका

लिङ्गात इति व्याख्यानं तदासिद्धत्वोपवर्णनं नोपयुज्यते इत्याहुः॥ वस्तुतस्तु यथोद्देशपक्षेप्यसि

द्धत्वमुपयुक्तमेव। एकदेशविकृतस्योपसंख्यानेन हि स्थानिवत्सूत्रे पठ्यते॥ आदेशग्रहणसामर्थ्या

त्सर्वपदादेशशास्त्राणि त्वन्नानुमानिकोप्यादेशः स्थानिवदिति वा व्याख्यायते उभयथापि

अल्लिधोनन्त्वरुन्निः एतद्वाकारस्यह॥ बहुव्रचाताविति। नसंयोगादितिनिषेधान्नास्मुपधालो

पी। तेन अन उपधालोपिन इति न प्रवर्त्तते॥ उभाभ्यां॥ ननु निषेधउपाः क्वनसामर्थ्यात् पर्यायः

सिद्धः स तं अन्यतरस्यामिति योगो विभज्यते तत्रमनरतिनिवृत्तं अनो बहुव्रीहेः इत्यस्यानो डीप

सह विकल्पलाभार्थमिदं अन उपधालोपिन इति सत्वनु नियमार्थं अनो यो सौ विकल्पः स उप

धालोपिन एवेति। तथा च सुपर्वेत्यादावनुपधालोपिनि निषेधार्थमिदं॥ बहुराज्ञीत्यादौ तु अन्ने भ

म० २०

इत्युपधाङीपत्ते न बहुव्रीहौ धीवरी सिध्यति।। अन्तेभ्य इति ङीपमनूद्य तत्संनियोगेन विधीयमानो नोरेफः श्रूयतां
तरस्येन ङीपि र तेनासिध्येत। ननु वनो र चेति सूत्रमेव ङीब्रौ विधत्तामिति चेन्न।। उभयविधौ गौरवात्।।
किंच। एवमपि ङीपि निषिद्धेऽपि दुर्लभः संनियोगशिष्टत्वात्।। बहुव्रीहौ वेति न सूत्रमतं।। भाष्ये तु स
त्रभंगेन समासेऽस्ति।। तद्यथा।। अनो बहुव्रीहेरित्यस्यानन्तरं उपधालोपिनो वेति सूत्रमस्तु।। अन उप
धत्यादिप्रदेशान्तरस्थसूत्रडाप्सूत्रेऽन्यतरस्यांग्रहणं च मास्त्विति।। अन उपधा। बहुव्रीहिरूपधसोऽङीपि
त्यत्तो बहुव्रीहिग्रहणं संख्याव्ययादेर्ङीबित्यतो ङीब्वानुवर्त्तनेरस्याशयेनाह।। अन्नतादित्यादि।। निय
मार्थमिदमित्युक्तं।। नचैवं पूर्वेण वा विकल्पासिद्धेरिहान्यतरस्यांग्रहणं व्यर्थमिति वाच्यं।। असति
ह्नितस्मिन्नित्यपर्योविधिरेवायं स्यान्नतु नियमः।। प्रत्ययस्थात्कात्पूर्वस्य।। कादित्यकार उच्चारणार्थः।।
व्यंजनमात्रं विवक्षितं विशिष्टविवक्षायां तु। एतिकाः स्वरतीत्यादौ अकचि नस्यादित्याशयेनाह।। क
कारादिति। वर्णनिर्देशे हिकारप्रत्ययो विहितः क्वचित्समुदायात्प्रयोगस्तु उच्चैस्तरां वषट्कार इत्या
क्वचिन्निर्देशरूपयत्नसाध्य इति भावः।। आपि पर इति।। एतच्चाकारस्य विशेषणं।। तत्र सामर्थ्यात्।। कका
राकाशभाव्यवायेऽपि भवति।। ननु रथकथ्येत्यादौ त्रिचतुरादिव्यवाये।। अत एव सर्वकादौ आद्याकारस्य
नभवति।। तदप्युक्तं।। अकारस्य कारस्यादापि पर इति।। ककारविशेषणत्वं तु विवक्षितेऽप्यपरा ककार

वा

६२

९१

तत्पूर्वस्यान्तस्यवत्स्यात् ॥ यत्तु प्राचः ॥ आपीति ककारविशेषणं सर्विकेत्यादौ तु एकादेशस्य पस्यान्तिवद्भावाद
कारेण व्यवधानेपि वचनसामर्थ्याद्भविष्यतीति ॥ तन्न ॥ एथकयादावतिप्रसंगात् व्यवहितस्यापि पर
त्वानपायात् ॥ न च निर्दिष्टपरिभाषया निस्तारः ॥ अनुवादपरिभाषाणामनुपस्थितेः उच्यमानस्य विशे
षणाद्यैतिहि तदर्थः ॥ अत्र च उदीचामात इति सूत्रस्यानेन ग्रहणं लिंगं ॥ फलं तु संज्ञायां इकपरिभाषानु
पस्थानात् शालीयादिति सिद्धिः ॥ यदाप्याहुः ॥ आपीति विधीयमानस्येतो विशेषणमिति ॥ तदनित्स्य
वीयः ॥ आपीत्यस्यांगविशेषणत्वं तु अनाशंक्यमेव एथकयापुत्रकाम्येत्यत्रातिप्रसंगात् ॥ शाकेति ॥
पचाय्य चास्य ग्रहणं विस्पष्टार्थं ॥ ककारमात्रस्य प्रत्ययस्याभावादेव तात्स्यालाभात् ॥ पूर्वस्य किं सर्वि
केत्यादौ एकादेशं बाधित्वा कात्परस्य मा भूत् ॥ तस्मादित्युत्तरस्येति परिभाषणात् यत्तु नारीणां दोगमि
तिपरिभाषया एकदेशो बाध्यत इत्याहुः ॥ तन्न ॥ अनुवादपरत्वं स्येव उक्तपरिभाषाया आपीति फलत्वात् ॥
वस्तुतस्तु घप्रत्यये किरतिः सप्तमीनिर्देशाद्वा वाचितः पूर्वग्रहणं च सुत्यज्यं ॥ अत इत्यनपेपरः किं रदाधारवि
कलिभ्यः कः ॥ धाकारका ॥ मामिकेति ॥ केवल मामकेत्यादिना संज्ञाछंदसोर्वेति नियमात् ङीप्रत्यक
स्यपोरिति ॥ उदीचामात इति विकल्पस्यापवादः ॥ दाक्षिणात्यिकेति ॥ दक्षिणस्याम दूरे दक्षिणा आजंतः द

म० २०

दिरगाभवेतिविग्रहः॥ यत्तुदक्षिरगस्यांदिशिभवेतिश्रावाविग्रहीतं॥ नन्वात्यग्विधोऽव्ययसाहचर्याद
जेतस्यैवदक्षिरगशब्दस्यग्रहरगात॥ अन्यथासर्वनाम्नोवृत्तिमात्रइतिपुवद्भावापत्तेः॥ यत्तुसमासेएव
पुवदिति॥ तत्रेतिवक्ष्यते॥ त्यकिकितिचेत्यादिदृष्टेरात् ततोऽज्ञाता यर्थकःकेरगइतेरुस्वष्टाप्॥ हृति
कृति॥ अव्ययात्त्यप्॥ नयास्तयो॥ अत्रन्यासकारःयाहत्येतस्योदीचामातःस्थानेइति विकल्पेप्राप्ते
निषेधोयमिति॥ तन्न॥ आतंस्थानेत्यपशास्येत्भावात॥ यासेति यत्तदोरूपलक्षरगमित्याशयेनाह॥
यत्तदोरिति॥ स्वरूपस्याविवक्षायांफलमुदाहरति॥ यकांतकामिति॥ यासयोरित्यपहायत्यत्तदोरि
त्येवक्तुमुचितं॥ उपत्यकेति॥ उपाधिभ्यात्यकन्नासन्नारूढयोः॥ किपकादीनांच॥ नेत्यनुवर्त्यते॥
क्षिपकेति॥ क्षिपेरिगुपधलक्षरगःकः॥ ततोऽज्ञातादौकः॥ घटभेदनोपचार्यच्॥ ततःकः॥ तारकेति॥
तरतेर्ण्वुल्॥ ज्योतिर्नक्षत्रंनेत्रकनीनिकाच॥ वर्णकाप्रावारविशेषः॥ तंतू नांविकासोतवेऽओरत्र॥
अन्यत्रार्गिकेति॥ अयंविशेषस्यव्याख्यास्त्रोत्रकर्त्रीव॥ वर्तयतीतिवर्तकाशकुनोइत्येवान्यत्र
नित्यमेव॥ पितरस्यानादेयताअपितृदेवता॥ तदर्थंकर्मपितृदेवत्यंदेवतांतात्तादर्थ्येयदितियत्॥ अ
स्तेति॥ ब्राह्मरगायस्यासाअष्टकाइष्याशिभ्यांतकन्॥ अष्टिकानेति॥ अष्टौपरिमारगमस्याःसंख्या

९२

याञ्ञानिशादनायाः कन्॥ अथेगतं स्त्रीत्वमकारेऽध्यारोप्य यक्पूर्वायाः स्त्री लिंगानिर्देशात्स्ते न स्त्रीप्रत्ययो लभ्यत
इत्याह॥ स्त्रीप्रत्ययाकारस्येति॥ सांकाश्यिकेति। संकाशेन निर्वृत्तं नगरं सांकाश्यं॥ वुञ्छण्कठादिसूत्रेण सं
काशादिभ्यो ण्यः॥ ततो भवार्थे धन्वयोपधाद्वुञ्॥ अकादेशः स च सांकाश्यमभवां स्त्रियमाहेति तदकारस्या
पि इत्वं विकल्पेत॥ तस्मादात इत्युक्तं॥ ननु यद्ययमकारो नाकारस्थानिकः एवं स्त्रीप्रत्यय[illegible]स्थानिकोऽन पि ४
पि ह्यङ्ग विकल्पमेतत्॥ अत्राहुः॥ सति ह्यात इत्येतस्मिन् स्त्रीलिंगनिर्देशावलात् स्त्रीवाचक आकारः स्त्री
प्रत्यय एवेति लभ्यते। असति तु तस्मिन् स्त्रीवाचकस्य योऽकार इत्येतावल्लभ्येत॥ ततः सांकाश्यिके
त्यत्रापि ज सज्यतेति॥ अत्रेदं वक्तव्यं यक्पूर्वायाः स्यात इत्युक्ते जागरूकेऽकथमवयवषष्ठीत्वं
स्यात्॥ न च वुञः स्थाने यमिति वाच्यं। अकेति समुदायस्य तथात्वेपि अकाररूपावयवस्य तथात्व
त्॥ वुञो यक्पूर्वत्वाभावाच्च॥ न हि तस्यामवस्थायां यस्येति लोपो लभ्यते। किंच प्रातिपदोक्तस्य स्त्रीप्रत्यय
स्य लाभे भवार्थे विहितस्य वुञादेः प्रसंग एव नास्ति॥ तस्मादात इति स्पष्टार्थमेव॥ आश्विकेति॥ कौमारा
स्तु भस्त्रादिवाक्ये ऽश्वशब्दमपि पठन्तो ऽस्यापि इत्वविकल्पमिच्छन्ति॥ शुभंयातोऽति शुभंयाः विद्य॥ ततः
कः केशाः शुभमिति मांतो निपातः॥ सुष्ठु नयो यस्याः सुनया॥ ततः कः॥ भस्त्रैषा। तदन्तेति॥ आगत्वादिति भा
वः॥ एवं चेति। उक्तं च हरदत्तेन॥ अत्रातः स्थाने इत्येतस्य शब्दस्य विशेषणं संभवव्यभिचारो न च[illegible] काकचोः स

तेः॥ द्वेषयोः संभवोऽनास्ति नान्यत्र व्यभिचारिता॥ सर्वनाम्नः स्वशस्य तेन नायं विधिर्भवेदिति॥ इह
स्वज्ञाद्वस्येत्यस्यानंतरं अत इति शेषः॥ एतच्चेह मूलेपि ध्वनितं। एवं चेहं मंतनो मन्विहितं च रंतं
मुनेर्मनाद्विरिव स्त्रिकायामिति श्रीहर्षश्लोके वैकल्पिकं मितमिति व्याचक्षाणा उपेक्ष्याः॥ इ
ति भावः॥ आत्मीयायामिति॥ आत्मज्ञातिधनेषु स्त्रीत्वमेव नास्तीति भावः॥ यत्तु ज्ञातिधन
योः स्वकाख्विकेति रूपमाहुः॥ तच्चिंत्यं॥ तादृशस्याकारस्याप्रसिद्धेः॥ लिंगानुशासनविरोधाच्च॥ यत्तु स्वकास्वि
का स्वका इत्युदाहृतं काशिकायामुदाहृतं तत्संज्ञाविषयकं न तु ज्ञातिधनविषयकं। यदपि स्वार्थिकाः प्रकृतितो लिं
गवचनान्यतिवर्तंत इति परिभाषामुक्तदपि चिंत्यं। उक्तरीत्या प्रत्ययांतादाप्संभवेपि प्रकृतेरस्त्रीलिङ्गतया आतः स्था
न इत्यंशस्य दुरुपपादत्वात्॥ प्रत्युदाहरणान्युक्तोदाहरणान्याह॥ निर्भस्त्रिकेति। निष्क्रांता भस्त्राया निर्भस्त्रा।
उपसर्जनह्रस्वः टाप्॥ ततो ज्ञातादौ क॥ कृतमत्वेति॥ सूत्रे विकृतिनिर्देशो विवक्षित विषयो न तु मयासयो
रिति वदुपलक्षणमिति भावः॥ स्त्रीलिंगनिर्देशादजादयः स्त्रीलिङ्गा एव गृह्यंते नातो नेह न। शुभ्रोऽज्ञोऽस्या
इति शुभ्रातिका॥ जानातीति ज्ञः। प्रियो ज्ञोऽस्या इति प्रियज्ञिकेत्याति॥ अभाषितपुंविहितविशेषणात्
याव्याख्यायाः फलमाह॥ बहुव्रीहेरिति॥ नित्यमिति॥ अस्य विसर्जस्विकल्पस्याप्रहृत्तेः प्रत्ययस्थादि
त्कत्सर्ग एव प्रवर्तत इत्यर्थः॥ परविशेषणत्वे विकल्पः स्यादिति भावः॥ बहुव्रीहेरित्यस्य सर्वनोपल

श्रणं।तेनाति स्वद्धिकानिषवद्धिके स्यादावपि नित्यमेव।।शेषिकेकपीति।आपोन्यतरस्यामिति ह्रस्व
पक्ष इति भावः।।अभिव्याप्येति।अत एव बकुयुवा शाले यत्र यूनास्ति रूपसञ्ज्ञे नषान्ने ति प्रांच आज्ञ
प्तिरू।।इह वृत्ति कृता सूत्रे सुन्मुक्षिप्त।।आग्नीति।उसमेभवा उल्मादिभ्योऽञ्।नच शाङ्गरवाद्यञ इति
ङीना सिद्धमिदमिति वाच्यं।नच जातेरित्यनुवृत्तेः।।अन्यथा पुयोगे पिस्यात्।।एतेने दाम्ग्रहणस्य
स्वार्थमिति प्राचो ग्रन्थः प्रत्युक्तः।।इहानेकयाक्या।तत्रानुपसर्जनं अणन्त्योऽकारस्तदन्ता दिति
व्याख्याने ह।आपिशलमधीते आपिशला ब्राह्मणीति।अत्र हि प्राग्नाथे ऽण् उपसर्जनं अध्ये
त्रणंतु लुप्तो गुणप्राधान्यान्न प्रत्ययलक्षणं अतष्टाबेव भवति।तोच्चोलि कोलि।।अयं भावः।।
शीलं छत्रादिभ्यो णः इति याण स्तस्मिन्न णकार्यं भवति।।कार्मस्ता च्छील्ये इति ज्ञापकात्।।अ
नेन हि आग्नित अणि विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते।।चौरीति।चुराशी
लमस्याः।।हलस्तद्धितस्य।।उपधाभूतस्येति।।ननु यस्येति चेति यकारस्य लोपे कृते यका
रस्य ई परत्वमस्त्येव किमुपधाग्रहणेनेत्यत आह।।नचाल्लोपस्य स्थानिवद्भावः।यलोपे तन्निषे
धात्।।मेवं।यलोपे कार्ये अल्लोपस्याभीयत्वेनासिद्धत्वात्।अनपत्येति।।यद्यप्यपत्यग्रह

णां कर्त्तव्यमित्येववाच्ये किं तथापि अपत्याधिकारविहितपरं तत्। तादृशश्च गर्गादियञ् एव न तु
देवाद्यञ्। तस्यापत्याधिकारात्प्रागेव पाठात्॥ अत एव भाष्यकृता कञ्जकरपोड्यञ्श्चेति ग-
र्गादिभ्य इत्यधिकारः प्रक्षिप्तः॥ यस्कादिभ्यो गोत्रेऽयञञोश्चेति सूत्रे एवं॥ प्राचां
ष्फ तद्धितः॥ तद्धितस्य ग्रहणं प्रातिपदिकसंज्ञार्थम्॥ ननु तां विना पि शिकरणसामर्थ्यादे-
वङीषु भविष्यति। एवं तर्हि तद्धितग्रहणं इञंतादपि क्वचित् ष्फ इति ज्ञापयति॥ यञंते सव-
र्णदीर्घेणापि रूपसिद्धौ यस्येति चेति लोपस्यानावश्यकत्वात्॥ तेन सुरेरूपसंख्यानमिति वक्ष्य-
माणं सिध्यति॥ आयने॥ फकारादिष्वकार उच्चारणार्थः॥ आयन्नीनो नर्वा ह्रस्य ने त्वं। फिनो नि-
करणसामर्थ्याद्धा। कौरव्य॥ कथं तर्हि यद्यसौ कूपमाण्डूकितं वेलायति कः स्मय इति माघः॥ अ-
त्राङ्गः॥ कौरव्यसाहचर्यादपत्यप्रत्ययान्तस्येवेह माण्डूकशब्दस्य ग्रहणं॥ इह तु मण्डूकस्येयम-
य्येति तस्येदमित्यण्। कुमारीति॥ प्रथमवयोवाची एष शब्दः। न त्वनूढत्वे प्रयुक्तः॥ वृद्धकु-
मारीति तु गौणः प्रयोगः॥ च्वनीकेति। त्रयाणां मनीकानां समाहारः। अत्राजादेराकृतिगणत्वा-
द्वाबिति। च्वनीकाधिकरणो मीमांसकः॥ पचाद्यचि॥ नन्वत्रात्रिगो रिति ङीप्रसङ्गस्तदंतत्वा-
न्नुस्यादेवेति चेन्न॥ ठकोऽयाऽकार इत्याख्यानात्। द्विविस्तेति॥ सुवर्णविस्तो हेम्नोऽक्षेऽस्य मनः॥

शियः॥
२४

94

आचितो दशभाराः स्युः॥ द्विकंबल्येति। द्वाभ्यां कंबलाभ्यां क्रीता द्विकंबल्यमूर्णापलशतं॥ कंबलाच्च
संज्ञायामिति यत्। क्रीतार्थस्य ठञो लुक्। द्व्याढकीति। द्वावाढकौ पचतीति आढकाचितपा
त्रात्खोन्यतरस्यां। द्विगोष्ठंश्चेति खठन्भ्यां मुक्ते प्राग्वतीयष्ठञ्। तस्य लुक्। एतेनाचित
व्याख्याता। काण्डान्तात्॥ षोडशहस्तप्रमाणो दण्डः काण्डः। यद्यपि विशेषणेन तदन्तविधिः
सिद्धस्तथापि तद्ग्रहणमसति क्षेत्र इत्येतच्चुक्तत्वात् काण्डशब्दस्यैव विशेषणं स्यात्तु भत
दन्तस्य तत्श्चेहापि स्यात्। द्वाभ्यां काण्डाभ्यां काण्डपरिमिताभ्यां क्रीता द्विकाण्डी वडवेति
इह तु न स्यात् द्विकाण्डा क्षेत्रभक्तिरिति। अतो तद्ग्रहणं। मात्रच इति॥ यत्तु आचो कां॥
द्वयसचो लुगिति तन्न। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मत इति सिद्धान्तात्। द्विकां
डी रज्जुरिति। नन्विहापि परिमाणत्वात् क्षितिनिषेधासिद्धः। काण्डशब्दस्य आया
मपरतया आ परिमाणार्थत्वात्। पुरुषः सर्वत आरोहतः परिणाहतश्च येन मी
यते तद्धि परिणामो। आढकंकुडवादिति न तु यथाकथंचित्परिच्छेदकमात्रं॥ य।

शु

त्याहुः॥ ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः॥ आयामस्तु प्रमाणं स्यात्संख्या
बाह्या तु सर्वत इति॥ अत एव द्विवस्ताभित्तिरित्यत्र नडीषु॥ अत्राहुः॥ नियार्थे
मिदं॥ क्षेत्र एव नियमो यथा स्यादिति॥ अतो द्विकांडा रज्जुरित्यत्र ङीब्वस्त्रस्य
फलमिति॥ पुरुषात्प्रमाणे॥ यद्यपि पुरुषशब्दो जातिवचनस्तथापि द्वौ पुरुषौ प्र
माणमस्या इति वाक्ये प्रमाणे वर्त्तत एव। प्रमाणशब्द सामानाधिकरण्यात्॥
इत्तौ तु तत्स्वभावादेव॥ तथा च शुल्बसूत्रं। पंचारत्निः पुरुष इति॥ द्विपुरुषा इति
अत्रन्यासकारः॥ प्रमाणे लो द्विगोर्नित्यमिति द्वयसज्जालुग्नि त्साहा॥ तन्न॥ पुरु
षशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणे ल इति श्लोकवार्त्तिकस्य तत्राप्रवृत्ते
रपि हि शब्दादिवत्प्रमाणे प्रसिद्धः॥ तत्रैव तत्स्ववर्त्तनेन तु पुरुषशब्देपि॥ अतो
पुरुषद्वयमित्यत्रापि लुक् स्यात्॥ स्पष्टं चेपुरुषहस्तिभ्यामण् चेति सूत्रे पदमंजा
र्यां नन्वेवं द्वयसज्दघ्नच्यावपि नो स्यातयातामिति वाच्यं॥ ऊर्ध्वमाने मतौ मत्वे ति

शिवः॥

वचनात्॥एवंपुरुषात्प्रमाणइत्यस्यापिसामर्थ्यादेवप्रवृत्तिः॥यत्तुतत्रैवसूत्रेहरदत्तेनोक्तं॥त
स्मादप्राप्तएवात्रलुग्विधीयतइतितदपिचिन्त्यम्मुनित्रयानुक्रमस्यविधानोक्तेर्व्यवहितत्वात्॥
यदपिप्राचीनप्रक्रियाव्याचक्षाणेनोक्तं।पुरुषहस्तिभ्यामण्चेत्यनेनवार्त्तिकान्तरेणलुगि
तितदपिभ्रमसोक्तिमात्रं।उदाहृतसूत्रस्थभाष्यवार्त्तिककाराभ्यामस्पृष्टत्वादित्यास्तांता
वत्॥वस्तुतस्तु।पुरुषात्प्रमाणइतिसूत्रेद्विगोस्तद्धितलुकीत्यनुवर्त्तते।नसामर्थ्याल्लु
गप्राप्तिर्यतेहरदत्तोक्तिरप्येवंपरतयैवकथंचिन्नेयेतिसहृदयैराकलनीयं॥प्र
माणोकि।द्वाभ्यांपुरुषाभ्यांक्रीताद्विपुरुषागोः।तद्धितलुकीत्येव।समाहारेपंचपुरु
षी॥ऊधसोनङ्॥नादेशेनैवसिद्धेऽनङ्करणंधनुषश्चेत्यतदर्थं॥दामहा॥बहु
व्रीहेरितिविशेषणत्वोदेवसिद्धेलग्रहणंस्पष्टार्थं॥संख्यादेरिति॥स्वरितत्वबलादेक
देशएवानुवर्त्ततइतिभावः।केवलमामक॥केवलीरिति॥अध्यस्यामामकीतनू॥
मित्रावरुणयोर्भागधेयी॥अनिषिध्यास्तनवसंलुपापीः॥उतापरीभ्योमघवावि
जिग्ये॥समानीवआकूतिः॥आर्यकृतीस्तुमंगली।त्रिवार्द्धद्रस्यभेयजी॥प्रत्युदाहरणंत्विति॥

यत्तु प्राचा अंतर्वर्तीप [illegible] तिवर्तीति प्रत्युदाहृतं तन्न युक्तमिति भावः॥ व्यस्ते कथमिति।
यत्तु प्राचा समस्तेषु पचार इति वाणि तं तन्मुधेति भावः॥ प्लक्षन्यग्रोधे च॥ एकार आदेशः॥
न तु प्रत्ययः। उत्तरसूत्रे उदात्त इत्युक्तेः। नचेति। अन्यथा इष्वाकपिशाल घावन्ते प्रयाश्च बहु
त्राणुरुरिति मध्योदात्तत्वं प्रयोजयतीति अग्न्यादिषु त्रिषु स्थानेनतरतम इत्येव सिद्धमिति
प्राचां ग्रंथा विरुध्येरन्निति भावः। उदात्ते कार इति॥ मनु शब्दोत्याद्युदात्तः। भृत्स्व स्निह
त्यादेर्मनन्प्रत्यय विधायके सूत्रे धान्ये निदित्यधिकारात् समास निर्देशेन तद्दर्शयति। उ
दात्त इत्यनुवर्त्तमानसंबंधानुवृत्तेरैकारेणैव संबध्यते न त्वौकारेणापीति तत्स्थ्यं यदुक्तं प्राचा
ऐकारौकारौ उदात्तौ स्त इति तदुपेक्ष्यं। मनायीति मध्योदात्तं इत्तरं द्वयमाद्युदात्तं। एना कबुरा॥
वर्णानामिति। एतः शोणः शितिः पृश्निः पृषत् इत्युदाहरणानि। त्र्येणीति॥ अत्रोत्तरपदस्यो
पसर्जनत्वेपि समस्तस्यानुपसर्जनत्वाभिति भावः॥ संज्ञात्वाणां छंदस त्वाद्य॥ क्रमेक इ
ति। अत्र छन्दसीति भाष्यान्ते। लोके गतागतास्तूर्णमसिन्निकानामित्यादि प्रयोगाः ग्रामादि
काः इति प्रांचः॥ वस्तुतस्तु छन्दस्येके इत्यन्वयाद्भाषायामपीति भाष्याभिप्रेतं॥ अन्यथा ए
कग्रहणं न कुर्यात्॥ नहि छन्दसि पलिक्नीरिव युवतयः इत्यादिप्रयोगेषु कश्चिद्विपद्यते॥ वि

शुद्धवाचीति दैर्घ्योधन इतिस्मरणात् । अवदातः सितो गौर इति कोशात्तु विशुद्धत्वसाधर्म्यात्तत्प्र-
योग उपनिबद्ध इति भावः । अन्ते एकस्मिन् लघौ द्वयोश्च लघ्वोः परतो बहुषो बहूच्चके
स्येषु गुरुषु दान्तः स्यात् । अपि त्यच्च प्राचां संज्ञा । कैमलि । खवश्चेति न प्रत्यये कपश्चेति
सोभाद्यालो रोणादिके इलचि च कृते कुत्सके पिलावं तो दान्तो । विज्ञेरादिन्यश्च ॥
श्चन्द्रोद्धो त्र पद्यते । श्वेवाचरति वार्थे णिचः क्विपो वाक्यो उपसर्जनत्वात्तथाष
भावेनिः श्रुनीत्यादिवत् उणि बिति । तत्र णिचि संप्रसारणाणिलोपयोः उक्त
रूपं मुख्यमलेऽद्दुःखं । अन्यत्र त्वा सत्तां कथंचित् ॥ आवपनं चेति द्वि ॥ ओप्य
ते निः क्षिप्यते धान्यमस्मिन् ॥ गोणान्येति । यस्यायाद्दछिकं नाम ॥ अ
कृत्रिमेति । यथा ॥ सेयास्थली यत्र विचिन्वता त्वां मीति ॥ स्थलान्येति
कृत्रिमा पुरुषेण संस्कृता ॥ यथा स्थलया देकं परिग्रह्णाति ॥ आणा पद्धा

अयो विकार इति ॥ कालप्रसिद्धः । कुशान्येति ॥ छंदोगाः स्तोत्रीयागणनार्थमौ
दुंबरान्शंकून् कुशा इति व्यवहरंति । अयः शंकुर्मीति सूत्रे शान्नोत् पायनेति
व्याससूत्रे कुशावानस्पत्यास्थ तामायाते ति श्रुतौ च प्रसिद्धरेवायं । प
तिं वरे ति । तथा च पाणिग्रहणात् कंठाभिधायि त्वान्नुणाव चनो यमिति भा
वः ॥ वक्रादिभ्यश्च ॥ वकुशब्दस्य गुणावाचित्वात् पूर्वेणासिद्धे उत्तरार्थ
मि[illegible]त्याहुः ॥ वस्तुतस्तु वकुशब्दो नित्यं छंदसीत्युत्तर सूत्रं चेति द्वय
पि व्यर्थमेव ॥ सर्व विकल्पानां छन्दसि व्यवस्थितत्वात् ॥ पुंयोगादिति । तथा
च गोणीवृत्तिरिति भावः ॥ यदा तु मुख्यार्थात्तस्य दमित्यण तदा गोणापीत्य
लदेव भवति ॥ योगश्चेह दंपतिभावादित्येके । वस्तुतस्तु संकोचे माना
भावाज्जन्यजनकभावोपि गृह्यते ॥ तथा च भट्टिः ॥ कौसल्ययासाविसुखेव

नरामः आकैकयीतो भरतस्ततो भूत्। ति। कैकयदुहिता कैकयी। जनपदप
त्यादित्य पत्यप्रत्यये तु कैकेयीत्यपि स्यात्। नचतस्याप्यतश्चेति लुक्। न प्राच्यग
र्गादीति निषेधात्। तथा च कालिदासः। कैकेयि कामाः सफलास्तवेति॥ ए
तेन देवकी व्याख्याता। दुष्टो यवो यवानीति। जात्यंतरमेवाज्ञेनाभिधीयते॥
अयमेवास्य दोषः। यदुत यवत्वजातेरभावः। पितृदाकारान्तुच्छोतिः। ङीष्
वाच्य इति। इ ई तृतीये भाष्ये इउ इश्चेति सूत्रे स्थितं। कथमिति॥ यत्तु वदंति॥
दीर्घोच्चारणसामर्थ्यात् आ अनुकूल इति पदे विज्ञेयेते लत्र ईकारादीनामनुकेवसिद्ध
आकारादेशविधानसामर्थ्यात् क्वचिदन्यतापि विधानमनुमीयते। तेन ब्रह्म
णीति सिध्यतीति। तच्चिंत्यं॥ अनुकूल इ अतो गुण इति पररूपप्रसंगात्॥
नन्वकारोच्चारणसामर्थ्याद्दीर्घो न भविष्यति। अन्यथा हि नुकमेव कुर्यात् हि

तिचेन्न। अल्लोपोन इत्यस्य बाधेन चारितार्थ्यात्॥ पत्युर्न इति वद्यदेशे कर्त्तव्ये आग
मलिङ्गकेकारोच्चारणसामर्थ्यादेवाल्लोपो न भविष्यतीति चेन्न। सर्वशब्दे ककार
स्य चारितार्थ्यात्। न हि तत्र लोपोऽस्ति। न संयोगादि इति निषेधात्। तस्मात् कका
राकाराकारयोः सामर्थ्यविरहे पररूपबाधनार्थं दीर्घोच्चारणमावश्यकमिति। एतेन अ
नुकूङ्स्वादिरेव लाघवात् कर्त्तव्य इति हरदत्तोक्तिरपि प्रत्युक्ता। यत्तु इन्द्रमाचष्टे णिः इन्
त्करोतेर्णिलोपे तातङि क्विपि तस्य स्त्री इं ज्ञातीयथा स्यादिति दीर्घोक्तिरिति न्यासकारेणो
क्तं तन्न॥ इङ् शब्दस्य आचष्टे णादावुपसर्जनत्वात् इङ् इः स्त्रीति वाक्यमेव भवति। कर्मण्यणि
ति। तदन्तान्ङीप्। पूर्वपदात् संज्ञायामिति णत्वं वस्त्रक्रीतीति॥ वस्त्रभिस्त्रक्रीत इत्यवस्थायां प्राक् सुबुत्प
त्तेः समासे अदन्तत्वान्ङीष्॥ केचिन्नेति। कर्त्तृकरणे कृत इति सूत्रे बहुलग्रहणात् क्वचित् सुबन्तेन समासः। तत्र
च सुपः प्रागेवान्तरङ्गत्वात् टाप्। ततो दन्तत्वाभावान्ङीषिति भावः। अक्रीति। अयं भावः। बहोर्नञ्वदुत्तरभूमि
न्नेत्युभया। जातिकालसुखादिभ्यो नच्छादनात् क्तोऽकृतमिजनप्रतिपन्ना इत्यादिति बहुव्रीहौ सत्त्वादे [illegible]

तिष्ठतो दान्तविधायकानि। न च जातिपूर्वादित्युक्ते बह्वादिकस्यार्थोऽत्रास्पशति॥ अस्वाङ्गपूर्व॥ पूर्वपदाद्विकल्पस्य व्यवस्थामाह सालाद्यस्वाङ्गपूर्वपदस्योदाहरणान्याह

सिद्धं तन्महत्त्वं नित्यत्वप्रतिपत्त्यर्थं वाज्ञानेरिति वैकल्पिक उदात्तो न तु नित्य इति भावः ॥ सुमुखा शा
लेति । एवं च फलसुखी कारणसुखी वा न वस्त्येत्यादि प्रयोगः प्रमादिक इति वा ध्येयं ॥ उरं क्रोडेति
॥ स्त्रीलिंगोयमिति स्वदन्तादयः ॥ नञोपसर्जनह्रस्वत्वे सति अदन्त्वात् ङीषः प्राप्तिः ॥ अमर
सुननाक्रोडं भुजान्तरमित्याह ॥ रत्नकारस्तु पुंस्त्वमाह । गणेव क्रोडेति प्राप्ति पदिमात्रं पद्य
ते न तु टावं न मिति गणरत्नमहोदधिकारः ॥ एवं च विशेषात् लिंगत्रयस्युदाहरणं बोध्यं
॥ माधवस्तु तुदादिगणे क्रुड निमज्जन इति धातोः नाह क्रोडं चेत्क्रोडा ॥ अस्या तासुरः टावं ते
यं स्वभावतो विशेषविषयः क्रोडादिषु टावेतस्यैव पाठ नाभुजान्तरमात्र वचनस्या क्रोडश
ब्दस्य बहुव्रीहौ स्वांगां त्वाल्लक्षणे ङीषि कल्याणिभ न स्यैव कल्याणक्रोडी कल्याणक्रोडा मयूरीति ॥
ङीषा ङीवादेशः इति ॥ दिक्पूर्वपदादिति पंचम्या ङीषिति प्रथमायाः षष्ठी कल्प्यत इति भावः ॥ य
दि तु स्वनंत्राङी शस्या न हिं प्राग्गुल्फादा वपि प्रसज्येत स्थूलांक पर्युदासस्य निषेधानां नानुरहो
तु गोरुत्वमिति भावः ॥ रवलीति । एकास्यां व्यक्तौ इति रवलत्वे काधिते नदपत्यन्तसहाद्दरादौ
कथं णं विना नस्यासुग्म ह्त्वा दिति भावः ॥ ओपगवीति । अणंत लक्षणं ङीपं परत्वादयं वा

म॰ २॰

२९

घते॥ एवं चापवस्याधिकारस्थौपगवीति प्रतीकमुपादाय टिड्ढाणञ् इति ङीपि विनियाचक्षाणा एतदुपेक्ष्या इति भावः॥
भास्करीत्यत्रेति॥ एवं प्राचो ऽप्युदाहरणं ग्राम्यादिकमिति भावः॥ कुरूरिति॥ लिङ्गविशिष्टपरिभाषया धा
दयः॥ प्राचां तु भ्वांतादिवत्क्रीति सूत्रमुपन्यस्य न्यादिङ॰ प तया पूर्वः प्रातिपदिके तद्धर्मा वाच्यस्तद्वय
वन्द्वा वात्स्यादयस्त्वुक्ताः॥ तत्रेदं वक्तव्यं॥ परं प्रत्यादिविभक्तावेव विधीयते। तथा च न कृ अप्रत्यय इति प्रतिषे
ध एव स्यात्॥ ननु स्वादयः॥ यत्तु व्याचख्युः॥ न्यादिङ॰ प तया पूर्वः प्रातिपदिकं तद्धर्मा वा तस्य
युवत्वेन ग्रहणं तद्वत्तान्तवद्भावादिति यावत् इति तदपि क्लिष्टं स्वपरंपरया विरुद्धं च॥ उक्तरीत्या
ह्रस्वकाकुरुन्यः स्त्यापाद्यपि एकवचनमुत्सर्गतः इति सुभ्यो वर्तते॥ तद्धितप्रत्ययश्च अपत्य इति प्रसज्य
प्रतिषेधाभ्युपगमे प्रवृत्ते दोषः॥ स्त्रूरित्यत्र एकादशाभावात् लिङ्गविशिष्टपरिभाषाया एवा
वश्यकत्वाच्च॥ यत्तु तत्र श्वसुरस्य श्वश्रूरिति निर्देशात् स्वादय इति॥ तन्न॥ निर्देशस्य शब्दपरत्वात्॥ य
थातिपराभ्यां जेः ङ्यं इति वत्॥ श्वशुरस्येति॥ पुयोणल ल्यणो ङीषि प्राप्ते ऊङ॰ तत्संनियोगेन यथि
धीयमानो लोपः संनिहितत्वादं तस्यैव अकारस्य॥ न तु आदेः॥ एतच्च वचनं॥ श्वसुरश्वश्रूरिति निर्देश
सिद्धार्थकथनपरं॥ अतो पि प्रथमाकारस्य लोपो न शंक्यः॥ उपमानवाचि पूर्वपदमिति॥ धात्री
कारा भ्यां करभोपमोरूरित्यत्र तु न॥ करभशब्दस्योपमानवाचित्वे पि पूर्वपदत्वाभावात्॥ शफोरु
रा विति॥ यद्यपि शफ क्लीबे खुरः पुमानित्यमरः॥ तथापि शफशब्दस्य खुरत्वमपि चरुसंमतं॥

शिध॰

२९

शाकाविवजभुराको निजासिद्धस्य नोष्मामस्य शुसंघेष्वनिस्त्र अस्य व्याख्यावसरे न्यासकृद्दत्ता
दिग्रन्थेषु वाचस्पत्यादिनिबंधेषु च प्रयोगदर्शनात्॥ लेगमाशिष्यं लोका अयत्वा लिंग
स्पति भाष्या च्चा शाको भुजो गुदं घोटो नि गणरत्नमहोदधौ क्रोडादिगणपाठाच्च॥ शफः खुरे गवा
दीनां स्मृ लेपि रपि नाम मिषि इति हेमचन्द्रकोशाच्च॥ विश्वकोशे च पुंनपुंसकतोक्ता॥ वामौ सुदरो
उरू यस्याः इति विग्रहे रूरू सर्वत्र उपमानाभावादप्राप्ते विधिः॥ कपंतोऽपि पीवरोरूः पीवतीवा सि
ग्या इति कुमारः प्रमादएवायं॥ संज्ञापूर्वकत्वात्॥ सवृद्धि गुणा नत्यको हिनेन स रुनि समाचा
रितत्त्वयोरिति सुस्यादितः सविनशाद्रस्तु तत्पुरस्य त॥ एकदेशाविर तत्त्वप्रासंगिन प्रहणाद
वासिद्धिरिति भावः॥ अश्वायो कार इति॥ अग्नात् प्रकारविशेषणं किं शूरसेनी जनपदशब्दाद्वि
न्यायोऽप्रतस्थ्यनिलुकि तन्निलक्षणेन ङीष्॥ शार्ङ्गरवीति॥ शार्ङ्गरवशब्दात् अपत्यार्थे ऽण्॥ न
रस्यायोरिति॥ नरशब्दे तत्रेभ्य इति ङीपि नरशब्दात्तल्लानिलक्षणो ङीषि प्रसावचन॥ ननु नरशब्दे
द्वन्द्वलात्यस्यापरत्वेस्मात्॥ यथाड्ः॥ अन्यस्येति यस्याति लोपेनापरत्वात् अनंत्यस्याप्यकारस्य र
हि भवतिस्था नरनम्यात्॥ गुणत्वन्याप्यकल्पनेति॥ परिभाषाबाधस्यैवन्याय्यत्वादिति तत्त्वम्॥ अ
नयस निया गश्चिशाया रूदेरते॥ गत्वेन परामपि यस्येति लोपं बाधित्वा प्रवृत्तौ चित्यात्॥ केचि

म० २०

१००

अस्तु कथंचिन्नलोपस्यापि रेफस्यैव वृद्धिः स्यात् । नन्वकारस्य कस्मान्नांतरतमपरिभाषापेक्षयान्त्यल
न्यपरिभाषायाः परत्वात् ॥ अपि च । आन्तरतमपरिभाषा असमर्थ्यादेशव्यावर्त्तयितुं न तु स्था
निनं नियच्छति तत्कथं रेफस्य स्थानित्वव्यावृत्तिः । किं च गुणोत्वन्यायेनेति न्यायाद्वन्या सन्तं स्थवी
यएव परिभाषाप्रसक्त्योः परस्परं गुणगुणिभावायोगात् ॥ अत्रेदं तत्त्वं ॥ नर इति रांतलक्षणाकार
नुकरणं ॥ नरः अः नरः नाच नरश्च नयोरिति व्याख्येयं ॥ यद्वा नरस्य अः नरः कृतेन वस्य रूप
। नाच नरश्च स्तत्यार्थे नस्योः नरस्य च प्रथम एक अकोरोग हेनेन तु द्वितीयः प्रश्लेषसामर्थ्यात् ॥
अधिकं शाब्दकौस्तुभे बोध्यं ॥ पुत्रशब्दात्र पठ्यते । शोलपुत्री ॥ पुत्री वृकर्षहृदयेन नोति ॥ कुर्वन्तु
वीपतिपुत्रिसर्वं ॥ न च पुत्रशब्दः कन्यायां नास्तीति भ्रमितव्यम् ॥ आत्मजस्तनयः सूनुः सुतः
पुत्रः स्त्रियां त्वमी ॥ आहुर्दुहितरं सर्वेऽपत्यमरोक्तेः ॥ अत एव अन्त्यस्यादितीत्व करणे वा
स्तनका पुत्रिकारस्य कारणमिति वार्त्तिकं तद्भाष्यादिकं च संगच्छते ॥ यत्तु अहरद्दत्तेनोक्तं ॥
केवलः पुत्रशब्दः स्त्रियां न वर्त्तते इति तद्भाष्यादिविरोधादुपेक्ष्यं ॥ इत्थं प्रकरणस्य स्वग्रन्थपूर्विर
धात्वा ॥ इदं तु चिन्त्यं कारसन्यागदस्यैतस्य वेस्तोग्नराजभोनकुलमस्याद्दुहितुः पुत्रः इवेति
वार्त्तिकं किमर्थमिति । यत्तु वदन्ति ॥ स्वार्थमिति । तन्नादित्वा हरिपिरतेतदान्तनिरस्तिस्वरेण

शिवः

१००

100

दात्तः ङीनंतेनतत्पुरुषेपिसमासस्वरेणांतोदात्तत्वे इतिस्वरभेदाभावात् ॥ यदपिशार्ङरवादौपुत्रशब्दः प्रदित्र
न तु सौत्रदायिकइतितदपि न ॥ उदाहृतप्रयोगविरोधात् ॥ वास्त्विति केत्यादिवार्त्तिकेकैयटहरदत्तादि
ग्रंथाकारप्रश्लेषविरोधाच्चेन्यास्तांतावत् ॥ प्रवक्ष्यते ॥ वृद्धत्कालेतिष्यङ् ॥ कारीषगंध्येति ॥ करी
षस्येवगंधोस्यकरीषगंधिः ॥ उपमानाच्चेतिगंधस्येदंतादेशः तस्यगोत्रापत्यंस्त्रीतिप्रणञ् आर्षात्रिणो
रितिष्यङादेशः सवयस्थपिस्त्रियामेवविहितस्तथापिङित्करणसामर्थ्यात्तदंतादप्ययंचा
प ॥ पौतिमाष्येति ॥ पूतिमाषस्याप्यपत्यंगर्गादिः ॥ तद्धिताः ॥ बहुवचनमनुक्तानांमुपसंख्येयानां
संग्रहार्थम् ॥ महासंज्ञाकरणमन्वर्थत्वायतेभ्यः प्रयोगेभ्योहितास्तद्धिताइतिगतेनयथाभि
धानमेवस्युः ॥ स्यादेतत् ॥ टापः प्रागयममधिकारोस्तुप्रकृतिविधौतद्धितग्रहणंयस्येतिलोपेईग्रहणं
मास्त्विति चेत् ॥ मेवं ॥ पद्धीत्यत्रअणुग्रहणप्रसंगात् ॥ शार्ङ्गंतादिति ॥ योतिमिश्रीकेशान्तिपर्त्यप्रतिमु
ततेः केचित्तुवाकुलकात् यौतेरौणादिकंकतिप्रत्ययंवदंति ॥ उभयथापिस्तुवतीनांसमूहोयौवतं
त्यंतानाहुत्प्राणिष्ववज्ञावात् ॥ यौवनमित्येव ॥ भिक्षादिपाठसामर्थ्यान्नपुंवादितिवृत्तिस्तुभाष्यवि
रुद्धा ॥ भाष्येतन्यायस्यप्रन्याख्यानादितिदिक् ॥ ॥ इतिस्त्रीप्रत्ययाः ॥ ॥ मात्रशाद्रस्येति ॥ त

सद्यावधारणमर्थेः ।। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः ।। प्रातिपदिकादित्येव तन्मात्रमिति एवकारेण
स्वपदविग्रहः ।। मयूरव्यंसकादित्वात्समासः ।। इत्यमरः ।। यद्यपि नीलरूपवत्परोपमनियतलिंगस्य
यापि वासुदेवेन भगवति नियतपुल्लिंग एवेति भावः ।। ज्ञानमिति ।। भावे ल्युट् ।। ज्ञेरणइति ।। नच
प्रातिपदिकार्थमात्रे प्रथमेत्यस्त्विति वाच्यं ।। तथा सति परिघेद्युपरिच्छेदकभावस्य संसर्गविधया
भानायोगात् ।। नामार्थयोरभेदसंसर्ग एव व्युत्पत्तेः ।। नचाषष्ठ्यर्थे बहुव्रीहौ व्यभिचारः ।। एका
र्थीभावाभ्युपगमात् ।। नापि निपातार्थसंख्या द्योतकानाभ्युपगमात् ।। नचासिद्धान्तेपि प्रकृतिप्र
त्ययार्थयोरभेदान्वयो दुर्लभ अन्यत्रादृष्टत्वादिति वाच्यं ।। देवदत्तार्थकतद्धितादौ दृष्टत्वादिति
भावः ।। वचनं संख्येति ।। तथैव प्राचां व्यवहारात् ।। इहसूत्रे अर्थे लिंगे च प्रथमेत्येतावदेव सुवचं
।। इतरत्सर्वं त्यक्तुं शक्यं ।। तथाहि ।। अर्थे प्रथमेत्युक्ते कस्यार्थ इत्याकांक्षायां यस्मात् स्वादि
यस्तस्येति लभ्यते एवं स्वादयः प्रातिपदिकलिंगप्रत्ययविशिष्टार्थे विधीयन्ते ।। तदर्थं वचनेते
नियतोपस्थितिकत्वमेव ।। एवं च मृडानी हिमानीत्यादौ पुंयोगमहत्त्वादेः पि[illegible]नियतभानेन
प्रथमा सिध्यतीत्यपरमनुकूलं ।। यथान्यासेतु सानस्यात् ।। यद्यपि अर्थे शब्दे [illegible] विषयपरः । २

वैयाकरणसुंदरः इत्यन्ये

प्राक्प्रकरणोक्तमत्र स्यादेइति भावः ५

परमतेइतिशेषः ।। यस्य कुमीमांसकाः ।। आमिक्षां देवतायुक्तां वदन्त्येवेष तद्धितइति ६

प२

त्तिस्तु शक्तिर्लक्षणा वा ॥ गौरस्ति तुल्लक्षणां तत्र मूलाभाव एवास्तु ॥ त्रिकं च प्रातिपदिकार्थ इत्याद्यीयते तेन तल्लिंगे
नापि मास्तु ॥ लक्ष्यार्थविशेषित्वेऽपि न क्षतिः नियमाभावात्प्रयोगात् ॥ तथा च ॥ अर्थे प्रथमेत्यत्र वक्ष्यामः ॥ द्रोणो
व्रीहिरित्यापि द्रोणशब्दस्य तत्परिमिते उपचारात्सिद्धं ॥ गौर्वाहीक इतिवत् ॥ एकोऽद्वितीयोऽपि नैकव
चनप्रकृतिः प्रयोक्तव्येति निषेधादेव सिद्धं ॥ अनन्वितार्थकप्रयोगापेक्षया अनुवादकमात्रप्रयोग
स्य न्याय्यत्वात् ॥ एवं मात्रग्रहणमपि स्वार्थसंबोधने चेति ज्ञापकेन कर्माद्याधिक्यप्राप्तप्रथमाया व्य
वृत्तेः ॥ यत्तु प्राचां प्रातिपदिकार्थः सत्तेति ॥ यच्च व्याख्यातं यार्थः सान्तैव केवलं भासते न जा
त्यादिरूपो न लिंगसंख्याकारकयोगी यथा ग्य र्थेया ॥ अव्ययार्थो हि केवलमस्तीशक्यते वक्तुं न
पुनरीदृशार्थेदृशशब्दे ॥ तत्र ॥ उच्चैर्नीचैरित्यादिशब्दानां सत्त्वाकारकप्रतीतिजनकत्वस्य सर्वतंत्र
विरुद्धत्वात् ॥ अस्त्यादिसामानाधिकरण्यस्यापि असत्त्वार्थकेषु दुर्लभत्वात् ॥ न लिंगसंख्याकार
कयोगीति चायुक्ति विरोधाच्च ॥ पदान्तरोपस्थापितस्यास्ति सामानाधिकरण्यमस्तीति चे [illegible] त्ता न
स्य अव्यवस्थितकत्वात् ॥ न पुनरित्यादिवाक्यशेषविरोधाच्च ॥ रहमः उच्चैरित्यादावव्याप्तिश्च ॥ न चालि
ग्यग्रहणात्तत्सिद्धिः ॥ मात्रपदे नाधिक्यव्यवच्छेदात् ॥ यदपि प्राचा व्याख्यातं अत्र रथ्यादिः आयस्तं न

तिद

त न नानपेक्षया शब्दप्रवृत्तिः सः सर्वत्र प्रातिपदिकार्थः शब्दप्रवृत्तिनिमित्तमिति यावत्॥ यथा उच्चैर्नीचैरिति॥ अलिंगासं-
ख्यावतो केवलं जात्यादिनिरपेक्षं स्वार्थमाहुरिति॥ तदपि न॥ प्रवृत्तिनिमित्तं हि प्रकारीभूय [illegible]मासेत तथा च
तन्मात्रबोधासंभवात्॥ यदि सोऽपीष्टस्तर्हि घटादिशब्देभ्योऽपि स्यादिति संख्याकारकाद्यनन्वय एव स्यात्॥ यद-
पि द्रोणपरिमितं व्रीह्यादि द्रोणशब्दः स्वाम्यमित्याभिसंबधात्प्रवर्तते॥ तत्र गौणमुख्यन्यायात् न प्राप्नोति परिमा-
णग्रहणमिति॥ न च॥ पदकार्यविषयोऽयं न्यायो न प्रातिपदिककार्यविषय इति सिद्धान्तितम्॥ अन्यथा सिंहो माणवक इत्य-
त्रासिद्धिप्रसंगाच्च॥ यदप्याहुः॥ द्रोणादयः शब्दा लोहदारुमयं पात्रपरिमाणमेव न व्यभिचरन्ति॥ परिमेयं तु व्य-
भिचरन्त्येव॥ अतस्तत्र प्रातिपदिकार्थत्वाभावात् प्राप्तपरिमाणग्रहणमिति॥ तदपि न॥ गौणलाक्षणिकेषु सिं-
हो माणवकः मंचाः क्रोशन्तीत्यादिष्वव्याप्त्यापत्तेः॥ तत्र विशेष्यस्य माणवकादेर्भेदेऽपि सिंहसदृश इत्यर्थे [illegible]को-
[illegible]पां नियतत्वात् पास्थितिका एवेति यदि तर्हि व्रीह्यादेर्भेदेऽपि द्रोणपरिमितत्वान्नियततया एवेति तुल्यं॥ संबोधने च॥
मात्रग्रहणात् संबोधनाधिक्ये न प्राप्नोतीत्यारंभः॥ इह संबोधनं प्रत्यर्थप्रतीति विशेष्यक्रियां प्रतिविशेष-
णमिति सिद्धान्तः॥ उक्तं च संबोधन[illegible]पदं यच्च तत् क्रियाया विशेषणम्॥ व्रजानि देवदत्तेति नि-
घातोऽत्र तथा सतीति॥ एवं च राम मां पाहीत्यत्र वाक्यस्य रामसंबंधि संबोधनविषयो मत्कर्मकं रक्षणमर्थः॥

इति प्रथमा ॥ कर्तरीति न न म कर्म ॥ कर्तरीति कस्य च वर्तमान इति कर्मणि षष्ठी प्राप्नोति ः संनन्तान्मन्निबुद्धि
इच्छार्थेभ्यश्चेति वर्तमाने क्तः ॥ मतिरिच्छा न तु बुद्धिः पुनर्बुद्धिग्रहणात् ॥ एवं च कर्त्ता ग्रामं गमिष्यमाणं क
र्मत्वयमर्थः ॥ कर्त्ता च यथा स्वपातव्यापाराश्रयः स च के नापुं मिषन्तीत्याकांक्षायां विशेषणीभूते
न व्यापारेणान्वयो लभ्यते ॥ तदुक्तं तदाह ॥ क्रियया येति कश्चान्वयेन ॥ [illegible]
१ स्थित वर्त्तमानत्वं न इच्छ विवक्षितं तेन कृतवान् करिष्यतीत्यादि सिध्यति ॥ कारकाणीति ॥ एत
च कारके इत्याधिकारसूत्रात् लभ्यते ॥ तत्राहि व्यत्ययेन प्रथमार्थे सप्तमी ॥ प्रतिसूत्रं च वाक्यं भित्वा
कारकसंज्ञा विधीयते ॥ तद्यथा ॥ अपायेध्रुवं कारकसंज्ञं स्यात् ॥ तदपादानमुक्तं कारकमपा
दानसंज्ञं स्यात् ॥ पुनः कारकशब्दानुवृत्तिसामर्थ्यादिह विशेषसंज्ञाभिः सह समावेशः अन्व
र्थाचेयं संज्ञा करोतीति कारकमिति ॥ तेन क्रियान्वयिनो न भवन्तीति ॥ ब्राह्मणस्य पुत्रं पन्थानं
पृच्छतीति ॥ इह हि ब्राह्मणः तु अविशेषणं न तु क्रियान्वयी ॥ यद्वा ॥ कारकशब्दः क्रियापरः करोति
कर्तृकर्मादिव्यपदेशानिति व्युत्प[illegible]त्तेः ॥ तथा च अपादानादिसंज्ञा विधौ क्रियायामित्यस्योपस्थि
तौ क्रियान्वयिनामेव नन्वत्र संज्ञा विधीयते ॥ कारकाद्दत्तश्रुतयोरित्यादौ कारकशब्दः स्वर्यते ने

प्र॰ २॰
१०३

नह्यधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते। अस्मिन्पक्षे वृत्तावपि कारकमित्यस्य क्रियान्वयीत्यर्थः॥ अथ
पक्षे तु कारसंज्ञं स्यात्॥ तत्त्व कारकं कर्मसंज्ञं स्यादिति व्याख्येयं॥ अनभिहिते॥ ननु वह्रूपद इत्यादौ
बहुचाउ कार्थत्वाद्यथा क्लृप्त बोधायान एवं क्रियन्ते कट इत्यादावपि तिङादिभिरुक्तार्थत्वाद्द्वितीया
न विषयतेति किं च कटं करोतीत्यादौ सावकाशा द्वितीया कृतः कर इत्यादिषु प्रथमया बाध्यते तनि
रवकाशत्वात्॥ न च रं दतः प्रवृत्तत्वादिरवकाशः॥ तत्रापि प्रतीयमानामस्ति क्रियां प्रतिकर्मत्वेन तृ
तीयाप्रसंगात्॥ अथ नीलमिदं ननु पद्ममित्यादौ विशेषणान्तरनिरपेक्षितात्पर्यके प्रसिद्धक्रिय
याप्रनाव स्यकत्वात् प्रथमायाप्रवकाशं वृषे विप्रतिषेधात्प्रथमास्तु॥ एवं चानभिहिता
धिकारोरयाचे तःभेवासंख्याविभक्त्यर्थे इति पदे सत्राराभात्॥ तथाचानभिहितकर्मणि यदेकत्वं तत्र
द्वितीयैकवचनामित्यर्थः॥ सत्रानारंभे च कर्मणि यदेकत्वं तत्र द्वितीयैकवचनममिति स्याद्व्याख्या
र्थः॥ तथा सति कृतः कट इत्यादौ च तेन कर्ममात्रोक्तावपि तदेकत्वस्यानुक्ततया अम् दुर्वारः॥ परत्वात्प्र
थमवाधेन कर्तृस्य कट इत्यादौ तत्रापि परत्वेन स्याद्योगलक्षणषष्ठीप्रसंगात्॥ कारकविभक्त्यर्थ इति पदे तु सू
त्र[illegible]त्वात् मा करो॥ हरिं भजतीति भजेन क्रियया हरौ प्रीतिरुत्पाद्यते इति विशिष्टतया क्रियाव्याप्यत्वे नउ

हिं
शिव॰
१०३
103

तिः कर्म्मतो विशिष्टं भजनं वाक्यार्थः ॥ हरिः सेव्यत इत्यत्रापि समेव ॥ क्रियाप्रधानमाख्यातमिति सिद्धान्तात् ॥ धा
त्वर्थस्य तां क्रिया तिङर्थं प्रति विशेष्या न तु तदर्थं प्रति विशेषणमिति तस्यार्थः ॥ अत एव पाचक
व्रजतीति चैत्रः पचति व्रजतीति नैकवाक्यं ॥ पाककर्तृकं गमनं स्यात् पाचक इत्यादेरर्थः ॥ एककर्तृकापि
क्रिया पचति व्रजत्योः पृथगेवार्थः ॥ एवं च प्रथमान्तविशेष्यकबोध इति नैयायिकाद्युद्घोषो भाष्याद्य
नुसारिभिर्नादर्तव्यः ॥ यास्कोप्याह ॥ भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति ॥ पश्य मृगो धा
वतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रियायां कर्म प्रधानं दृशिक्रियैव ॥ उक्तं च सुबन्तं हि यथानेकं ति
ङन्तस्य विशेषणं ॥ तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति ॥ एवं च पचति भवतीत्यस्य पाकानुकूला क्रिया
भवतीत्यर्थः ॥ अयं तु विशेषः ॥ तिङन्तोपस्थितायाः क्रियायाः क्रियान्तरं प्रति विशेषणत्वेपि शाब्दबोधा
हारवादे कत्वं संसर्ग एव न तु प्रकारः ॥ अपदार्थत्वात् ॥ अर्थाध्याहारवादे तु प्रकारकत्वेपि स्पष्टा प्रतीतिः ॥
पचतीत्यादौ धात्वर्थफलस्यापीत्थमेव मतभेदेन व्यवस्था ॥ अत एव न सामानाधिकरण्येन भवान् प
चतीत्यादौ द्वितीयैकवचनोत्पत्तिः ॥ अग्निष्टोमेन यजेतेत्यादौ तृतीयोत्पत्तिश्च संगच्छते ॥ न च स्थ
ते विशेष्यसमर्पकात्प्रातिपदिकोपि विशेषणसमर्पकात्वकर्मत्वादिवाचिकायाः सुब्विभक्तेः प्रयोगे
स्थिति वाच्यं ॥ धातुतिङोः तयोरप्रातिपदिकत्वात् ॥ नैयायिकानां तु स्याद्दोषः दोषः ॥ तथाहि धात्वर्थ

मं ५

हरिणा ति शेषः ॥

वर्तमानत्वाभावा
ल्लोकप्राप्तिरिति भा
व:॥५

मृगं पश्यतीति वत्तथा वृत्तिमृग॥मित्यपि स्यात्॥नच प्रथमासामानाधिकरण्येन शतृशानचोर्नित्यत्वात्
नेवं प्रयोग इति वाच्यं॥एवमपि द्वितीयानुपपत्तेर्दुरुपपादत्वात्॥ननु तत्र वाक्यभेद एव॥पश्यन्त्येतत्
मिति कर्माध्याहारात्॥पचति भवतीत्यादि तु पाको भवतीत्याद्यर्थे अनिष्टमेव नि चेत्॥मैवं॥अध्याहा
रगौरवात्॥तस्य च मुनिवचनविरोधेनाप्रामाणिकत्वात्तत्वदीपानिष्टाभावात्॥अस्याकिंत्कारत्वात्तेऽपि
कर्मणि पाहीद्वं वदतो वेहि इत्यादौ द्वाहादे: प्रसंगाराव नास्ति एकवाक्यत्वं च भाष्यवार्त्तिकादिकसक
लसंमतं न चेति इतस्थले क्रियाविशिष्टक्रियांतरबोधो न जायत एवेति वाच्यं तथैव व्युत्पत्त्यां
तात्मा दृशाबोधस्य दुर्वारत्वात् ईदृशार्थे साधुत्वं नेष्टमित्यपि न।साधुत्वानुशासनार्थप्रवृत्ते
रेव तत्स्वीकारात् धातुसंबंधाधिकारसूत्रादि तेषु रोमवस्कंद त्यादौ तस्यावश्यकत्वाच्च ननु
सिद्धे तेऽप्याख्यातवाच्यक्रियायाअपि कर्तृत्वकर्मत्वस्वीकारे तस्याप्रसत्त्वरूपात्वं भज्येत इति
चेन्न लिंगसंख्ययो: कर्तृकर्मेतरकारकस्य च भावमात्रेणान्वयात्त्वोपपत्ते: कर्मत्वस्य च का
रत्वानत्युपगमाद्बहुत्यन्यत्र विस्तर:॥अभिहित इति नन्वेवं पचमोदनमुक्तेइत्यादि द्विती
यानास्यादिति चेत् मैवं रहिपचि भुजि निरूपितेन द्वकर्मत्व शक्तौ नत्वेवं तत्र प्रधानं क्रियानिरूपिता
अनभिहितां शक्तेमाश्रयाद्वितीयोत्पत्ते: उक्तं च हरिणा प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययो: पृ

रुत्तिर्लंबषष्ठ्यर्थश्च तथा क्रिययोरित्यत्र
निरूपितत्वं षष्ठ्यर्थ:॥१॥

थकः। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥ प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते॥ यदा गुणे तदा तद्वदनुक्ता
पि प्रतीयते इति। अत एव पक्वोदनो भुज्यत इत्यत्र भुजिप्रत्ययेनाभिहिते प्र[illegible]थमेव पचेरप्राधान्यात्॥
वस्तुतस्तु पक्वा भुज्यत इत्यादौ कर्मणः पचिभुजिभ्यां न युगपद्वान्वयः किन्तु अन्यतरेणाशाब्दः
अपरेणार्थः। तत्र च प्रथमा द्वितीये व्यवस्थिते एव॥ तद्यथा॥ पक्वा भुज्यते ओदनः। किं पक्वा अर्थादोद
नं। यदा तु ओदनं पक्वा भुज्यत इति प्रयुज्यते तदा भुज्यत इत्यत्रार्थादोदन इति गम्यते। एवञ्च विव
(शक्यते ई) क्षाभेदेन घूजयितुं हरिहरिं वेत्युभयं साधु। आख्यानमन्वइति॥ आनंदकर्त्तृकप्राप्तिकर्मीभूत इत्यर्थः
यदुक्तं प्रायेणेति तस्य फलमाह॥ क्वचिदिति। विषयहृष्टा इति॥ यदि तु वर्द्धिछिद्योरन्यतरेणा सह कर्म
तयान्वयो विवक्ष्यते तदा द्वितीयास्यादेवेति ध्येयं। तदास्पष्टतेति॥ यथास्पृश्यमानस्य गंगादेरीक्षि
तस्य क्रियया योगः। तज्जन्यसंयोगादिफलाधारत्वात्। तथैवानीप्सितस्य तृणादेरपीति भावः। स्यादे
तत्॥ धात्वर्थस्थाप्यफलशालिकर्म्मीभवास्तु किमीप्सितानीप्सितयोः पृथक्कथनेनेति चेत्र॥ मैवं॥
अग्नेर्माणवकं वारयतीत्यत्र वारणार्थानामिति सूत्रेण माणवकस्यापादानत्वप्राप्तं तद्बाधमाय कर्तु
रीप्सिततममिति वक्तव्यमेव। एवं च द्वेष्योदासीनयोः संग्रहार्थं तथायुक्तमित्यस्याप्यावश्यकत्वात्॥
अनीप्सितग्रहणं तु स्पष्टार्थमेव न त्वावश्यकं॥ इदं च वध्येयं॥ ईप्सितानीप्सितयोः शाब्दबोधरेकरूप
एव। ईप्सानीप्सादेः घिशीज[illegible]दिवत्संज्ञाप्रवृत्तावुपयोगे पि द्वितीयावाच्यकोटावप्रवेशात्। अनन्यल

स्येवशब्दार्थत्वात्॥ कर्मणि द्वितीयेति सूत्रे हि तत्तत्सूत्रैर्विहितानां कर्मसंज्ञा विहिता ते सर्वे तेन रूपेणोपस्थिताः
तेषु च वि[illegible]धीयमाना द्वितीय आधारवाचिका लाघवात्। क्रियायां धातुना कर्तुश्च देवदत्तादिशब्दैर्लाभात्।
द्वितमत्वादेस्तु [illegible]नाभावात्। प्रकृतिप्रत्ययार्थयोश्चाभेदेन संसर्गः। तथा च हर्यादिकायां प्रीतिस्तदनुकू
लो व्यापारो वा कार्यार्थः॥ यद्यपि कर्मणि कर्त्र्यधिकरणे च विहितानां द्वितीयादीनामाधारोऽर्थ इति तुल्यं तथापि
तन्निरूपकफलं व्यापारश्च स्वाश्रयद्वारा तदुभयं फलीभूत शाब्दबोधे वैलक्षण्यं संगच्छते। न चाधारत्वेन वा
च्यतिमतम्। तन्निष्ठधर्मस्य वाच्यतावच्छेदकत्वापत्यातिगौरवात्। कर्मणि द्वितीयेत्यादिसूत्रस्वरसभंगा
पत्तेश्च। अत एव भाष्यकार आह॥ सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङामिति। न च तिङ्क्ष्वपि धर्ममात्रमर्थः। कृ
त्तरि कृत्तुलः कर्मणि च तयोरेव कृत्यक्तखलर्था इति सूत्राणां वैरूप्यापत्तेः॥ पाचको देवदत्तः पक्व ओदन इत्यादौ
सामानाधिकरण्यानुरोधेन धर्मिवाचकतास्वीकाराच्च॥ तस्मादिह घटादिशब्दानामिव विशिष्टमेव वाच्य
मावृत्याधिकरणेऽभ्युपगते तु कृत्स्वपि धर्ममात्रं। सर्वथापि नैयायिकमीमांसकाभ्युपेत धर्मजरतीयं हे
यमेव। न हि तिङ्कृत्तद्धितलक्षणायां स्वरूपपादे। प्रपञ्चितं शाब्दकौस्तुभेऽस्माभिरित्यलं मियता। परिगणनमिति॥ तेन न
दस्यस्वरणोतीत्यादौ नातिप्रसंग इति भावः॥ गां दोग्धीति। गोसंबंधि पयः कर्मकं दोहनमर्थः। स्यादेतत्॥ कर्तुरी
प्सिततमं कर्मेत्यथायुक्तं चानीप्सितमिति गवादीनां स्पष्टमेव। अत एव द्विकर्मणो कर्तु[illegible]णो कर्मत्वस्य न्यायसिद्धत्वात्
गत्यादिसूत्रं प्राचां नियमार्थमिति सिद्धान्तः॥ अत एव चाकथितसूत्रेऽपादानमुख्यगुणिगां दोग्धि पय इत्यत्र परत्वात्क
र्मसंज्ञेति भाष्यं संगच्छते। पञ्चकं प्रातिपदिकार्थ इति पक्षेऽवधित्वफलाश्रयत्वयोर्गुणबाधविवक्षायां चेदवधित्वं ता
यागोस्त्विति यः पयः करणानुकूलो व्यापारस्तद्विषयगोपनिष्ठप्रेरणा ते त्यर्था तत्तथा च अकथितं चेति सूत्रं व्यर्थं

५ तिसूत्राभ्यां गतार्थमेव तत्। तथाहि। त्यजेनोपसर्जनत्यागं मेदुहेरर्थः। दापनमंगीकरणं च याचेः। विक्लेदनं पचेरित्यादि। एवं च धातूपात्तव्यापार वि

चेति५ वैद धा३ का७

मितिचेत्। अत्रोच्यते॥ कर्मणः शेषत्वेन विवक्षायां तथा गौणस्य मुख्याद्यभावादिति वत् षष्ठी प्राप्ता तां बाधितुमिदं सूत्रं। तथा च दुह्यादीनां षष्ठीवत् द्वितीया संबंधमात्रे
द्वितीयार्थ इति स्थितं। अपादानत्वमात्रविवक्षायां तु पञ्चम्येव गोः क्षीरं विशेषणत्वे तु षष्ठी। तेन गोः पयो दोग्धीत्यपि साध्वेव एवमग्रेऽप्यूह्यं।

शानुशिष्टकर्मसु कुः॥ नीहृकृष्वहां दंड्यादिग्रहमुपलक्षणं कर्मभाजामिति॥ अत्रेदं वक्तव्यं॥ ग्रहः पाठो निर्मूलः॥ अप्र
हृष्ठनरूपाक्रमित्युदाहरणमप्ययुक्तं॥ इतरथानुद्विकर्मकत्वं यद्यपि प्रामाणिकं तथापि संदर्भोऽशु
द्धः॥ तथाहि दुह्यादीन्नयादींश्च द्विराध्ययनेन पठित्वा भावकर्मप्रक्रियायां शेषेलः इत्युक्त्वा लर्याः किं
द्विकर्मकेभ्यो मुख्ये कर्मणि लस्तु गौणे इति त्र्याकांक्षायां स्वयमेव पठितत्वात्यादयो लंपते निष्कर्मणस्त्वध
मुख्यकर्मणि॥ प्रत्ययानितदुहादिगौणे नेतु यथारुचीति॥ एवं च दंडिमथिभ्यामपि मुख्ये स्यात्॥
तथा च गर्गाः शतं दंडनामिति भाष्योदाहरणोन॥ शतं स्वत्र प्रधानेन गर्गाः अर्थिन स्वराजानोहि
रणेन भवंतीति आक्रोशात्॥ दंडिस्त्विह स्वरूपार्थो न तु नियमार्थः अनरवस्यत्र समुदाये वाक्य
परिसमाप्तिः गुणानुरोधे प्रधानादेतरसंभवात्॥ तथा मथेरपि प्रधाने स्यात्॥ इष्यते तु गौणे॥
तथा च भारविः॥ येनापविद्धसलिलस्फुरन्नागसद्मादेवासुरैरमृतमंबुनिधिर्ममंथे इति। अत्रा
मृतं मुख्यं तदुद्देश्यत्वात्॥ अंबुनिधिस्तु कारणः॥ यदपि व्याख्यातारः आहुः॥ द्विकर्मकेषु पचेरप्रा
माणिकः पाठ इति तन्न भसात्। तथा हि कर्मवत्कर्मणेति सूत्रे तु हि पच्योर्कर्तृत्वे सकर्मकयोरिति
वार्त्तिके तन्नभाष्ये पचेर्द्विकर्मकत्वं लभ्यते कैयटहरदत्ताभ्यां तत्रैव स्फुटीकृतं॥ माधवाप्या

१०४

म॰ र॰

१०६

ह॥ जयतेः कर्षणे मर्दे इत्यतेः पचेरित्यादि उदाजहास तं तु लाभोदनं पचतीति॥ यत्तु अकथितं चेति स
त्रे हरदत्तेनोक्तं॥ अकथितशब्देन प्रधानार्थो गृह्येत न तदा पाणिनाकांस्यपात्र्यां दोग्धि पयः
न्यत्र पाणिकांस्यपात्र्योरपि स्यात॥ कारकाधिकारान्ययोस्तु पचेत्यादिरवकाशः॥ नहि तत्रा
स्य वसंयोगो दुह्यादावपरिगणनादिति तन्मतेनान्तराभिप्रायेण॥ अन्यथा तु दाहृतमस्य परस्त्र
यविरोधादित्यालोचनावतो ज्ञानं जयतीति॥ जिस्त्रभिभवे यत्तु जिजयेरिति व्याख्यानं तत्र
तस्याकर्मकत्वात्॥ यद्यपि जयस्तादयो भाष्ये न पठितास्तथापि चकारेण समुच्चयन्त इति कैय
टः॥ अर्थनिबंधनेयं नतु स्वरूपाश्रया॥ अस्मभपीदम बोध्यं बोधयतीति काजस्त्र भाष्ये
[illegible] पेर्वि पर्यायस्य तु दरोपि द्विकर्मकत्वदर्शनादिति भावः॥ नपावभद्रिः॥ स्याहतु रणे
रणमुखे जगादमारीचसुतेर्वचनं महार्थं॥ कालिदासोपि॥ शिलोच्चयोपि क्षितिपालमुच्चैः प्री
त्यातमेवार्थमभाषतेव॥ देशा इति॥ कुरुपंचालादिरवगम्यते॥ तेनाधिशीङ्स्थासामित्यादे
रेवग्रहणात्॥ तेन न घरमास्त इत्यादि न भवति॥ यत्तु भाष्योक्तं॥ अकर्मकधातुभिर्योगे देशः का
लाध्वभावभ्यो द्वितीयेति केचित्। नदीमास्त इत्यादि। अत्रेदं वक्तव्यं॥ कर्मसंज्ञायामनुक्तत्वा

भारविश्च॥ उदाहरन्ते नागिरिभित्तुसारां है पायसेनानिरये नरे नु इति॥ एवञ्च नाथयाचयोव इवापि द्विकर्मकाबोध्यौ॥

तद्

ढिव४॥

कर्मण्यणादयो न स्युः ॥ आस्यते मासः सुप्तिर्यथा कोदिति सङ्गतं ॥ द्वितीयायाभाष्यसंमतत्वात् ॥ न
दीमित्युदाहरणमप्यसंगतं ॥ ग्रामसम्पत्कुर्वादिरवेदकः ॥ न तु प्रदेशमात्रं तेन ग्रामं स्वपितीत्य
त्र न भवतीत्याकरात् ॥ अध्येति चन्द्रेण ॥ अध्यानं स्वपितीत्यस्यापि प्रसंगात् ॥ अत एव व्याकरे अध्व
गत्वत्वेन प्रसिद्धेर्नियतपरिमाणः क्रोशादिरिति व्याख्यातं ॥ गतिबुद्धि ॥ प्रत्यवसानं भक्षणं ॥
शब्दकर्मणामिति ॥ शब्दः कर्मकारकं येषामित्यर्थः ॥ नन्विह कर्त्तरि कर्मव्यतिहार इतिवत कर्मश
ब्दः क्रियापरः ॥ स्वचिमे कार्यसंभवात् ॥ कर्मग्रहणसामर्थ्याच्चान्यथा हि गतिबुद्धिप्रत्यवसा
नशब्दार्थाकर्मकाणामित्येवावक्ष्यत ॥ नियमार्थं चेत्तत्त्वमिति प्राचः ॥ णिजर्थेनाप्यमानस्य
यदि भवति तर्हि गत्यर्थादीनामेव कर्त्तुरिति तेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये प्रकृत्य
र्थप्रतिकर्त्तृत्वस्यैवानिरपवादत्वेनावस्यान्नात् तृतीयासिध्यति ॥ उक्तं च गुणक्रियायांस्वा
तंत्र्यात् प्रेषणे कर्मतां गतः ॥ नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते इति ॥ कर्त्तुः स्वधर्मेण
तृतीययेत्यर्थः ॥ ननु णिजर्थं प्रतिकर्मत्वं बाधित्वा प्रकृत्यर्थं प्रतिकर्त्तृत्वं परत्वादेव सिद्धं ॥ अंतर
ङ्गत्वाच्चास्य कारकविशिष्टा हि क्रिया णिजर्थेन संबध्यते ॥ हेतुमति णिजिविधानात् ॥ अत एव

म॰ र॰
१०

उपजीव्यापि कर्तृसंज्ञा ॥ एवं च परत्वादंतरंगत्वादुपजीव्यत्वापि च प्रयोज्यस्यापि कर्तृत्वं गत्यादेर्विधि
नापि नेति चेत् ॥ अत्र वदंति ॥ इदं स्वतिर्दीर्घत्वात् ॥ नियमसूत्रमिति गत्यादीनां कारकांतरेति चेत् ॥ अत्रोच्यते ॥ अणु
गिज्ञार्थस्य प्रागुक्तं प्राधान्यं तु रस्तु न प्रधानानुरोधित्वात् कर्मसंज्ञायाः प्राबल्यात् विप्रतिषेध एव ना
स्ति ॥ अंतरंगोपजीव्यत्वेपि प्रधानघातेन प्राबल्यं प्रयोजयत इत्याशयेन ग्रंथानामुक्तिसंभवः ॥ प्रा
र्थप्राधान्यपुरस्कारे तु विधायकत्वमेवोचितमिति बोध्यं ॥ गत्यर्थेति ॥ स्वर्गकर्मकं शत्रुं निष्पन्नमनतु
न्नेकूलायनिष्ठो व्यापारः समीहते मेगमितिरित्यर्थः ॥ नन्विह कोयः स्वर्गस्य कर्मत्वं कर्तुः ॥ ईप्सितं न मंहि
कर्म न च शत्रवः कर्तारः ॥ तेषां गत्यादिसूत्रेण कर्मत्वादिति चेन्नैव ॥ कर्मसंज्ञायां हि कर्तृग्रहणं
स्वतंत्रस्योपलक्षणं स्यात् न अचधातूपात्तव्यापाराश्रयत्वमेव ॥ तच्च प्रयोजकसंनिधानेपि प्रयोज्य
स्यास्त्येव ॥ न चोपलक्षणत्वे प्रमाणाभावः ॥ प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां ॥ अत्र
धानेदुह्यादीनामित्युक्तोरूपनेकर्तुःकर्मणाइति वदन्तो भाष्यकृत एव न तत्र प्रमाणं ॥ न हि लक्ष
णां विनाणिजंतानां हि कर्म [illegible] कत्वालभ्यते ॥ येन रूपेन कर्तृ [illegible] शिति वचनसा
वकाशं स्यात् ॥ ननु स्वतंत्रे [illegible] संकेतितस्यत

शिव॰
१०७
107

त्रैवलक्षणात्कथमिति चेत्॥ संज्ञातरानुपहिते संकेतितस्य तद्व्यवहितस्याधारणेऽस्य तत्रमात्रे सत्यवधीहि॥ नी
वधारिति॥ यद्यप्यनया व्यापरणमर्थान्तगतिस्तथापि गतिरपि विशेषणीभूय व्यापरणमध्ये प्रविष्टत्वे
तावन्मात्रेणाव्याप्तिं मत्वा प्रतिषेध उक्तः॥ नियन्त्रिति॥ नियंता प्रभुः प्रेरकः॥ ननु सारथिरेव तेन न बा
स्यति [illegible] लीवर्द्दा नयावान् इति सिध्यति॥ अनिषेधइति॥ प्रयोजनः कर्मेति वक्तव्यमि
ति फलितोऽर्थः॥ स्ततइति॥ नियंता प्रजितायां नास्ति तद्वत्ता च सारथेः॥ आदयतीति॥ अकर्त्रभि
प्रायफले शेषात्कर्तरीति परस्मैपदं कर्त्रभिप्रायत्वे णिचश्चेत्यात्मनेपदमेव॥ नदपर्वदस्य निग
रणाचलनार्थभक्ष्यत्वस्य अतः प्रतिषेध इति निषिद्धत्वात्॥ सस्यमिति॥ नेत्रस्यातयवानामत्त्य
मानानां हिंसादृष्टत्वात्तस्यामवस्थायां निषेधाच्चेतनत्वात्॥ स्मारयतीति॥ यद्यपि स्मरणाविति स्म
त्रस्मरयस्य तेनं वगुल्मः स्वयमेव मुद्राहियते तत्रभाष्यप्रयोगाद्ध कर्मत्वं बोध्यम्॥ शब्दायतेरिति
॥ शब्दं करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ् ततो हेतुमण्णिच्॥ धात्वर्थेति॥ एते न शब्दाययति सैनिके
रिपूनिति कर्मप्रयुंजानाः परास्ताः॥ यत्तु प्राचा॥ अपकर्म शब्दाययतिरुमानेत्युक्तं॥ तत्र श्रयनरुक्तिस्ता
वन्निर्मूलैव॥ अंदद्रनोस्तु शब्दत्रियत्वमात्रेणाव्याप्तिसंभावनावस्तु नस्तु॥ नासौ स्वार्थ इत्युक्तं॥ यद

म० २०

१०८ प३

तां४

पिसुग्रहदृशामिति कर्मत्वमुक्तम् ॥ तत्र दृशिग्रहणं ग्रामाणिकमेव ॥ दृशो नेसुशब्दकर्मत्वात् सिद्धम् ॥ ग्या
स्तु शब्दकर्मत्वं यद्यपि सुधाकरादीनां संमतं ॥ तथापि वृत्तिकृतां संमतं ॥ अत एव अजिग्रहत् तं जनको धातु
मितेइति भट्टिप्रयोगम् अजिग्रहत् बोधितवानिति व्याचख्युः ॥ तथा च प्रयोजितारं नरं देवदेवमद्रिः
सुतारयितुं शशाक इत्यत्र गाहयितुं दृढत्वेन बोधयितुमिति ॥ युक्तं चैतत् ॥ आहर्द्विकर्मकत्वहिंसा
याद्वत् निग्राहितं गंमाल्यामि त्यत्र क्तेन प्रयोज्यान्वयाभिधानस्यात् ॥ संपन्ने कर्तृत्वं कर्मणश्चुक्ते ॥
ततश्च जाययागंधमाल्यं प्रतिग्राहितामितिस्यात् ॥ सिद्धान्ते तु प्रतिग्राहितं गंधमाल्यं ययेति विग्रहः ॥ जायानि
ष्ठप्रहणविषयीभूतं गंध माल्यं कर्मकं यत्प्रतिग्रहणं तत्कर्त्रीमित्यर्थः ॥ अन्यपदार्थान्तर्भावेन च विशे
षणविशेष्यभाववैपरीत्येनैकार्थीभावकल्पनात् ॥ अभिवादि [illegible] दृशोरिति ॥ अभिवादयते प्राप्ते दृशे
स्तु प्राप्ते विभाषेयं ॥ अभिनि ॥ नरस्य च नरत्वेन पूर्वनिपातकर्तव्ये विपरीतमुच्चारणं इद्दृशासमुदायवि
वक्षार्थं रत्वाद्स्य संघर्षं पूर्वस्यैति ॥ नेर्विश ॥ निविशन्ते यदि शूकशिखा यदन्ति ॥ क्वचिन्नेति ॥ एषोऽर्थेष्व
भिनिविष्टानामिति भाष्यप्रयोगश्चात्र मानम् ॥ उपपदविभक्तिमाह ॥ उभसर्वतसोरित्यादिना ॥ उभस
र्वयोस्तस्तौ उभसर्वतसौ ॥ तद्योगे द्वितीया कार्येत्यर्थः ॥ अत्रश्रांचनः ॥ उभशब्देनोभयशब्दो लक्ष्यते ॥

ग्रीवः४॥

१०८

108

अम्भयान्तसो ऽसंभवात् इत्याहुः ॥ वस्तुतस्तु वृत्तिविषये ऽप्ययं चकारस्तावापि उभयशब्दाद्विर्हितोयस्तस्य तदन्तम
स्यवेति यथाश्रुतं साधु । धिगित्यविभक्तिको निर्देशः ॥ नवेत्यप्य माहेतिवदिति चेन्नावः ॥ तत्र ॥ तथास
ति अपदान्ततया हस्त्वान्ते लोपः शाकल्यस्येत्यस्य वर्दातीति कजस्तस्याप्रित्र प्रवृत्तिप्रसंगात् ॥ नचा
यगकारान्तएवेतिभ्रमितव्यम् ॥ कस्यचदर्शनीस्त्रे धिकिदित्युदाहरणस्यव्रसंगतिप्रसंगात् ॥ तस्मा
न्नाधिगिधिमन्तंपन्तमेव ॥ प्रसनिवदनुकरणमित्यतिदेशात्सुपोलुक् ॥ उभयतःशब्दमिति ॥ लक्ष्मस्यप
र्यवयपीत्यर्थः ॥ आद्यादित्वात्तसिः ॥ षष्ठ्यर्थे द्वितीयाएवमुपपदविभक्तोसर्वत्रबोध्यं ॥ नाम्नो द्वितीयेव
संबंधः सर्ववाक्येषु वस्थितः ॥ सामानाधिकरण्येन पृष्ठ्या वापिक्वचिन्द्वत् ॥ इतिरुद्राक्षौषष्ठ्यान्तर्हरण
तदपवादविभक्तेरप्युपलक्षणं ॥ द्वितीयसुक्तिः सामानाधिकरण्येयाधिकरण्याभ्यां निर्वाह्याषष्ठीतद
पवादयोरेककोटिनयात्रा ॥ धिक्शब्दमाभक्तामिति ॥ तस्यनियोगतात्पर्यथः ॥ कथंधिङ्मूर्खेवेति ॥ संबोनपदस्य
क्रियान्तरमस्तिपृणोऽत्रतयाधिकृशब्दयोगाभावात् क्रियापदं च कचिच्छ्रुतेककचिदाहि मे मितपत्यदतत
॥ तथाचमूर्खसंबोध्यकंनिषिद्धाचरणादिनिंद्यमितिवाक्यार्थः ॥ एतेनेहानानहास्विधीभवेत्या
स्यास्वान्ते ॥ यत्राहुः ॥ उपपदविभक्तेः कारकविभक्तिर्वलीयसीतिसंवाधनेद्वयमेवभवति ॥ संबो

नेत्रयमैवभवति ॥ संबोधनपदस्य कर्तृकारकत्वाचित्यादिति तन्मंदं ॥ संबोधनस्य कर्तृकारकत्वे उक्तिसंभ
वाभावात् ॥ देवप्रसीदेत्यादौ वस्तुगत्या देवएव कर्तेति चेत् ॥ नैतावता कारकविभक्तित्वं लभ्यते ॥ किंच ॥
देवत्वांभजेत्वांभजंतीत्यादौ संबोधस्य यास्त्वमपि नत्वं त्वमित्याप्ता तावत् ॥ उपर्युपरीति ॥ कथं तर्हि उप
र्युपरिसुद्धीनांचरंतीस्वरपुरुषः ॥ उच्यते ॥ उपरिबुद्धीनां उत्तानबुद्धीनांउपरिचरंतीत्यर्थः ॥ एवं चकाराभ्रेडि न
त्वाभावान्न द्वितीया ॥ यद्वा प्रतिपदोक्तस्योपर्यध्यधसः सामीप्य इति स्वत्विस्यात्र ग्रहणं ॥ नेनवीप्स
यां द्विर्वचनेसति नास्य प्रवृत्तिः ॥ अन्यत्रापि दृश्यत इत्युक्तं ॥ तद्दर्शयति ॥ अभितः परितः इति प्रतिभा
तीति ॥ एषप्रतिशब्दः क्रियाविशेषत्वादुपसर्गः न तु कर्मप्रवचनीयः ॥ अंतरांत्वांमांमिति ॥ तवम
मच मध्ये इत्यर्थः ॥ सामर्थ्यादिति ॥ अंतरा नेह तुल्य पर्यंतमपि शब्दबोधे विषय इति स्वीक्रियत इति भ
वः ॥ नदीमन्ववेति ॥ द्वितीयायाः संबंधोर्थः ॥ स च ईसाहित्यरूप इति अनुनाद्योत्यते ॥ लक्षणेत्थं ॥ इत्थंभूती
ति ॥ एतत्संबाधिद्योतनमित्यर्थः संबंधश्चलक्ष्यलक्षणभाव इति प्रत्यादयोद्योतयंति ॥ भक्तो विष्णुं प्रती
ति ॥ विष्णोर्भक्तोस्य विषयविभावः प्रत्यादिद्योत्यः ॥ लक्ष्मीरिति ॥ लक्ष्मीरूपभागस्य हरिरुणा सह स्वस्वा
मिभावः ॥ इदं इदमिति ॥ इह वीप्सा द्विर्वचनेन वद्योत्यते ॥ परिशब्दस्तु क्रियया संबध्यते ॥ कर्मणोऽपि

विषय २

इदमुपलक्षण ॥ मनुप्रत्यो ॥ १

तथा च कर्मप्रवचनीयसंज्ञायाः द्वितीया फलमि
ति वदंश्च परा सा॥ तत्फलमाह यत्वमिति॥१

तीयाः॥ कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधितत्वेन॥ एतद्द्वयमेव लक्षणे दर्शयति विषयतयोपात्ताद्व्याख्या
तमाकरे॥ पंचम्यपाङ्परिभिरिति नु न भवति वर्जनार्थे नापेत्यनेन साहचर्यात्॥ ममाभिष्यादिति॥ मम भागः
स्यादित्यर्थः॥ ममाभिष्यादित्यपि प्रायः प्रत्युदाहरन्ति॥ तत्र मां प्राप्नुयादित्यर्थः॥ उपसर्गत्वेनान्यस्य सकर्म
कत्वात् मामिति द्वितीया॥ अत्र च मम भाग इत्यर्थे पर्यवसानात्॥ अभिभाग इति कर्मप्रवचनीयत्वे निषिद्धे उपस
र्गत्वाद्दुर्भ्यामिति षत्वं॥ पूजायां चेति॥ सुस्रजायामिति षत्वस्य प्रात्प्रजाग्रहणमपेक्ष्यते॥ कालाध्वनोः॥ अत्य
न्तविरामं व्याप्तिरत्यन्तसंयोगः स चासौ संयोगः निरन्तरसंनिकर्ष इत्यर्थः॥ द्वितीया स्यादिति॥ श्रुतत्वात्का
लाध्वभ्यामेव॥ मासस्येति॥ कृत्वोऽर्थप्रयोगे कालेऽधिकरणे इति षष्ठीत्याहुः॥ तन्न॥ तत्र शेषग्रहणानुवृ
त्त्या द्विरह्नो भोजनमिति रुदन्तेन सह समासनिरन्तरे वफलत्वात्॥ तस्मादिह षष्ठी शेष इति स्त्रैणेव षष्ठी
ति नत्वं॥ इति द्वितीया॥ स्वतन्त्रः कर्त्ता॥ वैधानीभिः धात्वर्थं प्रति आश्रयत्वं स्वातन्त्र्यं॥ आह च॥ धातुनोक्त
क्रियेनित्यं कारके कर्तृतेष्यते इति॥ साधकतमं करणं॥ प्रकृष्टेति॥ यद्व्यापारानन्तरं क्रियानिष्पत्तिस्तत्प्र
कृष्टं॥ उक्तं च॥ क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरं विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतमिति॥ विव
क्ष्यत इत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीति ध्वनयति॥ आह च॥ वस्तुतस्तदनिर्देश्यं न हि

अनुवर्तत इत्यर्थः ४५

२७

वस्तुनीत्यर्थः सार्व
विभक्तिकआद्यादि
त्वात्तसिः॥१

प्राधान्यात्त कर्तृप्रत्ययसमभिव्याहारे धात्वर्थविशेषविशेष्यतानिरूपितप्रकारता आश्रयत्वमर्थवत्वम्॥४

म० २०

११० ॥३॥

वस्तुव्यवस्थितं॥स्थाल्याः पच्यते इत्यत्र विवक्षातः स्य ते यत इति॥अयं भावः॥कारक त्वं न ह्यग्नेः पक्तृत्वादिषट्कं च वस्तु विशेषणं विशेष्यभावेन तत्र व्यवतिष्ठते॥न हि गोः सर्वदा नित्यौरेव न तु कांचित् त्यक्त्वा गोरिनिवर्तविशेषणं विशेष्यमेवेति सुवचं॥तथा च॥कयाचित् धातुत्पत्त्या उपस्थापितेऽर्थे किंकर्त्रादिक्रममिति प्रश्ने प्रकृतव्यक्त्युपात्तव्यापाराश्रय तया विवक्षितः कर्त्ता॥व्यापारव्यधिकरणफलाश्रयः कर्म॥कर्तृकर्मद्वारकसंबंधेनाश्रयोऽधिकरणं पच्यर्थो व्यापारश्चानेकधा॥एवं च पचेरधिश्रयणतंडुलावपनेधोपकर्षणादिना पर्यरूपत्वे तदाश्रयो देवदत्तः कर्त्ता ज्वलनतात्पर्यकत्वे एधाः कर्त्तारः॥तंडुलधारणादिपरत्वे स्थालीकर्त्री अवयवविभागादिपरत्वे तंडुलाः कर्त्तारः स्थाल्या पचतीत्यत्र तु तीयोपात्तव्यापाराश्रयोऽपि स्थाली करणमेव न तु कर्त्री देवदत्तादिव्यापारस्यैव तद्धातूपात्तत्वात्॥तथा॥आदिरवादिभ्यामुपात्तार्थप्रयोज्यः कर्त्ता य स्मिन्नेवार्थे भक्तय तिनोपात्तकर्म॥अधिपूर्वैः शीङादिभिरुपात्तार्थश्रयो धातुः कर्मकेवलैरुपात्ते अधिकरणमित्यादि॥एतेन ज्ञानस्य स्वप्रकाशत्वे कर्तृकर्मविरोध इत्यादिपरास्तं शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रयत्नादेर्भतत्संभवाभावात्॥एतेन परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वं चेत्॥अपादाने तिव्याप्तिरित्याशंक्याधात्वर्थतावच्छेदकफलशालित्वं तदिति परिस्कुर्व

शिव ४
११०
110

साध
शि ५

तोपि व्रतमुक्ताः॥ ग्रामं गमयति देवदत्तमित्यादौ गन्तृ[illegible]प्रत्यासेः॥ तत्सेतगमनस्य प्रकृत्यर्थत्वेपि तयात्वानव
च्छेदकत्वात्॥ तत्त्वे वापावपत्यादिव्रघोज्येकर्तृत्वप्रत्यासेः॥ नत्रपारिभाषिकमनुशासनोपयोगिक
र्मत्ववचनबलाद्व्यवस्थितमितिचेत्॥ अपादानेपि तर्हि तन्नास्तीत्यवधे[illegible]हि॥ एकसंज्ञाधिकारेप्रत
नकाशप्यांप्रकाशयाः बाधात्॥ अतएवात्मनमात्मा हंतीत्यादौपरत्वात्कर्तृसंज्ञयाकर्मसंज्ञाबाध
माशंक्याहंकारादिविशिष्टात्मभेदमाश्रित्य समाहितंभाष्ये॥ रामेणेति॥ इत्यर्थद्वयेपिविभक्त्युपस्थिता
नोकारकातां क्रियांप्रतिविशेष[illegible]णैतेव तथापिरद्गुप
पस्थितानां विशेष्यतैव॥ सत्वप्रधानानिनामानीत्युक्तेः धातूपस्थाप्ययोः फलव्यापारयोपिकम
रत्समभिव्याहारे विशेषणविशेष्यभावव्यत्यासः॥ तथाच॥ रामेतिष्ठेयो व्यापारस्तद्विषयीभूतवाण
व्यापारसाध्यप्राणवियोगाश्रयो वलीतिवाक्यार्थः॥ यत्तु वाजपेयाधिकरणमीमांसकैरुक्तं कारकैः
पाकस्त्यादिस्यादिति[illegible]तदिष्टापत्तिप्रसंगे॥ कर्तृकरणेर[illegible]नाबहुलंकर्तृके मेलोः रत्नीत्यादि
सूत्राणांरसस्त्ररत्यर्थेन कारकान्वयं विनोक्तसंभवस्यैवाभावादितिसुधीभिराकलनीयं॥ अतभि
हितेनेति किं हरिः करोति॥ जीवत्यनेन जीवनः॥ शाब्दिकः॥ शाब्दंददुर्शं करोतीति[illegible]॥ स्तत्तविश्वंयेन नरूतवि

म॰ २॰
१११

स्वः विस्पृक्कमेकरस्मात्स्रयरस्तस्यर्थः ॥ अथ षष्ठ्यर्थे बहुव्रीहौ श्रुतत्वं तत्रस्वीकारात् ॥ यथा चैन तथा वक्ष्यते ॥
परत्यादिभ्य इति ॥ अशरूतिगरोणयं ॥ तेन नाम्नासुधीत्वत्थ इति तेनोदात्त इत्यादि बोध्यं ॥ द्वयोर्ग्रहणयोः स
मासारः द्विग्रहणं ॥ पात्र्यादित्याभावः ॥ ग्रहणद्वयसंबंधिधात्यमित्यर्थः ॥ वादिति ॥ करणशब्दानुरत्त्यापरित्य स्या३
यणसंप्रदानमित्युक्तसूत्रस्यानन्तरस्यामहरणापकर्षणेन वाक्यं त्तयोः पर्याये लब्धे समावेशार्थम्बुका
रः तेन मनसा कर्मसंपरं ॥ करणे तृतीया चेत्युभयसिध्यति ॥ मनसः सत्तायामित्यलुक् ॥ किं च ॥ अक्षैर्दी
व्यतेयत्तददत्ते नत्पत्र सकर्मकत्वादेनिकर्तुर्नौ दीव्यतीति मनसा देवनत्यव तेन मनसा कर्मत्वं न ॥ अप्रणाव
कर्मकादिति परस्मैपदं नेति सिद्धान्तः ॥ यत्तु प्राचा ॥ कर्मसंज्ञ ना स्यादिति व्याख्यातं तदाकारविरो
धादुपेक्ष्यं ॥ स्यादेतत् ॥ करणसंज्ञाया अवकाशः देवनाक्षाः करणे स्तु टस्कर्मसंज्ञायास्तु दीव्यत
अक्षाः कर्मणि लट् ॥ अक्षैर्दीव्यतीत्यत्र तु संज्ञाद्वयप्रसक्तौ कार्यद्वयप्रसंगे परत्वात्तृतीयेवस्यात् ॥ न
नु द्वितीये वत् ॥ अत्राहुः ॥ कार्यकालपक्षे कर्मणि द्वितीये त्यत्र पदस्योपस्थापनं तस्यानवकाशत्वा द्वि॰ ४
त् द्वितीयेति ॥ ननु दीव्यन्ते अक्षाः इत्यत्र कर्मण्याभिहितेपि करणत्वस्यानभिधानात्तृतीया स्यात् ॥ त १११
था देवनाय अक्षाः इत्यत्र तु टाकरणस्याभिधानेपि कर्मणोनभिधानात् द्वितीयास्यात् इमेवं ॥ एके ।।।
वयत्र शक्तिः संज्ञाद्वययोगिनी तथा चोभयत्रापि अभिधानमेव न त्वनभिहितत्वं ॥ सद्युक्तं

पुत्र एवेति। पितुरत्र क्रियासंबंधः शाब्दः॥ पुत्रस्य तु सामर्थ्य इति तस्याप्राधान्यं॥ अप्रधानत्वादेवाक्रम
कर्तृत्वं न चैवं पितुरपि तन्नीयायपत्तिः॥ तत्र प्रातिपदिकार्थमात्रे अंतरंगत्वात्प्रथमोपपत्तेः॥ पितुरागम
नं निमित्तादेः कारकविभक्तेः प्राबल्याच्च॥ येनांगविकारः॥ अंगशब्दः स्वशरीरावयवे वर्तते॥ तदंगेन इति
॥ येनेति। सर्वनाम्नावयवस्यार्थभूतोऽवयव एव गृह्यते संनिधानात्॥ सच्चार्थाद्विकृत एव॥ न ह्यवि
कृतेनावयवेन शरीरस्य विकारः संभवति॥ तदेतदाह॥ येनांगेन विकृतेनेति॥ स जानीत इ
ति। संप्रतिभ्यामनाध्याने इति तङ्। स्त्री योगे परत्वात्षष्ठी॥ पितुः संज्ञानात्॥ यत्तु हरदत्तेनोक्तं॥ अ
ध्यानेऽपरत्वादधीगर्थेति षष्ठी मातुः संजानातीति॥ तन्न॥ तत्र शेषाधिकारादिति॥ इत्यादीति॥
उक्तं च॥ द्रव्यादिविषयो हेतुः कारकं नियतक्रियमिति॥ अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्य
त इति च॥ फलमपीति॥ एतच्च प्रत्यय इति सूत्रे कैयटे स्पष्टं॥ एवं च तादर्थ्ये चतुर्थ्या सह हेतुतृती
या विकल्प्यते॥ अध्ययनाय वसति॥ अयं तु विशेषः॥ अध्ययनस्य फलेन सहाभेदः संसर्गः॥
उपकारकत्वेन सह तु निरूपकतेति॥ गम्यमानेति॥ न तु श्रूयमाणे वेत्याग्रहः इति भावः॥ साधने
ति। साध्यमित्यत्र प्रत्ययेति भागस्यार्थं प्रतीतिभावः॥ मा चापलायेति। गम्यमानेष्वीदित्यत्र तु य

हां३

व्यापारे अनाश्रिते सति निमित्तत्वं दृष्टादिहेतुर्भवति ५

तादर्थ्यस्योपकार्योपकारकरूपसंबंधात्॥२

म० र०

११२

नचतत्रकर्मं
रदधातुप्रयोग
इत्यतआहतत्रे
ति।भोक्तः।लाक्ष
णिकः॥४

तद्धामिति शेषः॥ अशिष्टेति॥ एतञ्च दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनेन ज्ञाप्यते॥ इति तृतीया॥
अन्वर्थसंज्ञाबलेनाह॥ दानस्येति॥ तेन अजां नयति ग्रामं हस्तं गृह्णाति इत्यादौ नाति
प्रसंग इति भावः॥ तत्र च अपुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनं॥ अत एव रज
कस्य वस्त्रं ददातीत्यादौ न भवति तत्र हि ददातिर्भोक्तः॥ एतच्च वृत्तिमतं॥ भाष्यमते तु नान्व
र्थताया माग्रहः॥ खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति प्रयोगात्॥ रजकस्य ददातीति तु शे
षत्वविवक्षायां बोध्यं॥ न चैवमजां नयति ग्राममित्यत्रापि प्रसंगः॥ यमभिप्रैतीत्युक्त्या हि
यमिति निर्दिष्टस्य शेषित्वलभ्यते॥ ग्रामस्य वस्त्रं जां प्रति शेषित्वं नास्ति॥ दानीय इति॥ बा
हुकात्सम्प्रदानेऽनीयर्॥ रुच्यर्थानां प्रीयमाणः॥ प्रीञ् तर्पणे॥ अस्मात्कर्मणि लट्॥ हरये
रोचते इति॥ हरिं प्रीणयतीत्यर्थः॥ कर्मसंज्ञापवादोऽयं॥ प्रीयमाणः किं देवदत्ताय रो
चते मोदकः पथि॥ अत्र पथो मा भूत्॥ श्लाघ हुङ्॥ श्लाघा स्तुतिः॥ कृष्णाय श्लाघते॥ कृष्णं स्तौतीत्य
र्थः॥ अन्ये त्वाहुः॥ कृष्णायात्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति॥ तत्राद्यपक्षे कर्मत्वे प्राप्ते द्विती
यत्कारकशेषत्वात् षष्ठ्यां प्राप्तायां वचनं॥ कुतरति॥ समनीभ्यः कृष्णं तु स्तौति नमवार्थ कृष्णं बोध

मोऽ

यक्षिवः

११२

भाष्यमते संप्रदानस्य शेषत्वविवक्षायामित्यर्थः॥ ७

वृत्तिमते

यतोऽपायः॥ यस्य कस्यचित् नकुतिमिति वा निरन्तरमिति॥ स्थित्वा स्वाभिप्रायं बोधयतीत्यर्थः॥ प्र
काशनस्थेयाख्ययोरिति नद्वः॥ धारेरुत्तमर्णः॥ षष्ठ्यां प्राप्तायां वचनं॥ स्पृहेरीप्सितः॥ परत्वादि
ति॥ ननु परस्परेण स्पृहणीयोऽशो मस्पृहणीयेषु एमहात्मभिरिति सिद्धं॥ यदानुशाषत्वे विवक्षा
तदा षष्ठी॥ तेन कुमार्यैरवकांतस्य त्रस्यंतिस्पृहयंतिचेमि सिद्धं॥ एतच्च सर्वं हरदत्तादिरीत्योक्तं।
वाक्यपदीये हेलाराजीयकृत्वान्वयोज्यायः॥ गंपयोसु स्पृहयति योगे कर्मसंज्ञायाः शेषत्वात्पुनश्च
वाधिकेयं संप्रदानसंज्ञेति स्थितं तन्मते स्पृहणीयमित्यत्रेदानीयरति वत्संप्रदानेऽन्यत्। कु
मार्यैरवत्पत्रतु भिमत्किविपरीतेन मनकां मापस्पृहयंतीतिव्यारव्येयं॥ क्रुधद्रुहे॥ क्रुधकोप
द्रुहोहे ईर्ष्य ईर्ष्यासूयाऽसूयतिकंञ्जहिमध्येगतः॥ एषामर्थेनार्थायेषांधातूनामित्यर्थः॥ तत्रक्रोधो
ऽमर्षः द्रोहोऽपकारः॥ ईर्ष्याऽक्षमा॥ असूयागुणेषु दोषाविष्कारः॥ क्रुधद्रुहोरकर्मकत्वात्तद्योगे षष्ठ्यां प्राप्तायां इतरयोः
सकर्मकत्वात् द्वितीयायां प्राप्ता॥ राधीक्ष्योः॥ कारकमिति॥ कर्मकारकमित्युक्तितु प्राव प्रमादे एकसंज्ञाधिकारात्॥ नचयत्र
यमिकप्राक्षिमात्रोभिप्रायेणकर्मत्वव्यपदेशः॥ शुभसंबंधिशुभाशुभं पर्यालोचयतीत्यर्थाभ्युपगमेन षष्ठ्यां एव प्राप्तेः॥
अनुप्रतिगृणश्चेति॥ अनस्यानुकरणत्सूक्ती॥ होत्रे रति॥ कर्मत्वप्राप्ते॥ परिक्रयणे॥ आयोधनाद्यपरेणोनांसंतिकस्वीक
रणे॥ तस्य समीपं परिशब्दश्चाचष्टे तत्राऽनियतकाल॥ ततोन्यूनत्वादिति व्याचष्टे। नियतेति॥ भृत्यावेतनादिना॥ तादर्थ्यः

भ॰ भ॰

२२३

ति॥ तस्मै कार्याय येदं तदर्थं कार्यं॥ तस्य भावस्तादर्थ्यं॥ चतुर्थी उपकार्योपकारकत्वरूपः संबन्धो विधीयते॥ नन्वेवं तद्धितसमासेभ्यः सं
बन्धाभिधाने भावप्रत्ययेन तेनैव सिद्धत्वात्॥ उपकारकत्वं चानेकधा॥ तेन कारणस्य यदधीनत्वात्तदा तदपि भवति॥ भक्तिर्ज्ञा
नायेति ज्ञानात्मनापरिणमत इत्यर्थः॥ प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी॥ अभेदविवक्षाया
न्तु पूरत्वात्प्रथमैव॥ भक्तिर्ज्ञानं कल्पत इति॥ यदा तु जनिकर्तुरिति भक्तेरपादानत्वं विवक्ष्यते तदा ज्ञानस्याभिहित
कर्तृत्वात्प्रथमैव॥ भक्तेर्ज्ञानं कल्पते॥ क्लृपीत्यर्थग्रहणात् त्यागाय नाह॥ संपद्यत इत्यादि॥ प्राणिनां सुखासुखस्य सू
चको भूतविकार उत्पातः॥ तेन ज्ञापिते तदर्थे वर्तमानाच्चतुर्थीत्यर्थः॥ वातायेति॥ वातस्य ज्ञापिकेत्यर्थः॥ हितेति॥
समासविधानात् ज्ञापकादिति भावः॥ एवं सुखयोगेऽपि बोध्यं॥ तुमर्थाच्च भाववचनात्॥ क्रियार्थायामिति सूत्रमाह॥ क्रिया
क्रियार्थकमुपपदं क्रियावाच्यं न फलवतीत्याशयेनाह॥ क्रियेति॥ क्रियाफलकक्रियावाचकपदे निकमित्य
र्थः॥ तुमुन इति॥ एधुलौ पुलफलं फलभोगो यानीत्यस्य फलान्याहर्तुं कस्यापि चिह्नरूपं बाधकाभावात्॥ कर्मणी
ति॥ तेषाच द्वितीयापवादोयमिति भावः॥ यतु प्राचा व्याख्यातं॥ अप्रयुज्यमाने स्मै कर्मणि षष्ठी स्यात्॥ प्रयुज्य
मानस्य माभूदिति नियमार्थं सूत्रमिति तन्न॥ अप्राप्तस्य नियमायोगात्॥ न च तादर्थ्ये इति प्राप्तिः॥ नहि फलाय याय
न क्रियाकिंत्वाहरणार्था॥ आहरणं तु फलकर्मकमित्यन्यदेतत्॥ तुमुनो भाववचन विधानात्तदर्थस्य भाववचनेनैत
सिद्धे पुनर्भाववचनग्रहणं सर्वविशेषपरिग्रहार्थमित्याह॥ इतिसूत्रे लीति॥ न च तादर्थ्य इत्येव गतार्थतायां तस्य भाववचनेनै

शिवः

२२३

113

वनुमुनेव तादर्थ्ये स्वयोगेति न तथापाशानिप्रकार्यमात्रेत्रयमात्रसंगात्। यत्तु प्राचोक्तं॥ भाववचनादेवयथास्यात्॥ पाचको
व्रजतीति। एवं लतात्मा भूर्दितिनियमार्थमिदं सूत्रमिति। तन्न। एवं लते कर्तुः प्राधान्यात्॥ कर्त्तरि वृत्तिवतेदर्थ्यं भावा
त॥ गुणीभूतपाकस्य च विभक्त्यर्थान्वयात्॥ ननु षष्ठ्यपीति। कुतः षष्ठ्येवास्तु॥ अलंशब्दस्तु पर्याप्तीतरार्थकएव
शक्तोनामि त्याशंक्याह॥ नमस्येव भवतीति। नत्वा तत्राग्नि स्वादि॥ ननु तत्राग्निस्वस्ति युष्मच्छब्दादपि पदे च तुर्थ्या भाव
मेव॥ अनादरे शनिरिह कर्मणो विशेषणं॥ अनादरस्येति कंयन्कर्मेति नाहं त्वां तृणमेव न तु युष्मदर्थः॥ इति चतुर्थी॥ ध्रु
वमिति। ध्रु गतिस्थैर्ययोः॥ अस्मात्कुटादेः पचाद्यच्॥ ध्रुवस्थैर्य इति पाठे तु रज्जुपधलक्षणकः॥ ध्रुवं स्थिरं॥ ए
तन्न धातूपात्तगमनावधित्वे सति तज्जन्यविभागाश्रयः॥ तत्त्वार्थादवधिरेवेत्याह॥ अवधिभूतमिति॥ धावतः
ति॥ इहक्रियाविशिष्टस्यापायश्चस्य परत्वधातूपात्तक्रियां प्रति ध्रुववधित्वं न विरुध्यते॥ परस्य रस्मान्मेषावप
सरत इत्यत्र तु स्वधातुना गतिद्वयस्याप्युपादानात्॥ एकं निष्ठं गतिं प्रति इतरस्यापादानत्वं न विरुध्यते॥ उक्तं
च॥ अपायेयदुदासीनं चलं वा यदि वाचलं॥ ध्रुवमेवा तदावेशात्तदपादानमुच्यते। पततो ध्रुव एवाश्वो यस्मा
दश्वात्पतत्यसौ तस्याप्यश्वस्य पतने कुड्यादिध्रुवमिष्यते॥ मेषांतरक्रियापेक्षमवधित्वं पृथक् पृथक्
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्॥ इति। पर्वतात्पततो। अश्वात्पततीत्यत्र तु पर्वतावधिकपतन
क्रियाश्रयस्तदवधिकेदेवदत्तादिनिष्ठपतनमर्थः॥ पंचम्यर्थश्चावधो अभेदेन संसर्गेण अवरुत्यर्थे विशेषणं च

म० र०

११५

न्यायेषु क्रियायायास च धर्मी न तु धर्ममात्रं पंचम्यर्थे ।। वृत्तिरिति स्य च हु व्रीहेर्धर्मिपरतया विभक्त्यर्थे निर्विवादत्वात् ।। उक्तंतोद
नास्त्यालोन्यत्राशि प्रोदनकर्म को त्र रणावधिभूतेत्यर्थः ।। जुगुप्सेति ।। भाष्यकारस्तु जुगुप्सादीनां न सूत्रे निर्दिष्टानि लक्षकता
मास्त्रियस्य त्रसासिद्धिमित्याह ।। एवमुत्तरसूत्रेपि भीत्रा ।। कथं तर्हि कस्य विभ्यति दर्शनम् आज्ञानरो घस्य संयुगे ज्ञेने रामा
यणं ।। अत्राहुः ।। कस्य संयुग इति ।। न चैवं संयुगस्य वा पादानसंज्ञापत्तिः ।। परत्वादधिकरणसंज्ञया बाधात् ।। अधिकर
णत्वविवक्षायां विशेषापेक्षेः ।। अध्यापनादिति ।। अध्ययनसंबंधिनीं ग्लानिरित्यर्थः ।। जनिकर्तुः ।। जननं जनिः उत्पत्तिः
इन्जनादेरिति जनेर्भावे इन् ।। जनिघसिभ्यामिणिति सूत्रगणादिसूत्रेण इण् वा जनिवध्योश्चेति वृद्धिप्रतिषेधः ।। तस्याः कर्ता
ति षष्ठीतत्पुरुषसमासः ।। तथा च धात्वन्तरयोगेपि भवति ।। अंगादंगात्संभवसीति यथा तदनदारु ।। जायमानस्य
त्तिरात्मनेनहकालियोधातुनिर्देशस्तीकानिर्दद्याय मित्यामिन्यगमस्तेतु पृधालोपश्च संगमर्थासंगतिसमासार्थो
नुपपत्तिंश्चाभ्या वाच्यतोमीमांसावीसेनकारः समाहितोस्तीति भावः ।। हेतुसत्र अग्रहृतिमरणं हेतुमात्रपरमिति वृ
त्तिकृन्मतं ।। पुत्रात्प्रमोदो जायत इत्युदाहरणं तु ।। उपादानपरमात्रमित्ति इति तु भाष्यकैयटमतं ।। तदुभयसाधारण
मुदाहरणमाह ।। श्रृंगाच्छर इति ।। श्रृंगात्प्रादुर्भावात्प्रगमः ।। स चेद्धेतुरेव नन्वपादानं ।। किं च ।। अस्तमायासबलं ।। नृहिस
र्वकार्योपादानमित्तिवदांतसिद्धांतः ।। भुवः ।। भवनं भूरिति संपदादित्वात् क्विप् ।। सूत्रे संसृष्टसमासस निर्दिष्टमपि
कर्तृग्रहणमनुवर्तते स्वरितत्वादित्याह ।। भूकर्तुरिति प्रभवत्यस्मादिति भावः ।। ल्यप्लोपे इति ।। ल्यबन्तस्य गम्यमानो
र्थत्वान्न प्रयोग इत्यर्थः ।। यतश्चेति ।। यदवधित्वं नास्तीत्याध्वनः कालस्य वा निर्माणपरिच्छेदः प्रतिपाद्यते ।। ततस्त

शिवः

११५

114

ध्येः॥ तेन पंचम्यंतार्थे नाथे द्वारा युक्तात् प्रवीयमाणाधारणः प्रथमा ससंख्योऽल्पः॥ कालादिति। न द्युक्तादित्यपेक्षते।
पंचम्यर्थमिति॥ न चैतत् स्वतन्त्री प्रथमादि त्यागरोक्तेऽपि चार्थकस्येदं ग्रहणमिति वाच्यं॥ अस्मात्तारो मन्दो वेत्या
दावि पंचमी विभक्त्यन्तेनैव सिद्धत्वात्॥ यत्तु स्तरः इति निर्दिश्यमानप्रतियोगिकं च सयुज्यते न यथा॥
चैत्रः स्तरः स्तरः कान्तः इति॥ अनेनायमन्यार्थ इति तन्मन्दं। प्रतियोग्याकाङ्क्षाया उभयत्र तुल्यत्वात्॥ उदाह
नकोशाविरोधाच्च। अन्ते च स्मादिति॥ कथं तर्हि गुरुवाराधनम् ते इति प्रमादाय मित्यके॥ अन्ये तु भसर्वेतसो शि
वत्रह्रशिष्य रसाद्धे त्रयावच्छीतमित्यादाविव कृते योगे द्वितीयापि साधुरित्याहुः॥ यदुक्तं च न तु॥ अन्तरेण द्वितीया
चेति चांजसत्रात। अभीति योग इति॥ अभ्यर्थे योग इत्यर्थः॥ तथा च आर्तिक्याः प्रभृतीति भाष्ये विरुः एव न कैय
टः प्रायुक्त॥ तत्र आरभ्येत्यर्थ इति॥ एवं च ग्रहणसामर्थ्यादवधिमात्रं विवक्ष्यते। तेनेति विशेषणांशस्तु नेति
भावः॥ यद्वा मर्यादेतिशब्द उच्यते॥ अस्मिन्मर्यादावचनं॥ आङ् मर्यादाभिविध्योरिति सूत्रे॥ तत्र यच्छब्दः दृष्टः
म उक्तेः संज्ञा इत्यर्थः॥ परिहरेरिति॥ परेर्वर्जने वा वचनमिति वार्तिकोत्पत्तिः द्विर्वचनाभावः॥ परि रुद्रेति॥ अत्र पंचमी
विधौ वर्जनार्थेनापेन साहचर्यादिति भावः॥ प्रतिनिधिप्रतिदाने॥ अस्मादेव निर्देशाद् अभ्यायोगे पंचमीत्याहुः॥
मुख्यस्याभावे तत्सदृशः उपादीयते स प्रतिनिधिः॥ दत्तस्य प्रतिनिर्यातनं प्रतिदानं॥ अकर्तरि पंचमी स्यादिति।
वा तृतीयापवादोयं ज्ञातेनेति॥ शतेन बिहोत्तमर्णेयधमर्णं मारणात्त्वद्वराणं॥ तत्प्रयोजकोहेतुश्चेति कारणे कर्तृसंज्ञे च। योग
विभागादिति॥ एतद्वेहेतुमनुष्यभयेति स्ते[illegible]स्यपरं॥ स्त्रियां चेति॥ वा हुलकं प्रकृतेनलक्तुष्टिरिति वार्तिक

निर्देशस्तु स्मापकः ॥ १२ ॥ बृहवृत्ता ॥ स्तुत्व यार्थेस्मिन्निति निपातानामनेकार्थत्वादिति भावः ॥ पंचमीति ॥ तत्र मंडूक
प्लुत्या पंचमी । द्वितीयानुसेनेति नेव ॥ दूरं दूराद्दूरे [illegible]णवेति ॥ हस्तस्त्रम्यापि वस्यते ॥ दूरं तिकार्थभ्यश्तिसूत्रस्यालो
इत्यापि प्यनुवर्त्तनादधिकारेणभ्यो विभक्तिचतुष्टयं वोध्यं ॥ तथा च प्रयुज्यते ॥ दूरादावसथान्मूत्रमिति ॥ आ
वसथस्य दूरे इत्यर्थः ॥ प्रसत्वे ति ॥ सत्ववचनत्वं वताद्विशेकत्वं ॥ एवं सामानाधिकरण्येन प्रातिपदिकार्थविशेष
कत्वमुपदिश्यते ॥ तदाह दूरः पंथा इति ॥ एतेन करणे चस्तोकेत्तिसूत्रे करणे किं ॥ क्रियाविशेषणे कर्मणि मा
भूत् ॥ स्तोकं पचति ॥ क्रियेति नद्रव्यमिति विशेषणयापि व्याख्यानतः ॥ यत्तु तमनूद्य क्रियाया विशेष्यत्वेन स
म्यत्वावश्यंभावा ॥ चिंत्यमिति ॥ सुस्पष्टं चिंत्यं ॥ धात्वर्थवाच्यायाः ॥ क्रियायाः असत्त्वरूपस्याकारकसिद्धत्वा
त् ॥ तच्च विशेष्यत्वेन तदनुपपत्तेः स्पष्टमिति भावः लिंगसंख्यान्वयोगित्वमात्रेण तदुपपत्तेः ॥ निष्ठा
कत्वं पच्यते ओदनः इत्यादौ कर्मनिष्ठत्वकत्वादिति भावः ॥ यच्चापि रत्नशाणेयकाः श्रूयते इत्यादौ भाष्ये संख्या
न्वयः स्वीकृतः ॥ पचतिभवतीत्यादौ कर्तृकर्मत्वान्वयः अतएव पि लिंगस्य कारकांतरस्य चाभावो निर्वा
धएव क्रियानयुज्यते लिंग ॥ क्रियानाधारकारके ॥ असत्त्वरूपतानस्याः इयमेवावधार्यतां ॥ इति पंच
मी ॥ रात्तः पुरुषरति ॥ अन्यपार्थस्य प्रत्यर्थप्रतिप्राधान्याद्प्रधानादेव षष्ठी तत्पुरुषे विशे
षणं ॥ प्रधानानुनषष्ठी ॥ उक्तन्यायविरोधात् ॥ शेषत्वाभावाच्च ॥ पुरुषशब्दोहियथायथंप्रातिपदि

कार्यमात्रवृत्तिः॥ कारकार्थकोवा॥ यदत्तु नैवं नदादुरुषश्चाज्ञादपिषष्ठीभवत्येव॥ यत्त्वप्रधानं शेषइतितन्न॥ प्रा
तिपदिकार्थमात्रेसुप्त्लोपः घटइत्यादौ विशेषणेषष्ठीप्रसंगात्॥ नचषष्ठ्यमप्यावाधः तस्याः प्राधान्येचरितार्था
र्थत्वात्॥ कर्मादीनामपीति॥ यथाविशेषाविवक्षायां रूपवान्निति तत्रद्विवक्षायां तुनीलः पीतरस्पाद्विश्वरुप्य
उच्यते तथेदमपिन्यायसिद्धमितिभावः॥ सतामिति॥ एवं च नपुंसके भावक्तस्य योगेशेषविवक्षायां चेतिन
प्रथोनाकरणेषष्ठीचेति च प्राचां ग्रंथेपठ्यमानं तत्पूर्ववचनमितिभावः॥ सर्पिषइति॥ ज्ञोविदर्थस्य करणे॥
धीगर्थदयेशां कर्मणि॥ कृत्रः प्रतियत्ने॥ रुजार्थानां भाववचनानामज्वरेः॥ आशिषिनाथः॥ जासिनि
प्रहणनाटक्राथपिषांहिंसायां॥ व्यवहृपणोः समर्थयोः॥ कृत्वोर्थप्रयोगे कालेधिकरणे॥ इत्यष्टसूत्री
तुनेह व्याख्यातः तस्याः समासनिवृत्तिफलकत्वात्॥ तथाहि॥ तत्रशेषइत्यनुवर्त्तते॥ शेषत्वेनविवक्षि
तेषकरणादौषष्ठीसिद्धे वचनमिदमर्थं॥ इहषष्ठ्यां वनतु तल्लुक्॥ तथालुकः प्रयोजकीभूतः समास [illegible]
एवनेति॥ तथाचवार्त्तिके॥ प्रतिपदविधानाचेत्यादि॥ हरेस्त्वात्॥ कारकेणोपदिष्टेचश्रूयमाणक्रियेयंपुनः
प्रोक्ताप्रतिपदषष्ठीसमासस्यनिवृत्तयेइति॥ तेनशेषत्वविवक्षायां सर्पिषोज्ञानं॥ मातुःस्मरणमित्यादौ
त्यसमस्तान्येवसाधूनि॥ हरिस्मरणमित्यादीनितुशेषत्वाविवक्षायां स्थ्योगषष्ठ्यासमासेबोध्यानि॥ तत्र
चकारकषष्ठ्येकत्वात्सदुत्तरपदप्रकृतिस्वरः॥ शेषषष्ठ्यासमासत्वेतोदन्तस्यात्तवानिदं॥ तथाचस्वारोर्थे

यमहं स्तौमीति परमनिकर्षे ॥ किं च मातुः स्मृतमित्यादौ समासाभावेऽपि फलं ॥ नाद ॥ तत्र कारकषष्ठी लभ्यते ॥ न लोका
ति निषेधात् ॥ आह च ॥ निष्ठायां कर्मविषयायां षष्ठी च प्रतिषिध्यते ॥ शेषलक्षणायां षष्ठ्यां समासस्तत्र नेष्यत इति ॥
एवास्थितेऽच्युत्पादिवत् कुत्रार्थे पुरुष्वकारणे उदाहरणं प्रत्युदाहरणं चयस्य निङ् नेदृश्यते ॥ सर्वमुपलक्षणं तया न
यमिति हरदत्तादयः ॥ सर्वनाम्नस्तृतीया च ॥ इह सर्वनाम्न इति षष्ठी ॥ नदाह ॥ सर्वनाम्नः प्रयोगे इति पंचम्यन्ते तु
हेतुशब्दात्षष्ठी तृतीयेत्स्यात् ॥ भिन्नाभिन्नेभावः ॥ निमित्तपर्याय इति ॥ पर्यायग्रहणस्य फलमुदाहरन्ति ॥ एवमित्यादि
ना ॥ प्राचा तु किमर्थमित्युदाहृतं ॥ तत्र किमः क्लीवत्वं दुर्लभं ॥ सामान्ये नपुंसकत्वात् समासे वा अन्यथा अन्यत्कथं
विज्ञेयं ॥ असर्वनाम्न इति ॥ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्त्तिकाद्धि तत्कारणं यद्यपि ह्युक्तं तथापि
भाष्यकृताऽकृतावित्यत्र पठितं ॥ तेनासर्वनामप्रयोगेऽपि प्रवर्त्तते ॥ किं तु प्रायग्रहणात् तत्र तृतीयादयः प्रायेणेत्यर्थः ॥ वर्द्ध
मानस्तु प्रथमामपीच्छति ॥ षष्ठ्यर्थप्रत्ययेन ॥ पंचम्यामिति ॥ कथं तर्हि इतः पश्चादिति ॥ ततः पश्चात्स्रंस्यते ध्वंस्यते च
ति भाष्यप्रयोगात् पश्चाद्योगे पंचम्यपि ॥ प्र[illegible]न्त्ययग्रहणं चिन्त्यप्रयोजनं ॥ एनपा ॥ कथं तर्हि तत्रागारं धनपतिगृहा
दुत्तरेणास्मदीयमिति ॥ उत्तरेणेति तृतीयांतं नैरणेनेत्यनेन सामानाधिकरण्यं बाध्यं ॥ दूरांतिकार्थैः ॥ अन्यतरस्यां ग्रह
णं समुच्चयार्थं ॥ तेन च द्वितीयापि पंचमी समुच्चीयते व्याख्यानात् ॥ ननु षष्ठी द्वितीया तृतीया ॥ तदेतदाह ॥ पंचमी च
ति ॥ दिवस्तदर्थस्य ॥ तच्छब्देन व्यवहृपणोः परामृश्यते ॥ तौ च द्यूते क्रयविक्रयव्यवहारे च तुल्यार्थौ पूर्वसूत्रे गृहीतौ ॥ तद्
सामर्थ्येनाह ॥ द्यूतेति ॥ कर्मणीति ॥ शेषे षष्ठ्यां इति न संबध्यते उत्तरसूत्रद्वयारंभादिति भावः ॥ अनन्तरं च हि त्रिसूत्र्यां तिङ्-

नि॰४ त

न समुदाय इति ॥ ज्ञानस्यादेरप्रतीतिः ॥ देव्यत्स्तुवोः ॥ इष्यते दैवादिकस्य गत्यर्थस्य लोपे मध्यमपुरुषैकवचनं भेद्र
व्यतिः ॥ तस्मात् वर्यात् त्रुविर्पितया भूतेए जगयते ॥ अत एव ह्योपकरणमनसंबध्याने ॥ निङ्तेन सह स
मासस्याप्रसक्तत्वात् ॥ कर्त्तृकर्मणोः कृति ॥ गुणेऽनि ॥ तदुक्तं प्रधाने नियताषष्ठी गुणे तु भयथा भवेदि
ति ॥ रतरश्चीति ॥ पूर्वैरसमनेति विग्रहः ॥ पूर्वैरसनवानित्यर्थः ॥ अविवक्षितकर्मत्वाभावे तु सुप्सुपे
२५ ति समासः ॥ पूर्वादिभिः ॥ पूर्वैरित्वेति कर्त्तरि इति ॥ नहि धौम्याद्भनेनेतिस्रजादने नेस्य नुश्च ॥
यकथं धयेराम्रादमुलमभिभद्रः ॥ आत्मादुः ॥ अनित्यमिदं तदर्हमिति निर्देशात् ॥ स्त्रीप्रत्ययोरिति ॥
कथं तर्हि मुक्तिप्रियोरिति चेसुलसीयुटोवाधानेतिरनि ॥ कारणोत्व विवक्षायां तृतीयेति गणरत्न ॥ तलो
कादयपान्नेष्टा ॥ उक्थ उकश्च उको ॥ लच्च उकौ चेति विग्रहः ॥ उकारेणारन्नो विशेषणात्तदन्तविधि स्तदा
हो इन्दुरलंकारिष्णुर्वेति ॥ शेषषष्ठीति ॥ एते न इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥ अपि वागधि
पस्य दुर्वचं वचनं तद्विदधीत विस्मयमित्यादि व्याख्यातं ॥ ये तु इक्ष्वाकूणां सिद्धय इत्यन्वयः ॥ न तु इक्ष्वाकूणां
दुराप इति ॥ तथा वागधिपस्य विस्मयमिति प्रन्वयः ॥ ननु वागधिपस्य दुर्वचमिति ॥ तुल्यार्थैः ॥ कथं
तर्हि तुलां यदारोहति दन्तवाससा इति कालिदासः ॥ स्फुरोपमं भूतिसितेन शम्भुनेति माघस्य ॥ उक्ते तोसा
युक्तेऽप्रधाने इति तृतीया ॥ स्वबालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः इत्यत्र यथा ॥ उक्ते

किंचाहूरांतिकार्थेति सूत्रस्यदाप्यनुवर्त्तनात् अधिकरणेपि तद्बोध्या॥ कस्येति॥ इदमस्मत्तः श्रोत्रविषयवर्त्तिभूमिर्यस्यकातस्य स्पर्श॥

म॰ २॰

११७

हि॥ गिर नापि नयोगं न नीयेति॥ व्याख्यानमिति॥ सूत्रे उथे शाब्दस्य पश्चिमिस्तं॥ नयाच हूदूएवायं॥ न तु अर्थ शब्दन
बहुव्रीहिरितिभावः॥ इति षष्ठी॥ ॥=॥ आधारस्त्रिधेति॥ एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं॥ चतस्रस्वेति॥ प्राति
पादिकार्थमात्र इति भावः॥ हेतु तृतीयेति॥ तादर्थ्ये चतुर्थी त्वपि बोध्यं॥ सीमेत्यादि॥ एतच्च दुर्गवाक्यप्रबोधबु
लबंदेणोक्तं॥ मेदिनीकारोप्याह॥ सीमामावाटस्थितिक्षेत्रेषु कोशेषु च स्त्रियामिति॥ अथ पुष्कलकोगंध
मृगे स्यात्पराकीलकयोरिति च॥ हरदत्तादयस्तु॥ पुष्कलकः शंकुः सीम्नि सीमज्ञानार्थं हतो निहतः निखा
त इत्याहुः॥ यस्य च॥ निर्ज्ञातकाला क्रियान्यानिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वात् लक्षणं॥ तद
अव्ययोः कर्तृकर्मणोर्बोधकादियं सप्तमी॥ तत्र ब्राह्मणेषु अधीयानेषु गत इति कर्तृषुदाहरणं कर्म एव॥
गोष्विति॥ स्वल्प अधीयमानानां ब्राह्मणानां दुह्यमानानां गोषु नैवं च प्रतीयमाने लक्षकत्व विशेषणीभूतयोर्धा
यु… क्रिययोर्विवक्षितेति॥ भेदश्चेति॥ ननु शब्दस्य … सामान्यरूपाक्रान्तेति भावः॥ साधुरश्चेति॥
नयत्रा॥ वा रूभेत्यादा विवसामान्यविशेषभावः॥ किं तु शब्दापात्तयोर्धर्मयोर्विरोधएव॥ निपुणेऽसाधुरिति॥
साधुशब्दप्रयोगे तु अर्चां विनापि सप्तमी भवत्येव साध्वसाधुप्रयोगे चेति वार्त्तिकात्॥ प्रसित इति॥ तत्पर
प्रसितासक्तौ वित्यमरः॥ स्थलेनेति॥ न सूत्रेणोपयुक्तः कालस्थाने लुब्विशेष इति लुप्॥ पर्यायेणेति॥ ईश्व
रस्याधिभावप्राधान्यः॥ यस्येश्वरस्येश्वर उक्ते तस्याप्युपरं॥ एवं चेति व्याख्याभेदात् पर्यायेण विभक्तिः सा च विशेषणा
त्पष्ठीवत् इति भावः॥ इति सप्तमी॥ ॥ समर्थानितरेति॥ सूत्रे समर्थशब्दलाक्षणिक इति भावः॥ कति

त्रिव:

११७

स्वामिन ईश्वरत्वमुच्यते इत्येकं व्याख्यानं यस्येति स्वं निर्दिश्यते यस्य॥

ण्येति॥ यद्यपि उदात्तवता गतिमता च तिङा गते समासो नित्याधिकारे वृत्तिकारेणोक्तस्तथापि नासौ नि
यतः॥ ॐनयत॥ अभिप्रभरघृषते त्यादौ समासादर्शनात्॥ अत एव भाष्यकृता सेनेयोगवि
भागेनायसाधितः यथोत्तरं मुनीनां प्रामाण्यमिति भावः॥ सचेति॥ एतदपि योगविभागस्य प्र
सिध्यर्थत्वादेव लभ्यते॥ छंदस्येवेति॥ एतच्च संप्रदानसंज्ञासूत्रे पदमंजर्यां स्पष्टं॥ यदि हि लोकेपि सा
त्तर्हि अभिषेनीत्यादौ समासात्स्वादयः स्युः॥ पचतिकल्पमित्यादौ तद्धितान्तात्सुप्॥ न च लिंगस
र्वनाम नपुंसकताभ्युपगमेन निर्वाहः॥ पचतु कुन्नेत्यादौ ह्रस्वापत्तेः प्रकुर्वीत्वन्यत्र न लोपाप
त्तेः॥ निर्देशादिति॥ अन्यथा हि विषयमात्रे दृष्टत्वाद्विशेषणमपि उपसर्जनसंज्ञायामन्वर्थत्वेन सर्वश
स्यैव पूर्वनिपातः स्यादिति भावः॥ एवेनेति॥ अयमपि समासः पूर्ववत् कथंचिन्नकाएव॥ नेनञ्जीमू
तस्पचत्यादौ नेत्तिरीयाणां पृथक्पदत्वेन पाठः॥ उद्धृहुरिव वाम न इत्यादौ व्यस्तप्रयोगश्च संग
च्छते॥ गोस्त्रियोः॥ उपसर्जनस्येति॥ यत्तु द्वाचोगीतरस्वीप्रत्यययान्तयोरुपसर्जनयोरित्युक्तं॥ तन्न
चित्रगुरित्यादौ गोशब्दस्योपसर्जनत्वेपि तदन्तस्यानथान्तत्वात्॥ गौरीपतिरित्यादावतिप्रसंगाच्च
अयं सुगोकुलराजकुमारीपुत्र इति वत्॥ स्मृगु॥ उपसर्जनस्य समसंबंधिकतया स्वर्पयवचात्तेपदि
स ह्रस्वो विधीयते तदर्थं च निपतंतरपदभूतयोर्गोस्त्रियोर्गौरीभावस्तेन ह्रस्वत्वं पञ्चगौरिनि॥ ह्रस्वं

सर्वलिंगसा
धारणत्वर्थः ५

हे १

तेन नित्यग्रहेप्य तदेव रूपं ॥ दिश्याद्याहस्य अरहदिषु पाठाच्च ॥ वचनसामर्थ्यादिति ॥ विभक्तौत्पन्ने तस्तुवं ते
न सहसमासस्तद्भूरको भूत्वैव विभक्तिर्गच्छेत ॥ संनिधानात् तदर्थद्योतकस्याधिरिति भाव ॥ परिशि
ष्टतु प्रथमान्तेनायं समासः षष्ठ्यन्तेन वन्यापि पदद्वयमपि स्थितं ॥ यत्तु श्रायोक्तं । हरौ अधिरूत्येति विवि
ग्रहहराववधिस्थित इति ॥ तन्न । नित्यसमासत्वेन विग्रहायोगात् ॥ यदाहुः ॥ अविग्रहो नित्यसमास इ
ति ॥ ननु अस्वपदविग्रहोपि स्त्री क्रियते कुंभंकारो कारो नीतियथा । यमपितथास्तु अधिरूत्येतिल्यवं न
स्य समासाड्विशिष्टस्य सत्वादिति चेत् न समासार्थलेशमपि अबोधयतस्तस्य विग्रहत्वेव शास्यैवासंभ
वात् ॥ यत्तु व्याचख्युः ॥ विग्रह एव विग्रहः अर्थकथनमात्र ॥ तेनाविग्रहान्नित्यसमासत्वेन विरु
॥ अत एव समास प्रकृतिभूतमलौकिकवाक्यांतरं दर्शयन्ति ॥ हरौ अधिस्थितः नीति ॥ अत्रेदं वक्तव्यं ॥
विग्रह इवस्येवासंगतं । अर्थकथनवाक्यस्यैव विग्रहत्वे न ततो भेदाभावात् ॥ अर्थकथनमात्रमि
त्यपि न ॥ ल्यवंते न समासार्थासंस्पर्शात् ॥ अरो अधि तीति ॥ अलौकिकमित्युक्तंतदपि न ॥ तत्र हरि
ङि रत्तस्यैव प्रवेशात् ॥ अनारंभनपीतिन्यायात् ॥ अन्यथा समासे हरी शब्दकारस्य दुर्लभत्वापत्तेश्च ॥
यदपि व्याचख्युः ॥ अलौकिकत्वं हि नित्यविधांतरप्राप्तिविषयत्वेनापरिनिष्ठितत्वं ॥ न तेनावन्मात्र
णानु ननु शिष्टयासप्तसमासः । अलौकिकत्वादवाधिशब्देनाभि इतो पि सप्तमी अन्यथा सा न स्यात् ॥ अन

न्प्रवेशः सूपपादः ॥ अनित्रसंगात ॥ यत्तु नत्सौत्रेण व्याख्यातं तन्निङ्‌न्यञ्चितसमासे इति परिगणनाद्यधिनामिति पि
तत्समोनि ॥ नत्र ॥ परिगणनस्याकरव्याख्यातत्वात् ॥ कर्मणिक्षिपीतिसूत्रेऽव्ययमपि तथैवोक्तत्वाच्च ॥ क्रमादमुनाऽ
ऽत्यवाधिसहत्यादिप्रयोगाविरोधाच्च ॥ द्वितीयापञ्चम्योरिति ॥ एतच्चाहितनन्त्रेयुस्पष्ट ॥ यत्तु वदन्ति ॥ चैत्रस्य वनादागादि
त्यादिसापेक्षत्वादसमासे चारितार्थत्वादिहाधान सामर्थ्यनास्तीति ॥ तच्चिंत्य ॥ नित्यसमासस्य न्याय्यत्वसंतिचे
त्रस्यत्यादौविशेषणयोगस्यैवासंभवात ॥ उक्तं हि भाष्ये ॥ इत्त्रस्य विशेषणयोगोनेति ॥ ननु सविशेषणा
नां वृत्तिर्नेत्यपि भाष्य उक्तमिति चेत्सत्यं ॥ अनित्यसमासविषयं तत ॥ नित्यसमासस्यापि सविशेषणत्वे वृत्तो
महतः कुंभस्य उपरि इत्यादाप्रयोगनं ॥ यत्तु प्राचा वृक्षस्योपरीत्युक्तं ॥ यद्वा व्याचख्युः ॥ इहशब्दक्रियावाक्ये स्थितः
तित्तदुभयमपि प्राग्गुक्तरीत्या ध्रुवमादिकमेव ॥ सप्तमीति ॥ सप्तमीत्यव्ययमिदं नीमित्यर्थः ॥ एवं नाहि प्रसं ती
टानीमधुनासांप्रतं तथन्समरः ॥ तत्राधिकरणशक्तिप्रधानत्वात्क्रियापदेनैवान्वयाद् ॥ निषेधोपि क्रिया
याएवनंदनदाः ॥ युष्पत इति ॥ असंप्रतीति ॥ इतोनुयुज्यतिक्रियांनानुभवतिदध्योदनइत्यत्रउपसेचनक्रिया
यथा ॥ यत्तु प्राचोक्तं ॥ असंप्रतीतिसंप्रत्यभावइत्यर्थः ॥ अनेनोपभोग्यवस्तुनोयोवर्तमानः कालः तस्यै
वनिषेधः क्रियत इति तन्न ॥ अधिकरणस्य निषेधप्रतियोगित्वेनान्वयस्यसर्वतंत्रविरुद्धत्वात् ॥ नानाहि भूत
लेघटोनास्तीति नभूतलं निषिध्यत इति कश्चिदभ्युपैति ॥ न चात्रु क्तिसप्तमीमनासांतावत ॥ इति इति ॥ स्व
रूपपरेणाषष्ठ्यंतेन नहरिशब्देन सहप्रकाशार्थस्येतिप्राध्वस्यसमासः ॥ त्रतिशब्दस्यनित्यत्वाद् ॥ नामस्यद्द

संदर्तं प्रतीत्यत्र सापेक्षत्वे न समासाभावो द्वितीयापि विधानं सावकाशमिति ॥ तत्प्रागेव दूषितं ॥ रदत्तत्वाद् ॥
अर्थमर्थं प्रतीति भाष्यकारप्रयोगाद्वाक्यमपि साधु ॥ यद्वा ॥ नात्राप्यर्थे वीप्साद्वित्वेति किं तर्हि कर्मप्रवचनी
यत्वात्सं वं धमवाप्य नित्यं वीप्सानुरुद्धवचनस्योत्पत्तिः ॥ सहपूर्वाह्णमिति ॥ साकल्येऽव्ययीभावः ॥ गुणाभ
निर्णीति ॥ यदिसादृश्य इति नोच्येत तत्रायं न सादृश्यं प्रधानं तत्र वस्यात् ॥ अव्ययार्थप्राधान्यस्याव्ययीभा
वे स्योत्सर्गिकत्वादिति भावः ॥ अन्तरिति ॥ इह तीमे नावाक्यदर्शोध्यत इत्यस्य इतियावत्तः प्रदेशस्य पूरिग्रहः इत
या स्तदपेक्षासमासग्रहणं तो ग्रहणं तेन भूवहितः ॥ इत्यासकलेष्वप्ययनेन भवतीति साकल्यात्पृथगुच्यते ॥ साग्नीति
॥ अग्निशब्दस्य दर्थं ग्रंथे वर्तते सन्नीयात्तः समस्यते पर्यपाग्निनाससहेति प्रयोगादयमेव तथापि सा
त्यमात्रे तथा ॥ अन्तत्व विवक्षायां तु समासो नित्यः ॥ अन्तर्वाग्निग्रंथपर्यन्तमिति अस्वपदविग्रह
दर्शितः ॥ यत्तु अग्निरन्तोस्येति ग्रंथमात्तेनाग्नेरन्तत्वमिति षष्ठ्यन्तेन वा विग्रह इति ग्रंथमात्तेन षष्ठ्यन्तेन वास
मास इति ॥ तन्न ॥ सहशब्दस्यान्तवाचकत्वाभावात् ॥ अन्तत्वस्य तु सुतरामलाभात् ॥ तस्माध्ययनेनान्वया
त् ॥ सह युक्ते तृतीया यां न्यायप्राप्ता ॥ सन्तृणम् [illegible] तीत्यत्र साकल्यस्य वसाग्नीत्यत्र अन्तत्वस्यापि सा [illegible] त
स्यात्यतयात्तत्र तृतीयान्तेन समासं स्वीकृत्य परत्वात्परित्यागस्य निर्मूलत्वात् ॥ यावद्भुक्तमिति ॥ यावदि
त्यव्ययं समस्यते विग्रहस्तु तद्धितेनेति अस्वपदत्वं बोध्यं ॥ विभाषाधिकारे नदीतिन्यायसिद्धस्यैव लिंगदर्शनमि
दम् ॥ इदिषु भादिसंज्ञानामिव समाससंज्ञाया अपि नित्यप्रसक्तत्वात् ॥ वचनं विनाविधान्तरमपि च संज्ञाना

सहशब्दस्य वाचकत्वस्य ५

भूतपूर्वे चरडिति सूत्रे

मपि विकल्पाभावात्॥ स्यादेतत्॥ सुप्सुपेत्यपि तर्हि त्यं निष्फलं त्र चेष्टापत्तिः॥ अपसिद्धान्तात्॥ तथाहि॥ चार्थे द्वंद्वः सूत्रे वृत्तिकृ
ताकं पूर्वं भूतो भूतपूर्वः सुप्सुपेति समास इति। तथा। शाकलसूत्रे सिन्नित्यसमासयोः शाकलप्रतिषेध इत्यत्र नि
त्यग्रहणेन नार्थः॥ इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्व इति भाष्यकैयटोव्याख्यानात्॥ वाप्यश्व इति सुप्सुपेति
समासः॥ संज्ञायामिति समासस्य नित्यत्वात् सिद्धः प्रतिषेध इति। तथा अनुदात्तं पदमेकवर्जम् सिद्धवदत्रेत्यादि
सूत्रेष्वपि कैयटे स्पष्टं॥ अत एवाह सुप्सुपेति त्विति॥ समासेति योगविभागेनैव सिद्धे उत्तरसूत्रेः पुनर्विधानं
प्राचीनस्य काचित्कतां ज्ञापयति॥ एवं च द्वन्द्वेन समासस्यापि काचित्कत्वात् [illegible] इत्यादि सिद्धं भव
ति॥ इवेनेति वार्त्तिकं तु यद्यपि कुत्रापि न पाठ्यं तथापि सुप्सुपेत्यत्र … त्वमेव नित्याधिकारस्मारितमिति कै
यटः॥ एवं स्थिते इवेन समासस्य षष्ठ्यादसत्वं कल्पयन्तः प्रत्युक्ताः॥ जीमूतस्येवेत्यत्र बहुव्रीहिः समासाभ्युपगमेपि ते
त्तिरीयेर्थ्यस्यैव पाठादिति दिक्॥ अपपरिवहिः॥ अत एव ज्ञापकाद् इति योगे पंचमी ज्ञापकासिद्धं न सर्वत्रेति न
…कस्य कुत्र भवति इति दिसिद्धं॥ आबालमिति॥ यत्तु आपरमाणोरा भूगोलकमिति निर्के … एवं लघायुक्तं त
त्वामादिकं॥ समासमध्ये यकारप्रयोगासंभवात्॥ आभूगोलकादिति तु पाठः॥ यथार्थमिति॥ सूत्रे तु य
दिति सामान्ये नपुंसकं अव्ययं विभक्तीत्यनेन सिद्धं विभाषार्थे सूत्रे नेन पदेन स्यात् इत्युदाहार्यं॥ अ
नुगमिति॥ रहस्यामालेत्यं … चानुनाय्यानते॥ लक्ष्यं तु समासार्थ॥ अत एव दारा… स्याः समाना
धिकरणेपि॥ एवं स्थिते फलितमाह॥ गंगादेर्घ इति॥ … वरं च न तत्र नन्दन… ष्ठोदकं॥ नस्य

सा५

२५

म० र०
१२०

अदूरेभवा अदूरभवश्चेत्यत्र ॥ आदिशब्दः ॥ एवं पदान्तसंज्ञायामिति णत्वं ॥ रिढा नेति ङीप् ॥ नदीभिश्च ॥
स्वरूपस्य संज्ञानयाश्च नेत्यग्रहणं बहुवचनेन निर्देशात् ॥ किन्त्वर्थस्य ॥ न च नद्यस्य समासः संभवति ॥ अन
न्तरहीविनामयं समासः ॥ [illegible]
[illegible] ॥ तेन न केवलं विशेषशब्द एव किन्तु साम
न्यशब्दोपि ॥ नित्यसमास इति ॥ एतच्च रत्नैस्सपट्टं ॥ शाकलसूत्रे केयरहरदत्तस्वरसोप्ये वा नन्वेवं न्यायसा
म्याद्बहुव्रीहेरपि नित्यसमासत्वं स्यादिति चेत् ॥ मैवं ॥ यस्य त्यादिपदान्तरसमभिव्याहारेणान्यपदार्थप्र
तीतेः ॥ अत एव संज्ञानवगमादित्युक्तं न त्वन्यपदार्थानवगमादिति संज्ञायां किं शीघ्रगोदशः ॥
अथाव्ययीभावे साधारणं न समासान्तानाह ॥ अव्ययी ॥ समासान्त इति ॥ समासस्य समासार्थोत्तर
पदस्य वाचरमावयव इत्यर्थः ॥ तेनोपशरदमित्यत्र नाव्ययीभावादित्यम् ॥ छित्वुरीत्यादौ द्विगोरिति ङीप्
सिध्यति ॥ जरायाः इति ॥ गणसूत्रं ॥ प्रतिपरे वा ग्रहणाः परमिति ॥ अविषयस्त्वर्थः ॥ इति विषये अक्षि
शब्दः इन्द्रियमात्रपरः ॥ समक्षमिति ॥ अक्ष्णोयायं ॥ नदी ॥ इह स्वरूपस्येव ग्रहणं न संज्ञायाः ॥ पौर्णमास्या
ग्रहायणपाः पृथग्ग्रहणात् ॥ उपनदीत्ति ॥ रजभावे नपुंसकह्रस्वः ॥ इदं त्ववधेयम् ॥ नदीभिश्चेति सूत्रे विशे
षाणामिव स्वरूपस्यापि ग्रहणं विशेषाणामेव तत्र मानाभावादित्ते तेन पंचनदमिति सिध्यति
अत्र चनिमा वा तदुक्तं गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदीतिग एतच्च संज्ञायामन्वयेनेत्यत्रानुजिति

त्यपि ५

ङिवङा॥
१२०
120

लु २

योगविभागात्सिद्धमाहुरित्याशयेनेति ॥ अन्यतरस्यां ग्रहणस्य प्रकृतत्वादिति भावः ॥ २ ॥ नाव्ययीभावः ॥ द्विगोस्तत्पुरुष
त्वे फलमाह समासांत इति ॥ पंचराजमिति ॥ गोः ॥ जाहतिनिष्टश्च ॥ उत्तरपदस्यानकारांतत्वात्तद्भावाभावः ॥ समासार्थो
त्तरपदेनोत्तरपदे समासांता इति पक्षपाताद्दित्वं बोध्यं ॥ काशिकायां तु पंचराजीति ङ्यविकल्पः पाठः ॥ स इति स्पष्ट
तः ॥ श्रितादीति ॥ श्रितादीनां यद्यपि सत्वाधनसुबंतत्वं संभवति तथापि अन्यत्रापि समासस्येष्टत्वा
त् श्रितादयस्तदंत इति समुदाये लाक्षणिकाः ॥ प्रायेण समास तद्धित प्रकरणेष्वेवमेव ॥ खट्वाक्षेपे गर्गादि
भ्यो यत्र इत्यादि सामान्यापेक्षज्ञापकात् ॥ नहि खट्वान्तस्य द्वितीयांतत्वं गर्गादीनां षष्ठ्यंतत्वं वा संभवति ॥
येन विधिरिति सूत्रस्थ भाष्यरीत्या तथापीष्यमाणं ॥ नत्रकेयरस्त्वदत्तादीनां तु महानदप्रमादइति शब्दकौ
स्तुभे प्रपंचितमिति भावः ॥ यत्तु वदंति ॥ श्रितादीनां सुबंतत्वनगतिकारकोपपदानामिति सुबुत्पत्तेः प्राग
व समास इष्टः ॥ अन्यथा कष्टश्रितेत्यादि न सिद्ध्येदेतावकिलप्राचां श्रितादिभिरित्येव व्याख्यानं न तु सु
बंतैरितीति ॥ तन्न ॥ प्रधानस्यौत्रत्यपरनादिनियमाभावेन कष्टश्रितस्य निर्बाधत्वात् ॥ यदपि श्रित
शब्दे दपि कष्टश्रितस्यादिति तदपि न सापेक्षत्वेनासामर्थ्यात् ॥ गतिकारकेत्यादेस्तु नायं विषयः ॥ कर्त्तृ
करणे कृते तिबहुलमिति द्वितीयाश्रितेति सूत्रे कारकतद्धितयोरनुपादानादिति दिक् ॥ कष्टमिति ॥ इह श्रि
तादिषु गत्यर्थत्वात्कर्तरि क्तः ॥ अयनं प्राप्तिराप्तिस्वर्गतिरेवनफलं ॥ अत्यासतिस्तु व्यतिक्रमः ॥ सापि
गति विशेष एवेति प्रांचः ॥ यद्वा श्रितरत्यादीत्यादिकर्मणि क्तः ॥ ग्रामंगमीति ॥ गमेरिनिरित्यौणादि

य५

करणिः ॥ स च भविष्यत्काले ॥ भविष्यति गम्यादयः इत्युक्तेः ॥ अकेनोरिति योगलक्षणषष्ठीनिषेधात्क
र्मणि द्वितीया ॥ गत्यर्थकर्मणीति सूत्रे द्वितीयाग्रहणस्य योगलक्षणषष्ठीबाधनार्थतामाहुस्त
द्भाष्यविरुद्धम् ॥ भाष्ये तत्सूत्रप्रत्याख्यानाय योगे षष्ठ्या एव स्वीकारादित्यन्यत्र विस्तरः ॥ खट्वारूढ इति
जाल्मो ऽसमीक्ष्यकारी स्यादित्यमरः ॥ वेदव्रतानि वसमाप्य समावर्तनेन हि खट्वारोढव्या ब्रह्मचर्य एव भू
मिशयनादेरपि यः खट्वामारोहति स जाल्मः ॥ रूढ्यायं ते न खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः स
र्वोपि खट्वारूढ उच्यते ॥ अनतरावोर्नित्यमिति ॥ मासप्रमित इति ॥ माङ् माने ॥ आदिकर्मणि क्तः कर्तरि च ॥ इह
प्रतिपच्चन्द्रेण नास्त्यत्यन्तसंयोगः ॥ मुहूर्त्तमिति ॥ मुहूर्त्तव्यापीत्यर्थः ॥ क्रियाविशेषणं ॥
कालाध्वनोरत्यन्तसंयोग इति द्वितीया ॥ तृतीया तत्कृतार्थेन गुणवचनेन ॥ तच्छब्देन तृतीयान्त
परामर्शिना तदर्थो लक्ष्यते तदर्थकृतत्वं च गुणवचनस्यार्थद्वारकं विशेषणं एवं स्थितं फलितमर्थमाह ॥
तृतीयान्तार्थेत्यादि ॥ तृतीयान्तार्थकृतगुणवचनेनेत्यर्थः ॥ धान्येनेति ॥ करणे तृतीया ॥ अर्थ्यते इत्यर्थः प्रयो
जनं ॥ अर्थनमर्थः अभिलाषो वा ॥ अर्थशब्दस्य रूपत्वेनु धान्येनेति तृतीया ॥ पूर्वसदृश ॥ इह समसदृ
शाभ्यां योगे तुल्यार्थैरिति तृतीया ॥ अन्ययोगे तु हेतौ चेति ॥ अत एव वचनाद् ॥ इह सदृशग्रहणं व्यर्थं
षष्ठीसमासे न गतार्थत्वात् ॥ न च तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यं ॥ सदृ
शप्रतिरूपयोः सादृश्य इति स्वरेण न सिद्धेः ॥ ऊनार्थेति ॥ पूर्वसूत्रे ऽर्थशब्देन समासस्य साधितत्वादिह

र्थग्रहणमनभिधेयपरं तत्र द्वन्द्वो नक्तं दिवं संबध्यते न तु षष्ठ्यादिभिः समस्यत इत्याद्यौपादानादिति भावः ॥ भद्रेण मिश्री
करणम् ॥ खरं विशदमभ्यवहार्यं भक्षं ॥ खरं कठिनं विशदं विविक्तावयवं । यत्नत्यन्तं तस्य प्रकरणं तस्य च भक्षय तेश्च
तत्रैव प्रयोगात् ॥ गुणात्तरेणेति ॥ एतच्च कार्त्तिकं सर्वं गुणकार्त्स्न्ये इति सूत्रे पठितं ॥ पूरणं मिति ॥ अत्र षष्ठ्या
ष्टि न समासप्रसंगः तदपवादत्वात् षष्ठी प्रतिषेधेषु च द्विजेन तरमनुष्येभ्यः ॥ नेषं ससामान्यशब्देनोपादाने
तयानान्विहाय अनुवृत्ति तकल्पना पा: अव्याप्यत्वात् ॥ अथ कथं पुरुषोत्तम इति निर्धारणे यस्मान्निर्धार्य
तेयस्य वेकदेशो निर्धार्यते यस्य निर्धारणहेतुरेतत् त्रितयसंनिधो सत्येवायं निषेधः इति द्विवचनविभक्त्यादि
सूत्रे कथयः ॥ यद्यपुरुषेषु उत्तम इति निर्धारणमत्यापा संज्ञाया मिति समासः ॥ न चैवं निर्धारण इति प्रथ
त्यभेदात् ॥ सप्तमीसमासो हि शौण्डैः परत्वात् षष्ठीसमासस्तु अंतोदात्तत्वं स्यात् ॥ पूरणगुण ॥ अत्र
प्राचोक्तं एतदर्थैः षष्ठी न समस्यते इति ॥ तन्न । एवं हि सुहितार्थानामेव ग्रहणं स्यात्तावतामेवार्थश
ष्ठेन समासस्तत्वादिति ध्वनयन्नाह ॥ सदादिभ्यश्चेति ॥ अव्ययादव्ययः पूरणार्थ प्राधान्य प्रत्यय एव
गृह्यते [illegible] मेकार्थसंभवादिति ॥ तत्र [illegible] नादि प्रत्यय विशेषणं पूरणार्थत्वे [illegible] भादिवत् संज्ञास्
वेलक्षमास्त्रियेनोक्तापरिभाषावकाशमासाद्येत ॥ कुतस्तर्हि पूरणप्रत्ययान्ताः षष्ठ्यादयः एवेति गण्यं तेन
तु पूरणं भवादिशब्दाद्रपि चेत् ॥ लोपे च स्यादपूरणमिति निर्देशादित्यव हितेन न कुंभपूरणं भवः [illegible]

तत्राहि मिक्षाभिक्षाद्गतायमिलादौ पूरणे वेति निषेधमाशंक्य नैतत्पूरणप्रत्ययांतं भनेनत्स्यर्थवपलाभिसुक्काएतदपिपूरणप्रत्य
यांतमेव। कथं। पूरणं नाम पर्दनमाहती महाशंकुः अतः पूरणं यो सौ पूरणं नाक्त्वार्थे भागेः सोपि पूरणमेवेति पुनराक्षिप्य एवं ताहि

म॰ ग॰

१२२

रित्यादि सिद्धं कथं नर्हि नालं गुरुषुष्टं किंतिसेकनानीति ॥ प्रमाद एवायमित्येके ॥ वस्तुतस्तु छष्ठवरुः ॥ तुंघ्रात्म
कः षष्ठ इति व्याख्येयं ॥ यत्तु पूरणे निखर्यतेनेनाधिकार गतिः ॥ अयं तु भाष्यार्थकवृत्त्ययोगत इति ॥ तत्राऽत्र
त्ययांते नापि निषेधस्तृद्धितीयं तनीयेति स्त्रभाष्य एव स्पष्टत्वात् ॥ अत एवाभिहाद्धितीयमित्यादौ अन्य
तरस्यांग्रहणं सामर्थ्यात् षष्ठीसमास इति तत्रोक्तं ॥ ननु ब्राह्मणस्य शुक्लाइत्यत्र समास प्रसंग एव ना
स्ति ब्राह्मणशब्दस्य दंतैरेवान्वयात् । ब्राह्मणशब्दस्य यद् दंतास्ते शुक्ला इत्यर्थादत आह्यदेति ॥ शुक्ल
शब्द एव विशेषणसमर्पक इति भावः ॥ यत्तु भावप्रत्ययांतो गुणवाच्यत्र निषिध्यते इति प्राचोक्तं ॥
तत्र ॥ उक्तोदाहरणस्य भाष्यारूढस्यासंगतित्व प्रसंगात् ॥ यदपि सदा गुणवाचिनो न निषेध इति ॥ तद
पि न ॥ भावप्रत्ययांतस्य सदा गुणवाचित्वया पूर्वग्रंथविरोधात् ॥ यत्तु व्याचक्षते ॥ भावप्रत्यादभावप्र
त्ययांत एव निषिध्यत इति नार्थः किंतु भावप्रत्ययांत एव सन्यो गुणमाह तदभावे तु गुणं गुणिन
च स्तु शुक्लादेरेव निषेधने ॥ सदेति ॥ अंतरेणापि भावप्रत्ययं यो गुणमेव वक्ति गंधादिशब्दस्तस्य न
निषेध इत्यर्थ इति ॥ तदपि क्लिष्टं पुनरुक्तिग्रस्तं च ॥ काकस्य कार्ष्ण्यमित्यादावव्याप्तेश्च ॥ उक्तव्या
ख्यायां हि शुक्लादीनामेव निषेधो लभ्यते न तु शौक्ल्यादीनां ॥ न हि शौक्ल्यादिशब्दाः भावप्रत्ययं लब्ध्वा
पि कृष्टं गुणमाहुः ॥ न चा तदभावे गुणं गुणिनं च किंतु अंतरापि भावप्रत्ययं गुणमात्रपरत्वाद् पर

शि॰ व॰

१२२

122

स गंधो दिक्षु श्लुल्पाण्वानवशौल्स्य मितिभावप्रत्यययोस्तेवेति वाच्यं। तस्य गुणकस्तम्भादिशब्दैर्ले
धतेपि शैत्यादिशब्दैरलब्धत्वादन्यथा तद्भोगेन्द्रियादिस्वर्गर्थैनैव सह विरोधापत्तेरिति। अ
वाह नैराकुलनीयं॥ यदि तु प्राचोगंधोपियो न्यस्यन्यायहसंहीस्थ्ययोज्यत॥ सदस्मादिना वद्य
थाकृतं चंदनगंधस्तु दारुहरणं वा अस्यापर्यादश्च थम माह भवेति॥ ननु अस्तु नामेयं योज
नाभ्याकरमेयथा तु नयमेना यान्सिद्धं नोपलभ्यत इति चेत्। शृणु। स एव गुणार्थद्रव्यनेन केव
लगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादकोऽग्रहणेन। व्याप्तिन्यायात्॥ काकस्य कार्ष्ण्य प्र
तिगुणस्य गुणस्तु इति दृष्टा भाष्ये उदाहरणत्वं॥ चंदनगंधस्त्यादौ तु निषेधप्रसंगेन तस्यैव गुणेऽरि
ति वचनेन न समासस्तिति प्रसूयते॥ गंधत्वेन हि प्रतीयमाने हि गंधो न कदापि गुणेन समानाधि
करणः किं तु स्वप्रधानमेव तत्स्थ्या नतु वर्ड इति जलमियंपि नाहि गंधानिति प्रयोगदर्शनाद
गुणमिदं इति चेन्न॥ तत्रापि हि गंधानिति न गुणशब्दः मालतीकुसुमादिषु दर्शनात्॥ किं तु चंदनत्वादि
जातिनिमित्तकोऽन्य एव सः तस्माच्चंदनगंधस्त्यत्र तत्स्थ न सुस्थमेव॥ एवं परस्परूपमित्यादावपि सुरभि तु
ल्याद्य शब्दस्तु न तस्य गुणप्रतिपादकाः॥ एवमपि शौत्यसौरभ्यादिभिः शब्दैः सह समासो दुर्वार इ
ति चेन्नैवं। तेऽपि तु शुक्लत्वादि प्रकारकाण्व गुणबोधः। तद्रूपापन्नानां चंद्रव्यसामानाधिकरण्यमस्त्येव॥

मि

म॰ २॰

१२३

सुप्लुः सुरभिरित्यादावपि दिक्कु॥ कलानामिति। करणस्य शेषत्वविवक्षायां षष्ठी। आसनस्य करत्वेनेना
दृष्यरूपसंबंधस्य स्पर्शमात्ररूपेणाविवक्षायां षष्ठी॥ आसनसंबंधिनीया क्रियासदनं न शमित्यर्थः॥ इ
त्याशीतितथा च भट्टिः। यत्र तेनैशीन्निगृहीमः स्यादयाकिं रूमेभागाः कुंभकर्णलयाविनेत्यादि॥ अने
केमन्यपदार्थ इति सत्र्येसर्वपश्यादिति भाष्यप्रयोगो परिहारानुकूलः। संहितेति॥ केयदुरुदत्तो नु
अव्ययप्रतिषेधे रुद्रस्योपरिलुप्तदुरं नो चत्वर स्थापनेनानुप्रतिषेधं मन्यते॥ स्वरभेदइति। रुदु
तरपदस्येति स्वरेणान्तेन स्वरस्यैवावस्थानात्॥ अन्तरस्वरेनरुद्रसव्ये न तु मध्योदात्तत्वं स्यादि
ति भावः॥ नदकस्यनादि॥ यत्तु प्रावामुदाहरणं॥ राज्ञोन लूस्येत्यादिय वसमर्थं न संनिसमासे पूर्व
निपातानियमः स्याद्विशेषणसमासस्तु स्यादेवेति॥ अत्रेदं वक्तव्यं॥ विशेषणविशेष्यभावकामचा
राद्व्यवस्थायां प्राप्तायां प्रधानमुपसर्जनमित्यन्वर्थनामाश्रित्यज्व्याश्रितत्वेन गुणादीनाम
प्राधान्यात् द्रव्योपेतया गुणादीनां विशेषणत्वेनियवस्थापतेन च षष्ठीसमासे पि सुवच मितिकिंत
न्निषेधेन॥ तेन पूजायाम्॥ पूजाग्रहणमुपलक्षणमित्याचष्टे॥ मतिबुद्धीति॥ भूतइति॥ न च तन्न कौंडि
न्यायेनमत्यादिभ्यः क्तस्य वर्तमाकाले भूतकालक्तं बाधतइति वाच्यं। तेनेत्यधिकारे उपलक्षत इति निर्देशे
नाग्बाधनात्॥ न च क्तानार्थ एव ज्ञापकं पूजितो यः सुरासुरैरित्यादि प्रयोगानुरोधेन सामान्यविषयकत्व

शिवः॥

१२३

123

स्यैवंन्याय्यत्वादित्यनुन्यासकारः॥ अन्ये तु का कथं द्याः एतस्मात् समासनिषेधोऽयं॥ शेषषष्ठ्या तु समास इत्याहुः॥
एतेन कलहस्य नाममहितः॥ न वर्त्मनि नि भाद्विश्वयोगोऽपि व्याख्यातः॥ इदमेषामिति॥ क्तोऽधिकरणे च ति
क्तः॥ अधिकरणवाचिना क्तेन योगे कर्तरि षष्ठी॥ अधिकरणे चेत्यवसिद्धस्य वद्दृष्यपि वा विग्रहणं स्पष्टार्थं॥ कथं
तर्हि किं च त्रयरूत्तमिति॥ नायमधिकरणे क्तः किं तु कर्तरि किमारूत्तमित्यत्रमित्यर्थः॥ कर्मणि च॥
उभयप्राप्तौ कर्मणि षष्ठी॥ एवं तर्हि तृजकाभ्यां निषेधो व्यर्थः स्यात्॥ तस्मात् च व्ययानामनेकार्थ
त्वात्॥ इनी त्यर्थक एवायं च न दाह॥ कर्मणीति प्रायुक्तेनि॥ सप्तम्येकवचनान्तं पदमुच्चार्य या षष्ठी वि
हिता ताः परिज्ञापिता चेत्यर्थः॥ नियमस्य रूपेण विधिरूपेण निषेधरूपेण वेति द्विधा प्रवृत्तेः स्वीकृत
त्वात्॥ तृजकाभ्यां॥ इह कर्तरीत्यकस्यैव विशेषणं न तु तृचः अव्यभिचारात्॥ तथापि उपरं जकस्य मा
त्रमभिप्रेत्याह॥ कर्त्रर्थ इति॥ जयादित्यस्तु कर्तृषष्ठ्या इति व्याचष्टे॥ तन्मते तृजन्तरार्थ इति कल्प्यः स्यात्
किं तु तृजकयोरेव विशेषणमिति युक्तं तयोः अतत्वात्॥ न तु षष्ठ्या इति भावः॥ शेषषष्ठ्या इति॥ केचि
त्तु जनिकर्तुः प्रकृतिस्तत्प्रयोजको हेतुश्चेति निर्देशादनित्योऽयं निषेध इत्याहुः॥ न्यासकारस्त्वाह॥ त
न्नमेनन्तानलोकेति षष्ठीनिषेधस्त्वनित्यः तृजकाभ्यामिति वक्तव्यं तच॥ सानुबन्धकस्य ग्रहणात्
ज्ञापकादिति॥ पूर्वापर॥ एकदेशिनैकाधिकरणे॥ अत एव तस्य कर्मधारयत्वेऽपि ततोऽमत्वर्थीयः॥

सूत्रस्य सापेक्षत्वान्न समास इति चेत् न यद्यपीह एकगोत्वादिति ठन्न प्रसङ्गस्तथापि अत एव निर्देशादिति नेदं तदाह
अवयविना ॥ ननु किमनेन न सूत्रेण कर्मधारयेणापि पूर्वकायादि सेत्स्यति । उद्धकायवत् समुदाय
वृत्ताः शब्दाः अवयवेष्वपि वर्तन्त इति न्यायादत आह । षष्ठीत्यादि ॥ न चात्र कायपूर्वमुख्य सिद्धयो
गव्यापृतत्वेपस्तुत्वमिति भावः ॥ ननु इह षष्ठी दुर्लभा । अन्याराद् इति पञ्चमीप्रसङ्गात् । तत्र हि दिशि दृष्ट
शब्दो दिक्शब्द इति व्याख्याने न सत्रत्वादिग्वृत्ति नापि योगे पञ्चमी स्याद् तेनेति चेत् सत्यं । अवय
ववृत्तिभिर्योगे षष्ठ्येवेष्यते ॥ तस्य परमाम्रेडितमिति लिङ्गात् ॥ पूर्वं नाभेः कायः पूर्वो भागः सकाय
स्यावयवस्त्यर्थः ॥ नाभेरिति दिग्योगलक्षणा पञ्चमी । अत्र पूर्वस्य भागस्य नाभिरवधिः । न त्वेकदे
शिनी अतो नाभ्या सह समासो नेत्यर्थः ॥ कायेन तु स्यादेव पूर्वकायो नाभेरिति । पूर्वशब्दस्यानि
त्यसापेक्षत्वात् प्राधान्याच्च । पूर्वं छात्राणामिति ॥ समुदायसमुदायिसंबंधे षष्ठी बहुवचनं तु उ
पन्नावयवभेदसमुदायविवक्षायाम् यथा छात्राणां पञ्चम इति न ततः छात्राणामेकदेशित्वे सत्य
पि एकत्वसंख्याविशिष्टाभावान्न समासः ॥ सर्वोऽपीति । पूर्वादिभिरत्रापीत्यर्थः ॥ ज्ञापकादिति ॥
न स्यन्यथा सापरत्वममस्योपपद्यते । न चोरुकायवत् सामानाधिकरण्यमनिर्वाहः शक्यः ॥
अहः सर्वैकदेशेत्यादिना विहितस्य समासान्तस्य अह्नोऽह्न एतेभ्यः इत्यन्हादेशस्य चैकदेशिसमा

सं विनानुसन्धेरिति भावः ॥ हस्ताकृतेरिति ॥ नचैवं दिङ्मध्योरात्रमध्यमित्यादि न सिध्येदिति वाच्यं ॥ ज्ञा
पकासिद्धस्यासार्वत्रिकत्वात् ॥ यत्तु प्राचोक्तं । सर्वलोकदेशेनाह्नः समास इति । तन्न ॥ एकदेशस्यतृ
तीयानिर्दिष्टतयापरनिपाताभावप्रसङ्गात् धर्मिग्राहकमानविरोधात् । यदपि पाठान्तरं सर्वलोकदेशिना
ह्न इति तदपि न । अह्नः एकदेशिना वृत्तेनैव तस्य समास इति सं भवति ॥ अर्द्धं नपुंसकमिति ॥
क्लीबइति ॥ अर्द्धमिति निर्देशादेव क्लीबत्वे लब्धे नपुंसकग्रहणं नित्यनपुंसकार्थमित्यर्थः ॥ खं
डमात्रवाची तु त्रिलिङ्गः ॥ भित्तं शकलखण्डे वा पुंस्यर्द्धोर्द्धं समेंऽशके इत्यमरः ॥ अत्र वा पुंसीति
द्वयोरितराभ्यासबध्यते । तत्र शकलखण्ड इति रूपभेदात् क्लीबत्वनिर्णीतेव वचनात् पुंस्त्वविकल्पे
स्त्रियामिति फलितं । नन्वेवं खण्ड इति स्त्रीलिङ्गमेव किं न स्यादिति वाच्यं ॥ भिन्नलिङ्गानां न द्व
न्द्व इति नेन परिभाषितत्वात् ॥ शकलस्यास्त्रीति निर्देशेनैव निर्णयात् ॥ अर्द्धमिति रूपभेदात्तु
स्त्रीत्वगतौ समानामपि वा पुंसीति न द्विकल्पेनाविशेषात् स्त्रीनपुंसके लभ्येते ॥ आगवादीति
॥ अर्द्धयवित्रा समस्यत इत्यादीत्यर्थः ॥ अर्द्धं पिप्पलीनामिति ॥ इह अर्द्धपिप्पलीति ग्रासं पर
वल्लिङ्गतानिर्देशोऽपि वचनातिदेशाभावात् ॥ विशेष्यरूपाश्रयेति भावः ॥ कथं नर्द्धपिप्पल्य इति ॥
इति ॥ अर्द्धपिप्पलीनामिति विग्रहे मा भूत् । खण्डसमुदाये तु भविष्यति ॥ अर्थात् पिप्पली

वर्धरूपेण्य कोमलो वेत्यादिविग्रहात्॥ एकदेशिनेति किं॥ अर्द्धं पशोर्देवदत्तस्य॥ अत्र देवदत्तः स्वामी
नत्ववयवीति न तेन समासः॥ एतच्च परवल्लिंगमित्यत्र भाष्ये वृत्त्या ख्यातं॥ तथाहि॥ अर्द्धपिप्प
लीति कर्मधारयेण सिद्धं॥ समुदायेशब्दाः प्रवृत्ताः अवयवेपि वर्त्तन्ते इति न्यायात्॥ समविभागाद
न्यत्र रित्वाय्यवषेवगतिः॥ अर्द्धाहारः॥ अर्द्धजरतीयं॥ अर्द्धवैशसं॥ अर्द्धोक्तविलोकितमित्यादि
दर्शनात्॥ समप्रविभागे षष्ठीसमासं वाधितुमिदं सूत्रमिति वाच्यं॥ षष्ठीसमासस्यापीष्टत्वा
दिति॥ तथा च कालिदासः प्रायुङ्क्त॥ पूर्वार्धशरीरार्द्धंरो शाङ्गरस्येति॥ द्वितीयतृतीय॥ तृषेधवाधि
त्वेति॥ भाष्यकारास्तु परवल्लिंगमिति सूत्रे न त्रैरूपः पञ्चह राद्रितु प्राप्तेत्यादि निषेधवार्त्तिकं पूर्वाप
रेत्यादि विसूत्रीच प्रत्याचख्युः॥ नन्वेतं भिक्षार्द्धितीयादि सिद्धये पूरणेत्यादि निषेधस्यानित्यत्वम
आपणीयं संख्यापूर्वमा रात्त्वादित्यादि निर्द्देशात्॥ सामान्यापेक्षयाज्ञापकता च॥ एवं सतितांनु
च्छ षष्ठ्या पि सिद्धं॥ प्राप्तापन्ने॥ अत्र चकारेणाविधेयसमुच्चया॥ र्थत्व स्वकार्यस्त्वेषानुमानात्॥
प्राप्तापन्ने समस्यते॥ अवच्छत्व चनयोः स्यादिति भाष्यस्थितं॥ अत्र चकारात्पूर्वमेव अकारं छित्त्वा
सावत्वात्स्वाकृतिभावानेति प्राच॥ इसंकेशप्रिरत्नाद॥ द्वितीययाश्रितो प्राप्तस्त्रीति॥ एका
दशास्य पूर्वी तेत्व न पूरणाद्वितीयं विशिष्टपरिभाषया वा प्राप्तापन्नयोश्चावतयोरपिसमासः॥

कालाः परिमाणिना ।। परिमीयते परिच्छिद्यते येन तत्परिमाणं परिच्छेदकं ।। तद्वान्परिमा णी तदाह ।। परिच्छ
द्यपरिच्छिनत्ति कालाइति ।। कालविशेषवाचकाइत्यर्थः ।। कालसामान्यस्यापरिच्छेदकत्वात् ।। मासोजा
तस्यपयस्येति ।। षष्ठीसमासे प्राप्ते वचनं ।। ननु जातः पुरुषस्तस्य च हस्तविन्तस्यादिकं परिच्छेदकं न तु कालः
तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत्सत्यं ।। साक्षात्क्रियां परिच्छिन्नेनापि कालस्तद्द्वारा देवदत्तं परि
च्छिनत्ति ।। यस्य हि जननाद्द्वे मासौ गतः स मासजात इति व्यवह्रियते ।। तत्र व्यवहारकालजननक्रि
ययोरन्तराल भावी मासो जननक्रियाजातमपि परिच्छिनत्त्येव ।। इह विग्रहे षष्ठीनिर्दिष्टस्यापि [illegible] प्राधा
न्ये बाधयितुं यस्य स इत्युक्तं ।। अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः ।। एवं बहुव्रीहावपि वैणावा
न्परो विशेषः ।। इह तु जातशब्दान्मासौ चित्रगुरित्यादौ तु द्वाभ्यामपि शब्दाभ्यां प्रथमैव समानाधिकरण
नाबहुव्रीहिरिति वक्ष्यमाणत्वात् ।। विशेषणविशेष्यभावस्य त्वासेने कार्यीभाव इति तुल्यं ।। यत्तु
मीमांसकास्त्रिरात्राणां गयामयं स्वाम इति विग्रहः ।। तत्रेदं वक्तव्यं ।। उक्तरीत्या वृत्तिवाक्ययोः सर्व
प्रधानार्थसाम्यलाभेपि षष्ठ्यर्थं बहुव्रीहेः पञ्चविधेपि कर्मकारणादिप्राधान्यस्याभिमतस्यालवि
प्रहादलाभात् ।। वृत्तिवाक्ययोर्भूतानन्वितरूपः स्यात्तु तविग्रहः प्राप्तोदकोग्राम इत्यादौ कर्तृकर्मणोः
समासेनाभिहितत्वात्तत्कारकविभक्तिरित्यादिसिद्धांतस्य निर्विवादत्वात् ।। किं चालौकिके प्रविष्टा
नामेव पदानान्तरे परिनिष्ठितानां लौकिकेपि प्रवेशसंभवे उपस्थितपरिमाणेनानुपस्थितकल्पनमन्याय्य

मसांप्रदायिकंच॥ तदनुगुणत्वायैव पदं न प्रद्वेषगोरवं नु फलमुखत्वान्न दोषावहम्॥ अत एव वाक्यार्थ
तत्पदं तानुशाष्येनत्रिषयेपिति॥ लौकिको वाक्यभेदेन विग्रहो द्वन्द्वसमेत ः अथवा लुन छन्दः प्रधा
नार्थसाम्यमपि च संसर्गिकमिति त्पज्यता॥ तथाहि रामा॥ काचिद्गुणप्रधानत्वमर्थानामविवक्षि
तमितुपक्रम्य॥ व्याख्यातं नतद्धि तार्थस्य यत्किंचिदुपदर्शकं॥ गुणप्रधानभावस्यतत्र दृष्टो विपर्यय
इत्युक्तं॥ नह्वितयस्तांस्तनामपुपलक्षणं॥ तेन आह्निकः॥ वैयाकरणः पाचकइत्यत्र अनस्त्यादी
नाविग्रहस्वाक्यादौ नीहोदाहरणं॥ स्यादेतत्॥ चित्रगुदाणीतिसमासतद्धितद्वयोर लौकिके प्रक्रि
याकाक्येपि च॥ चित्रागोदण्ड इत्यत्र चाद्यः षष्ठ्यन्तार्वेनिमीमांसकाद्यपदंतिचेन॥ मैवम्॥ शेषाव
द्व्रीहि त्रिकतः शेषः अस्ति सामानाधिकरण्यमनुप॥ समर्थानां प्रथमादित्यादिभाष्याविरोधेन
द्वन्द्वे एवतत्त्वदुर्लभत्वादिति दिक्॥ प्रकृतमनुसरामः॥ उत्तरपदेनेति॥ परिमाणपुत्तरपदेनतु कश्चिदु
सिद्ध्यवयन्नात्पुरुषो वक्तव्य इत्यर्थः॥ सुप्सुपेत्येकत्वस्याविवक्षितत्वाद्बहुवचनं॥ अन्त्यादशाइ
ति॥ त्रिपदतत्पुरुषान्त्रसमुत्तरपदपरतावाक्यत्रहि गोसनीतिभावः॥ सप्तमीशौण्डैरिति बहुवचन
निर्देशाद्गुणपाठसामर्थ्याच्चार्थग्रहणमितिरित्यभिप्रेत्याह॥ शौण्डः प्रवीणः॥ इह गणेऽक्षा सङ्गि
रूपो त्रियार इत्यवक्तन्नर्भवन्ति तद्रूपकं च सामर्थ्या॥ यथा दध्यादिन गुणेंड धायामादौ॥ तेनकारकाणां

क्रियायोर्वसंबंधस्तन्निनियमस्यभागमात्रेति बोध्यं ॥ अधिशब्दइति । आधेयप्रधानस्यतुअव्ययी
भावएवअधिहरीतियथा ॥ अन्तःशब्दोप्यत्रपठ्यते ॥ सचाधिकरणप्रधानोमध्यरत्यर्थे
तद्योगवृत्यविनआधारत्वविवक्षायांसप्तमीयथारहस्यरवेति ॥ वनेंतोवनान्तर्वसति ॥
यत्तुआधिकरणत्वमात्रवृत्तिरन्तःशब्दस्यविभक्त्यर्थेऽव्ययीभावोनित्यसमासः ॥
प्रतिरन्तरितिरणार्थं अन्तर्वणंग्यसुहृदत्तेनोक्तं तत्पुरुषस्यवैकल्पिकत्वात्पक्षेऽव्ययीभावइ
ति ॥ तच्चिंत्यम ॥ तत्पुरुषस्यवैकल्पिकत्वेपिअव्ययीभावस्यनित्यत्वात् नेयन्तरितिवदुक्तवि
ग्रहस्यैवासंगतेः ॥ किंचविभक्त्यर्थमात्रेऽव्ययीभावःवचनग्रहणसामर्थ्यात् ॥ अन्यथाव
हिस्योपरीत्यादवविग्रसंगाच्च ॥ तत्कथंवाचिनः प्रसंगः कियात्र क्रियायाकालत्रंगतुविभक्त्य
र्थेनरेवावयवस्यसमासःसन्निधानात् । तस्मामर्यादेचनिपातेनाभिहितेपिसप्तमीतिस्थित
म् ॥ नचैतद्दिहास्ति अव्ययविनाआधारत्वविवक्षायांसप्तमीतित्वयैवोक्तत्वात् लिंगादिकमाय
इत्याकुः ॥ अन्तःशब्दाधिकरणप्रधानस्तत्सामानाधिकरण्यात्नामसप्तमीवनरूपमध्यरत्यर्थ
ता ॥ वनेमध्येनान्तर्वसति ॥ पूर्वपदार्थप्रधानेतुअव्ययीभावः ॥ वनस्यमध्येऽन्तर्वणमितिगत्र
त्रैतस्यकल्प्यम ॥ सामानाधिकरण्येसप्तमीत्यसंगताव्यधिकरणसमासप्रकरणात् ॥ विशेष
केविशेषणेनसमनेवगतार्थत्वात् ॥ केचमध्यमाचीनाव्ययीभावोदुर्लभःलक्षणाभावात् ॥

अथाव्ययमिति योगविभागेन कथं विधिर्दुष्पूलिङ्गत्वेऽव्ययदिशमिति यथा नाईं तथैव वहापि नित्यस-
मासत्वाद् विग्रहस्तस्मात् ॥ तथा च वचनस्यानरिति हेतुक्तिर्विस्तरधेन ॥ द्विक्संख्यस संज्ञायां ॥ नित्य-
मार्थमिति ॥ कथं तर्हि त्रिलोकनाथेन सता मखद्विषस्तिकादासः ॥ त्रैलोक्यशब्दस्य संज्ञात्वान्न
च समाहारे द्विगुः ॥ द्विगोरिति ङीप्प्रसङ्गात् ॥ न च पात्रादित्वं कल्प्य ॥ यादि त्रिलोकीगणे नापरास्मा-
दित्याद्विप्रयोग विरोधात् ॥ न चोत्तरपदे इति समासः ॥ त्रिपदतत्पुरुषस्यैव दुर्लभत्वात् ॥ अत्रोच्य-
ते ॥ लोकशब्दस्त्रैलोक्यसमुदायपरः अत्रयवयो लोकास्त्रैलोकः शाकपार्थिवादिः ॥ एतदुद्धि-
गुलुग नपत्य इति सूत्रे भाष्ये एवं स्पष्टं ॥ एतेनन चरमरूपं विराजित्यादि व्याख्यातं ॥ तद्धितार्थ ॥
एकापि सप्तमी विषयभेदाद्भिद्यते इत्याशयेनाह ॥ तद्धितार्थविषये इत्यादि ॥ सर्वनाम्नो वृत्ति
॥ तद्यद्भूर्वापरो दाहरणो न पियायपित्रियाः ॥ पुनरिति नेनापिवरतनिर्वाहः सिद्धः ॥ मध्यापि
दक्षिणः पूर्वत्वादि सिध्यर्थं सर्वनाम्नस्तावश्यकं प्रतिमुत क्वादिष्वपि स्वाथ्यमिति भावः ॥
प्रागमत्वरे इति ॥ मातुरुत्संख्यासंभद्रपूर्वाया इत्युक्तेः द्विगोर्लुगनपत्ये इति लुग्न ॥ विकल्पोऽप्राप्ति इति ॥ प्रा-
चां गृह्ये मतुपस्त्योत्तरं ॥ ... यथा ... समासे कृते अपदार्थोपसंक्रमेण परस्परसंबन्धाभा-
वात् द्वन्द्वतत्पुरुषयोः प्रामेतस्या वचनाभिदमिति वाध्यम् ॥ तत्र तद्धितार्थेति सूत्रे एगोत्तरपदे परत-

नुरुषो वचनसामर्थ्यात्सिद्धः । एकार्थीभावसत्वादेव तन्नित्यत्वापि सिद्धा ॥ नहि महाविभाषापि
सत्पूकार्थीभावसंज्ञायां वैकल्पिका ॥ न च संज्ञाया भावाभावौ विकल्प्येते इति भाष्यविरोधात् ॥ किन्तु वै
कल्पिके कार्थीभावविषये नित्यैव तत्संज्ञा ॥ इह तु वैकल्पिकत्वांशो बाधितः ॥ एवं च वार्त्तिके तत्
पुरुषत्वग्रहणं ज्ञापकसिद्धार्थानुवादमात्रं ॥ अत एव खट्वादिरतरग्राम्याभितिकर्मधारयोत्तरपदो बहु
व्रीहिः । न तु त्रिपद इति समर्थसूत्रशेषे कैयटोक्तं संगच्छते पुंवद्भावसूत्रे निपातनयाः सिद्धयदितथा
क ॥ अत एव चित्राजरद्गुरिति संगच्छते ॥ पूर्वकाले कत्पाद जरद्गुवादौ रुतार्थतया भूतपूर्वगत्यार
रयोगाद्धिरितिदिक् ॥ द्वन्द्वस्योदाहरणं तु वाक्चर्षद्ध प्रियेप्रस्य वाग्दृषदप्रियः ॥ छत्रोपानत्प्रियः ॥
इह त्रिपद बहुव्रीहौ रते पूर्वयोर्नित्यं द्वन्द्वः ॥ नेन समासान्तष्टजपि नित्यमेव ॥ यत्तु पूर्वतंत्रे बाधत्व
स्रगोपृष्टस्य युगपद्द्विधेरकारु वृद्धिसामत्वमित्यधिकरणे पृष्ठः षडहे रहद्दयंतरसामकार्ये इत्युद
रतद्द्वंरत्वा बहुव्रीहिरि निपूर्वपदत्वंरचयित्वा तत्रापदं भक्तयाकात्यायनवचनमिदमुपन्यस्तं ॥
यत्तु नहद्वन्द्व इति सिद्धान्तपिकात्यायनवचनं तु समासान्तरुत्तविशेषमात्रविषयमित्युक्तं तदुभय
मपि चिन्त्यं ॥ उत्तरपदस्तु क्तेद्वंद्वं स्वत्वे तस्या संगतेः ॥ स्वरविशेषस्य स्पष्टतया समासान्तपर्यन्तमाश्रवी
भावा ॥ संख्यापरवोद्विगुः । अनात्करणे । अयं भावः ॥ पूर्वसूत्रविषये च यत्संज्ञानंतरस्य पन्यायात्

प्रष्टस्य षडहे
स्तुक्रमेण रथंतं
र वृहत्त्वे राजशी
करै रेवतानि सामा
नि विधीयंते । तत्र
पृष्ठः षडहो वृहद्रथं
तर सामा कार्य इति
द्विसामत्वं विधीयते ५

पूर्वतंत्रे पूर्वमीमां
सायां वा चलक्षणे
दशमाध्याये ॥

एतदर्थमेव हि नत्र योगविभागः ॥ २ ॥ उ ॥ अन्यथा दिक्संख्ये संज्ञायामिति मार्योत्तरपदसमाहारे इत्येव ब्रू
यात् ॥ तेन सप्तऋषय इत्यत्र इगंतकालेति पूर्वपदप्रकृतिस्वरो न भवति किं तु समासांतोदात्त एव ॥ न
थ्याचलस्यं ॥ सप्तऋषयस्तपसे यो निषेदुः सप्तऋषीणामुत यो नु लोक इत्यादि ॥ सनपुंसकमिति
॥ एतच्च मूले एव व्याख्यास्यते ॥ कुत्सितानि कुत्सनैः ॥ कुत्सनप्रवचनपणो मत्यादिसूत्रे चकारस्यानुक्तस
मुच्चयार्थत्वात् ॥ वर्तमाने क्त इत्याशयेनाह ॥ कुत्स्यमानानीति ॥ तदर्थकानीत्यर्थः ॥ वैयाकरणखस
चिरिति ॥ सूचयतेरचः ॥ यः प्रश्नः सन् प्रश्नं विस्मारयितुं खं सूचयति स्म प्रेतो निर्मलं गगनमिति स एव
मुच्यते ॥ दुर्दुरूढ इति ॥ दुल उत्क्षेपे ॥ दुःपूर्वः ॥ औणादिकः कुरुप्रत्ययः ॥ बहुलमन्यत्रापीति णिलुकु
रलयोरैक्यविषया तस्माद्रूपम् ॥ विशेषणस्य पूर्वनिपातार्थं संज्ञाप्रायणात् एवमेव ॥ शाकपार्थिवानीति कु
त्सायामेवार्थसंनिधानात् ॥ तेन हि नामिमासकादौ द्वन्द्वः ॥ पूर्वसूत्रेति ॥ पापाणकशब्दौ कुत्सनाभिधायिनौ तयोः ॥ पूर्वसू
त्रेण समासे परनिपातः स्यात् ॥ तस्मात् पूर्वनिपातार्थमिदं सूत्रमिति भावः ॥ लाङ्गूलिकामिति भावः ॥ अत एव सामान
धिकरण्यान्मृगी वचपलामृग ॥ चपलेयादौ पुंवद्भावः उत्तरपदोपस्थितस्यामत्वचापलादिद्वारकमेव सादृश्यं गृह
ति सान्निधानात् ॥ नागर्थो विवेत्यादावपि हिंसानिहितसंपृक्तोदिद्वारकमेव सादृश्यं प्रतीयते कथं तर्हि उपमानपरत्वं तिचे
नमूलपूर्वगत्या शक्यार्थमादायेत्याचेहि ॥ सामान्यवचनत्वं चोपमानोपमेयसाधारणधर्मविशिष्टोपमेयपरत्वं बोध्यं ॥ उ

पमितं। कथं भाष्याब्धिः काप्तिगंभीर इति कैयटः। सामान्यप्रयोग सत्वेन स्याप्रवृत्तेः उच्यते। इत्थं गांभीर्य्यं राशा इत्यर्थ
नविवक्षितं किंतु वितत दुःखगाढत्वादिना तस्य चाप्रयोगोस्त्येवेति निर्बंधः समाप्तः॥ विशेषणं॥ ननु वि
शेषणं विशेष्यभावे कामचारत्वाच्च कपाठकादाविव नीलोत्पलादावपि अव्यवस्थितः पूर्वनिपातः स्या
दिति चेन्न॥ अत्राहुः जातिशब्दस्य गुणक्रियाशब्दयोः समभिव्याहारे विशेष्यसमर्पकत्वेव मतेन नीलोत्पल
वाचकत्वात्सत्त्वए इति व्यवस्थितत्वाच प्रयोगः। गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चानियम
एव। खंजकुब्जः कुब्जखंजः॥ पाचकपाठकः पाठकपाचकः खंजपाचकः पाचकखंज इति अत्र च मूल
मुपसर्जनमिति महासंज्ञा॥ अप्रधानमुपसर्जनं गुणक्रियोभयद्रव्यं तत्प्रधानं स्पष्टमेवेति। यद्वा विशे
षणविशेष्ययोः सर्वापेक्षतया अन्यतरोपादानमात्रेणेतरापेक्षासंभवेदुभयोपादानं विरुद्धं विशेषण
परिग्रहणार्थं निरुक्तिः अत्र गुरुतं भाष्यकारादि व्यवहारादवसीयते॥ पूर्वापर। अपरस्येति। एतच्च पश्चा
दितिसूत्रभाष्यस्थितं॥ वाकुलकादिति एकेषु मुखेषु वीरयते पराक्रमते इति वा बोध्यं॥ श्रेणि। कृतादिति॥
एकेन शिल्पेन पण्येन वा ये जीवंति तेषां संग्रहः श्रेणिः॥ कृताकृतमिति॥ एकदेशकरणं तत्त्वं। एकदेश
तरस्याकरणं तदेवाकृतं॥ सन्महत्॥ गुणक्रियाशब्दैः सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रं॥
तत्पुरुषः॥ समानाधिकरण इत्यसंज्ञायां व्यंजनं॥ औपचारिकं वा॥ सामानाधिकरणपदद्वयसमर्थः॥ भाषितपुं

म०र०
१२९

स्कादित्यादि ॥ ८ नञ्स्त्रियाः पुंवदितिसूत्रे स्फुटीकरिष्यते ननु तेनैव कर्मधारये सिद्धं जातीयदेशीययोस्तु
तसिलादिष्विति सिद्धं ॥ तत्किमनेन सूत्रेणेत्याह ॥ पूरणीत्यादि ॥ तथेत्यादि ॥ स्त्रीपुंसलक्षणेति ॥ स्त
नश्मश्र्वादियुक्ता स्त्रीयोरित्यमरव्याख्यानात् ॥ १२८ तत्तु नपुंसकयोरित्याह ॥ तत्र मूलं मृग्यं भ्रमर
णां नपुंसकपर्यायेष्वपृथगेवास्य पाठात् ॥ कठधूर्त्तरूति ॥ नात्र कठत्वकुत्स्यते ॥ अतः कुत्सिता
नि कुत्सनैरिति तार्थता न शंक्या ॥ वृत्तिनिमित्तं कुत्साया मेव तस्याः प्रवृत्तेः ॥ कथं तर्हि [illegible] ति ॥ कु
मुदश्रीति धूर्त्तवकोवालमत्स्यानामिति ॥ नकधूर्त्तः शति युक्तं सत्यं ॥ प्रसादएवायमिति प्रामाणिकाः ॥
प्रशंसावचनैश्च वचनग्रहणं रूढिशब्दपरिग्रहार्थं ये तु यौगिकाः ॥ प्रशस्तशोभनरमणीयादयः
ये च विशेष्यवचनास्तेनिमृद्वादयः ये च गौण्यावृत्त्या प्रशंसां गमयन्ति सिंहो माणवक इत्यादयः ॥
ते सर्वे पुदस्यन्ते ॥ कुमारः ॥ ८ तद्वेति ॥ एवकारः स्फुटसिद्ध्यर्थं तेनार्थः [illegible] पकान्तरस्यापि संभवात् ॥ तथा
ह्युवाजरतीतिसूत्रे जरतीग्रहणं लिंगान [illegible] पुवनशब्दस्य युवत्या जरती सामानाधिकरण्यं न्याय्यं ॥ य
तु अश्वादिभ्यः पचादिघो पुंसि जातरति ॥ सूत्रे पुंसीत्युक्तिः [illegible] सापि कोति तन्न ॥ ११ कृदंतस्य पूर्व
तग्रहणेन त्वापकस्य मूलशैथिल्यात् ॥ ननु [illegible] मंडूकप्लुत्या जातिरित्यनुवर्त्तते तेन नेह नकाल
ती गर्भिणी ॥ ननु भातु किं [illegible] गर्भिणी ॥ [illegible] उदाहरणे विशेषणमिति समासः स्यादेव पूर्वनि

शिव०
१२९
129

निपातनविशेषः॥ मयूरव्यंसकादयश्च॥ चकारोऽवधारणार्थः समासान्तरं व्यावर्त्तयति॥ धूर्त्तेति॥ तथा च
गुणवचनत्वात्पूर्वनिपाते प्राप्ते इदं वचनमिति भावः॥ अमेत्याहुः मयूरश्च व्यंसकश्च मयूरव्यंसकः॥ उप
मानानि सामान्यवचनैरिति सिद्धे पुनर्विधानं तत्पुरुषतुल्यार्थेति स्वरो मा भूदिति॥ स च पूर्वोपमान
शब्दे न विहिते समासे प्रवर्त्तते॥ अश्नीतपिबतेति॥ इह क्रियारूपस्यान्यपदार्थस्य प्राधान्यात्क्री
त्वाद्याप्॥ एवमग्रेऽपि॥ राजान्तरमिति॥ अन्तरशब्दो भिन्नवाची॥ मात्रं कार्त्स्न्येऽवधारणे॥ अन्नं मात्र
शब्दाभ्यां सह नित्यसमासः॥ नञ्॥ उत्तरपदार्थप्रधानोऽयं समासः॥ नञ्यपि आरोपितत्वं नञ्द्योत्यमत
आरोपमात्रं वा विषयत्वं तु संसर्गः॥ तथा च॥ अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधः॥ अर्थ
ब्राह्मणाभिन्न इति पर्यवस्यति॥ अत एवानुपसर्जनत्वाद् नञ्मिन्नित्यादौ सर्वनामकार्यं सिध्यति॥
तत्पुरुषस्योत्तरपदार्थ किं तु उत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधं॥ एतत्तदोरिति सूत्रेऽनञ्समासग्र
हणं चेह लिङ्गं॥ मीमांसकास्तु ब्राह्मणभिन्न इत्यादिर्बोधो बोध इत्याहुः तन्मते असर्वत्यादेः अतिस

य४

र्वेत्यादिसमत्वात्सर्वनामसंज्ञाकार्यं गणकार्यं च न स्यात्॥ यत्तु तत्सादृश्यमभावश्च तदन्यत्व
तदल्पता॥ अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः इति पठित्वा अब्राह्मणः॥ अपापं अन
श्वः॥ अनुदरा कन्या॥ अपशवो वा अन्ये गोअश्वेभ्यः॥ अधर्मः इत्युदाहरंति तन्न यथायथं आर्थिकार्थ

म. र.

१३०

मभिप्रेत्य कथं विग्रहे यः सर्वथा इति नञ्समासस्योत्तरपदप्राधान्यं भाष्योक्तं नान्यथापि तत्संगच्छते॥ अत एवानेकमन्यपदार्थे
त्यत्रानेकशब्दादेकवचनं प्रयुक्तं॥ भाष्येपि सम्यग्नेनकयासन्नतायां यानि कथं तर्हि एतन्नत्यनेके जलधेरिवोर्म
य इति॥ उच्यते॥ अध्यारोपितैकत्वानामनेकत्वमर्थ तथा नञ्वाक्यवद्बहुत्वाभिप्रायं बहुवचनं॥ यत्तु समुदाय
बहुवचनं॥ स्योश्चोपात्तद्भेदनेकमनेके स्तनाः॥ अनेकस्यानेकस्यैकशेषात् यत्तु प्राचीनप्रक्रियाव्याख्या
तारः आहुः॥ नञ्विशिष्टेनानञ्पदेन साहचर्यादयोलक्ष्यते इत्यादि तत्त्वकौमुदीयसंदर्भविरुद्धं व्याकारविरुद्ध
ञ्च॥ यत्र पि विचारचिन्तामणावुक्तं॥ समासे नञुत्तरपदप्राधान्यमसमासे तु अतत्॥ नञर्थमिलितं तत्र सदृशादौ
निलद्वत्पदे इति॥ तदप्युक्तरीत्या भाष्यविरुद्धमिति स्पष्टमेव॥ यदि तु स्यात् तन्मेवाक्तं तर्हि कथंचित्समर्थ
यितुं शक्यं॥ तथा हि॥ अस्तु लक्षणैव तथापि नञ्समासे उत्तरपदप्राधान्यप्रयुक्तं कार्यम् शालपूरुष अतनञ्स
मास इति ज्ञापकात् उपपद्यतेऽपि तत्रार्थानुपपाद्यस्य अस्थि ताद्गतिन्यायात्॥ समासे त्विति निवदन् वाक्ये नञ
ऽसमस्तत्वात् क्रियायैवान्वय इति ध्वनयति॥ यतः संबोध्यनाम्नः सत्त्वार्थाः कारकं प्रथमावाचिनः धातुसंबन्ध
धिकारे निष्पन्नमसमस्तनञ्॥ तथा यस्य च भावेन षष्ठी चेत्युदितं तद्द्वयं साधुत्वमष्टकस्यास्य क्रियायैवावधारि
ताः युक्तं चैतत्॥ त्वं पचसि पुत्रः पचति इत्यादौ नञ्समभिव्याहारे क्रियायाः एव निषेधप्रतीतेरनुभवसिद्ध
त्वात्॥ भवति प्रयोगेऽपि नत्वैवन्याय्यत्वात्॥ घटो नास्ति घटो नास्तीः अत्र तत्र नास्मीत्यादौ वचनपुरुषव्यवस्था

श्रिव१

१३०

130

र्शनाच्च ॥ अन्यथाऽप्यभावेऽव्ययीभावस्य दुर्वारत्वाच्च ॥ यत्तु भूतलाचयत्वाभाववान् घटः स्यादित्यर्थवर्णनं तन्न कि
यानन्वये कारकविभक्तेर्दुर्लभत्वात् ॥ तस्मात्कारकविशिष्टक्रियायां नञर्थेऽन्वयः शाब्द इत्येव तत्त्वं ॥ भाष्यवा
र्त्तिकेऽनुपलक्षणात्सांप्रदायिकरीत्या पूर्वपदार्थप्राधान्येऽव्ययीभावः उत्तरपदार्थप्राधान्ये तत्पुरुष इति वि
षयविवेकस्य सुलभत्वात् ॥ यत्तु वदन्ति पदार्थाभावे समासाभावेन नञ्वर्त्तेनेनात्ययीभावः ॥ अभावविशेष
विवक्षायां तत्पुरुषोऽस्त्वेव तस्य नञर्थत्वाभावेन पूर्वपदार्थप्राधान्यासंभवादिति तन्न ॥ पापाभावो
पापमितिसोऽस्तु तत्पुरुषोदाहरणेऽपि अभावत्वेनैवाभावभानेनाव्ययीभावस्य दुर्वारत्वात् ॥ यद्यपि विशे
षस्य नञर्थत्वं नास्तीति तदपि न ॥ निर्विशेषस्य सामान्यस्याभावात् ॥ विशेषरूपेण वाच्यत्वं नास्तीति
चेत् ॥ तर्हि अविघ्नमित्यादिरव्ययीभावोऽदत्तजलांजलिरेव स्यादिति न किंचिदेतत् ॥ नञो नलोप इति ॥
तिङः तेन समासाभावात् प्राप्तेऽलौकिकवचनात् अपचसीति कुत्सितपचसीत्यर्थः ॥ नशब्देनेति ॥ नञा समासे न
नबाधेत एवं भवतीति भावः ॥ ऊर्यादिच्विडाचश्च च्विडाचयोर्भ्वस्तियोगे विहितौ ऊर्यादयोऽपि स्वभावात्तत्रैव
प्रयुज्यन्ते तत्रापि आविः प्रादुः प्राक्षेऽनुक्तमेषां करोतिनैव योग इति माधवादिग्रन्थेषु स्थितं तत्येवोप्रादु
रित्तु ॥ उरी इत्येति ॥ आविः शब्दस्य तु साक्षात्प्रभृतिषु पाठात् कृञो योगे गतिसंज्ञाविकल्पः भ्वस्तियोगे तु
अनेन नित्यमिति विशेषः कथं तर्हि चारुणीमदविशेनसयाविष्कृतुषोभवदसाविचरागः इति माघः ॥ ऋ

म. रु.
१३१

भवत्युगयद्विलोलजिह्वायुगलीढो भुपस्य कुम्भागमा विरिति चनिं कुञ्जाः कवयः इति हरदत्तः नत्तु नत्तुने
प्राग्धाता रितिस्य अस्य प्रयोगे नियमार्थत्वेन तेनुपपत्तावपि संज्ञा नियमार्थत्वप द्वेदोषलेशोप्यन
स्तीति प्रपञ्चितं शब्दकौस्तुभे एतेन पुरो रामस्य जुह्वां चकार ज्वलने वपुरिति भट्टिर्व्याख्यातः ॥ इतं
परिग्रहेणेति इत्वागमं नेहि धाहत्व स्वत्कापरिग्रह एवेति ज्ञाप्यमुदाहरणं द्वितीयपञ्चमुदाहरणं ॥ अपरि
ग्रहस्ते चप्रयोगोपाधिः ननु चाभ्यसो टिनिविस्मिति भावः ॥ करणेत्वेनेति ॥ अतिशयेनाभिलष्य
तं स्विरन्निपर्यन्तं पिवतीत्यर्थः तेनास्य प्रध्याय अपागमा नत्त्वे तिख्यातो गम्यते प्रत्युदाहरणं तु क
रणत्वागतः सूक्ष्मस्तुला नवपवः करणः तस्मिन्न तत्त्वेन्यर्थः ॥ पुरस्कृतेति ॥ न मसुरसोरिति सत्वे
कथं तद्धि अमुपुरः पय्यासिदवद्दो मितिस्थितमिम्प्रध्याहारे राद् द्विः प्रत्यगतिस्वात् ॥ एतेन तस्य
स्थित्याकथमपि पुरः कौतुकाधानहेतोरिति व्याख्यातं ॥ असंचज्यामिति किं ॥ असंचाङ्लिन्ना इ
त्यर्थः ॥ अदः इत्येति ॥ यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणं ॥ ऐ तर्हि अन्तर्धौ कैतिरो भूत्वा
स्थितः पार्श्वतोमूत्वित्यर्थः ॥ विभाषा कृञीति रः इत्वेनिग तिरोभावपक्षे सत्वमपि न तिरसोन्यत्र
स्यामिति सत्वविधौ गतिग्रहणानुवृत्ते कोचित्तु परा भवतिस्कारशब्दप्रयोगमनुरुन्धानाः सत्वविधौ
गतिग्रहणं निवर्तयन्तीति माधवः ॥ वाचं नियम्येति ॥ निवचने हि वचनाभावः ॥ अर्थाभावेऽव्य

शिवः
१३१
131

यीभावः । इत्यत्र विशेषणे एवं तन्निपातने ननु संज्ञासन्नियोगेन तद्गतत्वमाचार्यस्येति । इत्यत्रानेन गतार्थं इति
अस्वपदविग्रहेण नित्यसमासतां च दर्शयति । अनिमालं इति । एवं अभिगतो मुखं अभिमुखः । उक्तं तावल
उद्बलः । इति गतो । संबन्धः । उपपदमतिङ् । अत्रातिङिति नोपपदस्य विशेषणं किन्तु समासस्य । एतच्च स्व
नवदृष्टम् मर्षयोरिति सूत्रभाष्ये स्पष्टम् । तत्रास्ति किं तस्यानधिकारादकिं तत्र ग्रहणमानर्थक्यमिति नु
नुवृत्ता उपपदसंज्ञार्थं तर्हि इत्याशंक्य । तिङिति समासप्रतिषेधात् संज्ञानर्थक्यमिति सिद्धान्तितं तदन्द
भिप्रेत्याह । अतिङन्तश्चेति ननु सुपेत्यधिकारात्तिङ् तेन न भविष्यतीत्यत आह । अतिङन्तग्रहणमिति सू
त्रस्थं इति कुगतिप्रादयः सुबन्ताः सुबन्तेन समस्यन्ते नतु तिङ्गतेः सुबन्तो गतिङन्तेन समस्यत इति व्याख्येय
मित्यर्थः । तथा चाति । यदस्तु तारीत्यादौ तु उपपदयोरेव लाभस्तथापि त्रितयविषयिणी प्राचां परि
भाषा एकदेशानुमतिद्वारा रूपि ज्ञाप्यत इति भावः । यद्वाकारकांशो कर्तृकरणे इत्यतीति सूत्रस्थव
तुलग्रहणं उ तार्थसाधकं बोध्यं । आजिगिति । इदं तादुत्तरपदात्सुबुत्पत्तेः प्रागित्यर्थः । प्रथमान्तत्वे सुग्र
हणमित्यनुवर्तते नत्र एव राजदन्तादौ पूर्वपदनिपातादिपदकार्यमस्ति ध्वनित परिभाषायाः फलं द
र्शयन् गतिमुदाहरति व्याघ्रीति । व्याजिघ्रतीति व्याघ्री । आङ्तस्योपसर्गे इति कः । व्याघ्राभ्यामिति शब्द न
ये सुसमासायां न तेति व्याङोर्घ्राशब्देन गतिसमासः । स पदिघ्राशब्दस्य सुबन्तत्वमपेक्षते न तर्हि सुबुत्पत्तेः संख्या

यपेक्षत्वात्ततः प्रागेव लिङ्गनिमित्ताभावात्त्यपष्टावेव स्यागन्तु ङीषप्रसङ्गः मात्रस्य जातिवाचित्वाभावात्ततो
ग्राशब्देन समासे सति अदन्तत्वस्य अवत्ययष्टावेव स्यान्न तु ङीषघ्राशब्द मात्रस्य जातिवाचित्वाभावा
त्तेनो घ्राशब्देन समासे सति अदन्तत्वाभावाज्जातिलक्षणो ङीषु न स्यादिति भावः ॥ उपपदमुदाहरति
कच्छेन पिबतीति कच्छपी व्याघ्रीवत् ॥ सुपीति योगविभागात्कः ॥ यत्तु प्रावा उपपदमतिङ् इति मिति व्या
ख्यानं तन्न ॥ तथा सति प्रथमान्तस्तु वग्रहणानिरर्थकत्वापत्तेः बहुविकल्पापत्तेः ॥ तथा हि ॥ निर्गतः त्यत्रा नि
सोऽरुलसंपते त्यत्र मोनुस्वारः ॥ राजदन्तादिष्वत्यादौ नलोपश्च न स्यात् ॥ प्राग्… तत्यादौ श्रतो गुणः इति पररू 2
पं च स्यात् ॥ एतेनातिङिति किं ॥ एधानाहारको व्रजतीति प्रत्युदाहरणमपि प्रत्युक्तं ॥ यदपि कुगतीति स 6
त्रेउक्तं प्रत्रसुसुप स्वनुवृत्तेस्तिङ्गपि समासः ॥ ऊरीकरोतीत्यादि तत्प्रासत् ॥ नतच्छेषो रूपत्वेनातिङ्
ग्रहणेनैव विरोधात् ॥ तिङ्समासस्तु सहेति योगविभागलभ्यः छन्दसत्वान्नेत्रमागवोक्तं लोके तु प्रभ
वतीत्यादौ उपसर्गः पृथक्पदमेव काव्यादि पाठिनामेकपद्यम्भ्रमतु धातूपसर्गयोः संहितायां नित्य
त्वं मूलकथनार्थं अभ्यग्न्याप्राहीत्यादौ पदपाठे उपसर्गं व्यवसानामिति चेत् ॥ पदपाठस्यापि व्याख्याविशे
षत्वाया तत्रानुकरणशब्दत्वेनोपसर्गत्वाभावात् ॥ प्रवृत्तेनवदनुकरणमित्यतिदेशस्य वैकल्पिकत्वाच्च

लोदनेभ्य इति सूत्रे स्यादेतत् दिवं कुर्वमारा तशोभं चाकुर्वे तासूत्रे स्नेनैव तथा ज्ञापितत्वादिति दिक् ॥ अ
मेवाव्यये न तुल्यविधानमिति ॥ एतच्चाध्याहारेण लब्धं नेदवेति नियमस्वभावलब्धार्थकथनप
रायमेवकारः ननु सूत्रस्य अव्ययेनेति किं भकारः ॥ असतित्व व्ययग्रहणमेव यत्तुल्यविधानं तदेव
समस्यत ॥ पूर्वसूत्रारंभसामर्थ्याद् अव्ययविषयकरणनियम इति चेतत् किं अमंतविषयकरणं किं
न स्यात् ॥ अमंतेनयः समासः सा मेव तुल्यविधानस्येति तथा च अग्ने भोजं भिन्न अमाभूत् ॥ अग्रे
भुक्ता कालो भोक्तुमित्यत्र तुस्यादेवेति भावः ॥ तृतीयाप्रभृतीन्यन्यतरस्यामुभयत्रविभाषेयं
अमेव तुल्यविधानस्य प्राप्ते यथा उपदंशस्तृतीयायामिति ॥ यत्तु अमा चान्येन च तुल्यविधानत
स्याप्राप्ते यथा ॥ अव्यये यथाभिप्रेताख्यानमिति ॥ उ कारमात्रग्रहणे समासपक्षे … उत्तरपद
इतिस्वरः … अन्यतरस्यामित्याद्युदात्तत्वं ॥ असमासे तु उच्चैरितं तनोदात्तत्त्वारादिकं तथा
यात तत् ॥ अमंत्यं तु इतिमभिप्रेत्याह ॥ अमंतेनेति ॥ नेह न ॥ पर्याप्तो भोक्तुं ननु रूपस्यांगुलः स
मासान्तापत्तया यावयवषष्ठी ॥ व्यंगुलमिति ॥ द्विगोर्नित्यमिति द्व्यसययोर्लुक् ॥ इदं द्वार्थमिति ॥ ननु रू
पस्याससंभवादिति भावः ॥ अनेन तु अस्मात्सोरात्रि इतिकर्मधारययोस्तु पूर्वोत्तरपदयोरन्यतरस्स
गोत्वसंभवादिति चेन्न समुदायस्य संभवे गोरणग्रहणाद्योगात् रूमन शिखाशिखा वरोरा त्रे च षष्ठ्यःसीतिसू

म. २.

१३२

वेद्वंद्वे समासान्तदर्शनाच्च ॥ अहोरात्र इति । जातिरप्राणिनामिति समाहारद्वंद्वः रात्राह्नाहा इति पुंस्त्वंप
तु प्राचोक्तं एकवद्भाव क्लीबत्वेति तन्न । सनपुंसकमित्यस्य रात्राह्नाहा इति पुंस्त्वेन परत्वाद्बाधः
तिवक्ष्यमाणत्वात् ॥ अकारविरोधात् चाह्निरात्रमिति । संख्यापूर्वं रात्रं क्लीबमिति वक्ष्यते । अह्नष्ट
खोरेवानन्तरं हितस्येव सिद्धे नियमार्थमिदं । एवकारः स्पष्टार्थः । अह्न एव रखयोरिति विपरीतनि
यमस्तु न भविष्यति ॥ आत्माध्वानौ ख इति प्रकृतिभाव विधानाल्लिंगात् ॥ अनित्यत्वादिति ॥
अत्र च लिंगविशिष्टे लोपः लांकुशादयश्च परीगहणं ॥ अह्नोऽह्न एतेभ्यः अह्नः सर्वैकदेश अत्राहराद
यो निर्दिष्टाः ॥ चकारेण संख्याव्ययेऽनुवृत्ते न अस्तैर्वर्षापुद्धिस्पष्टत्वाद्विशेषणं । अहः शब्दस्ये
न गृह्यते संभवादित्याशयेनाह । सर्वैकदेशाद्यह इति समासान्तपरत्वेति प्रकरणं बलल्लभ्यते न ॥ प्रा
चानु रचिपरत्व इति व्याख्यातं । तदपि सामर्थ्यलभ्यमिति कथं चिन्त्यं भाष्ये तु अह्नादेशः प्र
त्याख्यातः अह्न एतेभ्य अवस्थानाट्टोपवादः ॥ अह्नष्टखोरेवेति नियमादिलोपो न ॥ अह्नोपे
न इति सुत्पादनात् । अह्नादेनान्तरे कादिति । यदिलक्षणाक्रत्यपि वृत्ययोगोऽस्तित्वादित्यपि बोध्यं ।
खाभ्यामनधिकारात् । अत्र प्राचः अह्न इति षष्ठ्याः स्थाने व्यत्ययेन प्रथमा । अदन्तनिर्देशान्ते
र ॥ दीर्घाह्नी प्रावृडिति । वदतिनिव्यस्यायादिवर्णनक्लेशो व्यर्थः ॥ दीर्घाह्नी त्यत्र प्रादिपाठकोऽन्त

द्विव॰

१३२

133

तिरप्तं व्याख्यास्यति तु तुच्छादित्यस्येव वक्तव्यत्वादाकार एव तथोक्तत्वाच्छन्याशये ताह तोतस्येति ॥ प्र
चस्तु यष्टो तस्येत्तु स्कान्यदस्तति र्द्दशादिति वदतो व्याघातः स्पष्टमेव । कालाहुतिरिति ॥ एतद्वस
ख्या । विसायेतिसूत्रे ग्रामपदसंज्ञत्यर्थाः आहाङ् धातोर्माघवर्णय चस्पष्टं ॥ यत्तु नसरव्यादः सम
हा ऽहतिसूत्रे घ्यह स्य त्राणेलुगिति हत्तिकारादिभिरुक्तं तद्युक्तं इति भावः प्रसंगादाह ॥ स्त्रि
याम्मिति ॥ रात्रिति यत्तु प्राचाकालनिर्णयदीपकार्या हृदौस्या त्रवमीसुभाथदशमीकाल्य
स्पष्ण याथ्यासाघ्रहिका नयुग्मादिमोत्तरयुत्ताचायोत्तरैकादशीति श्लोके घ्यह इति प्रयुक्तं
सादशमी द्वयोरह्रोर्भवा घ्यही त्यादि च तद्विवरणे व्याख्यानं तत्सर्वं प्रामादिकमिति भावः ॥
तया हि ३६ रिष्टांतिकीर्पद्विगोरिति वाऽऽयायेऽपि यलेण तत्वात् ठञ तत्वादुञ तत्वाद्वा नाद्यः हत्ति
कारायुक्तास्या णहरु प्रामादिकात्वाच्च कालुप्तत्वाचान चप्रत्ययलक्षणं ॥ अणोकार इति व्या
ख्यानात् ॥ नापिद्वितीयः ठञोयोऽकारस्तदन्तादिति व्याख्यानात् । यत एव हि द्विनिष्के त्या
त्र क्रीतार्थे आगतीयस्य ठञोलुकि फिद्वेषाकारे उदाहृतः द्विविस्तत्वादावप्येवं नापि तृतीयः ख च
सोमासांततयातदंतस्य तद्धितार्थपत्तुपसर्जनत्वात् ॥ एतत एव हि आपिशलिना प्रोक्तमधीयाना

म० र०
१३४

त्राल्लरणे अपि फले नपुंसकत्वं ॥ भाष्यमते नप्रचारचोदाधनाय नापि चतुर्थः अपोऽस्माणोऽस्यादिनाडी
को निषेधात् ॥ तस्माद्वा वेदयुक्तः स्याद् इत तदा वप्ययुक्ताः स्त्रीत्वस्यैव दुर्बलत्वात् ॥ तथा ह्योह इति स्त्र
त्रेकेयटहरदत्ता कारस्तु ॥ ॥ रात्राह्नाहाः पुंसीति वचनात्स्त्रियाः स्वभावात् । रजयोर्नास्तीऽविशेष
इति मे वं भावनात् वाह्नस्तु बाधात् स्यात् हि कैयटाद्याशयः सर्वादिपक्षे सर्वादत्स्वजपवादेऽज्वि
हितः ॥ तत्र संख्या पूर्वस्य नाड्नार्थाह्नियोर्विशेष्य निघ्नत्वे न स्त्रीत्वसंभवोपि रजं तस्य तद्धितं प्रत्यु
पसर्जनात् ॥ अनुपसर्जनाधिकारात्तस्य रिह निङीप प्राप्तिरेव नास्ती त्वसंभव एवेति तत्र रजयो
र्विशेषः स्पष्ट एव पुंसि पाह इत्यत्र तु ॐ नेमे काभ्याचस यो निषेधः अग्रा दशास्य चेति मतभेदेन
व्यवस्थितं स नरको चतुर्गां तु रात्राह्नाहा इति वचनात् स्त्रियाः स्त्रिनी नास्ती ति स्यादेतत् ॥ भवेदयं ए
कृनामा शयः ॥ यत्तु क्ताह्नियोर्विशेष्य निघ्नत्वे भ्रमाणे स्यात् तदेवा किमिति चेत् उच्यते अमर
सिंहेन पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुरा इति पुंस्त्वाधिकारे ॥ अहोरात्रा इत्येकभेदा रात्र्या ताः
प्राक्संख्यकाः इत्युक्तं अर्थात्तः आख्यलिङ्गान्याप न्नरः वाः पराः पगाः तद्धितार्थाद्विगुः संख्या सर्वना
मत इत्येकाः इति मतः पञ्चमुक्तं एवं चेदहरात्रा इत्यनेन पुंस्त्वप्राप्ते ॥ तद्धितार्थो द्विगुरिति परोगत्वेन प

त्रि० ४८
१३४
134

२॥ त्वादेव बाध्यते॥ नचावेतन्नैव परिभाषितं तदवरं विरोधे शेषं तु ज्ञेयं यतो ऽस्य प्रयोग गत इति तस्मादेम स्त्रंवधः
उक्तार्थ एव मा शंकि वा परवल्लिंगमित्यस्य रात्राह्लाहः स्यापवादः॥ यत्र तु द्विगुप्राप्तापन्नादिना तत्सर्गे इति
सिद्धः॥ न चात्र तदपवादस्यावरोधिनः स्पष्टे वा एनत्वमाधवेनापि ध्वनितमित्यनुपदमेव वक्ष्यामः॥ किंच
भवाद्यर्थे तद्धितान्तं परोपगमिति निर्विवादं॥ तद्धितलोपे तु यः शिष्यते स लुप्यमानार्थाभिधायी
ति न्यायेन भवाद्यर्थ एव तु॥ स्त्रीत्वादेरप्यभिधानं न्याय्यमेव॥ प्रवृत्ते लिंगानुशासनस्य केवलाया
प्रवृत्तावुपसर्जनस्य लुप्ततद्धितायाश्च प्रवृत्तेः लुपि युक्तवद्व्यक्तिवचने इति लिंगानि दृष्टान्यत्र प्रमाणं शास
नलिंगानुशासनानां लुप्तप्रत्ययेषु प्रवृत्तौ प्रकृत्यापत्तेः॥ अत एव लवणः सूपः लवणा यवागू
रित्यादौ न क्लीवत्वं॥ अत एव कुमारीप्रासरण इत्यो द्विगुः॥ पंचाशकं तत्र तिक कर्तृक्रियेत्यत्रापि विश
ष्यनिघ्नत्वं लोके स्पष्टं॥ अरूढीनिडीयं च नाडा नापि स्त्रीत्वं स्त्रीरत्नमेवेत्यलं प्रकृतानुपयोगि समर्थनी
यमेवेत्याद्यरस्तां हि आधाराधेयभावव्यत्यासेन समर्थ्यतां द्रष्टव्यं स्यामिति दिनद्व्याधार
मेतेत्यर्थलाभात् उपात्तस्यापीति॥ यथा प्रथमयोरिति प्रथमयोर्द्वितीययोर्ग्रहणं द्विवचननिर्देशा
त्॥ तथेहापि उत्तमग्रहणसामर्थ्यात् त्रयोर्द्वयोर्ग्रहणं उत्तमोपपदस्य चेति। चकारः सोत्रे द्विवचने मि
तितेषामाम्नायः॥ स्वार्थ्याः जात्याः द्विगोरिति॥ गोरोप्रदात्राद्विगोरित्यर्थः॥ द्विजलमिति। समाहारद्विगु

म॰ र॰

१३५

श्चान्महतः पदाधिकारे नेदं तस्यापि ग्रहणान्महच्छ्राद्धस्यापि कथं तर्हि परममहत्परिमाणमिति परममहतोऽ
प्यस्य परिमाणमिति षष्ठीतत्पुरुष इति वृत्तः ॥ यत्तु वर्द्धमानेनोक्तं रथकेषीकामालानामित्यत्र तदन्तविधिरुप
संख्यानसामर्थ्यादुत्तरपदाधिकारे तदन्तविधिर्नास्तीति ॥ तद्भाष्यकैयटविरुद्धं ॥ तथाहि । पदाधिकारश्चेदास
न्नस्थकाचितेपक्वेस्थकाचितमित्यादिभाष्योदाहृते कैयटेन च पदशब्दो नोत्तरपदस्य घनेन इति व्याख्यातं ॥ एतदेवा
र्थतः काशिकायामुपनिबद्धं तत्तु रथकेषीकेत्यत्र सूत्रे वचमुपसंख्यानमस्ति ॥ मृत्तीशब्दस्येति ॥ यत्तु षाचो
कजातीयघासादौ नेषिशब्दस्याप्राप्तत्वमाप्यमिति मत्तजातीयेति तावदयथं उत्तकर्मधारयेति भाषा
न्महत इति च सूत्राभ्यामेव रूपसिद्धेः नीशब्दस्यापि प्रपाणिनीयत्वादुपन्यस्तं ॥ अष्टन इति कपाले उत्तरप
हविषि चाच्य इत्यन आत्वं व्यक्तव्यमित्यर्थः ॥ अष्टाकपाल इति ॥ संस्कृतं भक्षाः इत्यण ॥ अप्यर्थ सूचेति तुगि
ति व्याचख्युः स्रहतिरभसात ॥ द्विगोर्लुगनपत्य इति तु बोध्यं ॥ अधिकार इति ॥ एतच्च वार्तिकारूढमित्युक्तं ॥
यात्विह पूर्वपदस्थनिमित्तसंनिधौ यस्य स्यादिति गणत्वसारणीच कुरुत्व ज्ञेयं ॥ उपलभ्यमानस्य नोहश
स्यरस्य द्वन्नानिर्वाण त ॥ स्वरान्तरे पीशापत्तो बाधकाभावादिति दिक् ॥ एकादिः ॥ अनुकित्यकारोच्चारणसा
मर्थ्यात्पररूपं न केचित्तु स्यपरत्वाद्यमादुकं दीर्घो दिस्सूरु ॥ रात्राह्नाहाः पुंसि परत्वादिति ॥ यत्तु प्राचा एक
वभ्दावात स्कीवते तुक्ता म्नहोरात्रमित्युदाहृतं तत्वेत्यवोचाम ॥ यत्तु वदन्ति रात्रादीनामेवानेन तु

शिवः

१३५

135

त्वविधायेन नरं तस्य तु परवल्लिंगमित्यवसेयमिति अतो भिन्नविषयत्वान्न विप्रतिषेधशंका। एवं च समाहारे सनपुं
सकमित्येव भवति परवल्लिंगापवादत्वादिति न च उक्तरीत्या द्व्यहस्त्र्यहादावपि क्लीवत्वं स्यात् न चेष्टापत्तिः प्राचापि
द्व्यहस्त्र्यहस्तूदाहृतत्वात्तत्कारविरोधाच्च अमरोप्याह ते तु त्रिंशदहोरात्र इति मासे द्व्यादहोरात्राः इति च तस्मात्
दन्तस्यैवायं पुंस्त्वविधिः॥ द्वंद्वतत्पुरुषयोरिति क्रमाणे इति स्थिते। संख्यापूर्वमिति। तथा च लिंगानुशासनसू
त्रं पथपुण्याहान्तपुंसको संख्यापूर्वा रात्रिरिति। अमरोप्याह त्रिरात्रं पंचसंख्ययान्वितमिति। गणरात्रं निशा
बहव इति च पुंस्त्वाधिकारेपि एवाह। रात्रान्ताः प्राक्संख्यकाः इति। एषां स्यैतद्द्विरात्रं त्रिरात्रमिति रात्रिकारकृद
न्तादिभिरुक्तं तु स्वपामादिकमेवोत्यवधेयं अर्धर्चाः पुंसि चेत्यर्थ केषांचिदर्थभेदेन व्यवस्था तथा च शाश्वतः
मकरंदस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्धर्चादिगणपाठात् पुंनपुंसकयोर्मधु इति। अमरस्तु माध्वीकं
मधु नद्येरित्याह। पात्रं तस्येति। स्त्रीत्वमिति शेषः। सुदिनाहमिति। सुदिनशब्दः प्रशस्तपर्यायः तथा च
प्रयोगः सुदिनाः सुसमाः सुकार्यमेतत्। अविचिन्नी त्वविशेषणतः स्यादिति। पथः संख्यान्तर्विधो विपथः। कस्या
पथः समाहारसमाहारः अथ विपथकापथ्यातिर्भसकोमास्त्रात्रादि। प्रमादः एवायं इति। वस्तुतस्तु पथे
गतादिवत्समासात्प्रत्ययविधिपरत्वाभावान्तीति पथः अकारान्तोयं। तथा च त्रिकांडशेषः वाटः पथश्च मार्गः स्या
दिति। तेन समासे पुंस्त्वं नपुंसकेवं विपथः सिद्धवपि। कापथो नस्यान्तादेशस्य दुर्लभत्वादिति वाच्यं। ईषदर्थे चेति

म० ट०
१३६

तत्त्वं भवतानुक्तायमर्थेनः पथ्येवसानानात् । इदं त्ववधेयं । परवल्लिंगतापवादस्य फलात् । तत्पुरुष एवेदं प्रवर्त्तते
नान्यत्र विपथा नगरी बहुव्रीहिरियं । पंथानामतिक्रान्ता नास्त्रनिपथाः स्वपि नद्विगुप्राप्तिस्मादि नापरवल्लिंग
तायाः प्रतिषेधादिति माधवः । एवं च त्रयस्य साम्येन यस्य । स्त्रवाण्यपि रात्राह्नाहाः इत्यस्य प्रवृत्तिर्नेति माधवेनोक्तं
प्राय । मृदु पचतीति । क्रियाविशेषणत्वात् द्वितीयां । तैर्धातूपात्तभावानां प्रतिफलाश्रयः कर्मभूतः तथा
च फलसामानाधिकरण्ये द्वितीया । अत एव सरस्तोवित्यादौ कर्मकारस्य कत्वात् अण् । यत्र तु भावानां प्रति
करणं तया धात्वर्थविशेषोन्वेति तत्र तद्विशेषणानां तृतीयां तेनैव ज्योतिष्टोमेन यजेतेति नसिद्ध्यतीति वाच्यं
यथा । एतद्व्यकरणे यजरतिस्तु वैरत्तिपमजज्या । स्पष्टमेव तन्नैव ज्योतिष्टोमेन भाक्तैः स्वर्गाय यजेतेति न सिद्ध्यति
ति वाच्यं । भावना विशेषणत्वेन तदुपपत्तेः ॥ तत्रापि संदर्शितप्रार्थनादिभिर्भाव्यमानत्वात् क्रियायां स्वत्र
मकर्मत्वविवक्षायां तद्विशेषणे द्वितीया । अन्यथा तु पृथमैवेति विवेकः । सामान्ये नपुंसकमिति चाप्र
निपतालिंगविषयकं तेन आदिः पचति प्रातरादिरिति पुस्तमेव विस्तरस्तु स्वाप्रकौस्तुभे बोध्यः ॥ पर्यायसे
वाति । कथं तर्हि नृपति स सामन्त्ववेपमाना इति कीचकवधे । नृपतिवत्राजा विशेषत्वादिति रक्षितः । विभ
षासेना । सैव वनिद्रामिति । अरमचतुर्दशीत्याद्यः ॥ तस्यां किलकेचित् । श्वानः उपवसन्ति । तथा च तिर्यग
धिकरणे भाष्यं । शुनश्चतुर्दश्यां उपवसन्तः पश्यामः इति । ॥ इति तत्पुरुषः ॥ ॥ यस्यात्रि

त्रिव०
१३६
136

कस्येति। यद्यपि प्राद्ययोगे नाद्यर्थे प्रथमैवेति तथापि द्वितीयाश्रितादिभिरिति वृत्तौ अथ माकेन चित्तस्
समस्यतइति नोक्तं स्यार्थः॥ वार्त्तिककृता प्रथमैवेत्युक्तावपि सूत्रकृता नोक्तमिति वा॥ अन्यस्य पद
स्येति। पदान्तरेप्रत्ययार्थोपसर्जनः प्रत्ययार्थोऽभिधीयते॥ तथा च द्वितीयाद्यर्थे इति फलितं तद
र॥ अप्रथमेति॥ समानेति॥ एतच्छेषपदार्थं प्राप्तमित्यादि। ग्रामः कर्मकः प्राप्तिकर्त्तृ उदकं विग्र
हार्थः उदककर्तृकप्राप्तिकर्मेति समासार्थः॥ विग्रहे समस्तइति प्रयोगे तु तस्याव्ययमेवार्थः॥ यद्यपि
कर्तृप्रत्ययार्थस्य कर्तुर्धात्वर्थं प्रति विशेष्यता विना तथापि व्यपेक्षावादिभिः त्यासमासे भिन्नैव सुप्त्यादिः स्वी
कार्या किंच कर्तुर्विशिष्टप्राप्तेः पदार्थत्वे तस्यैव नामार्थता पादकस्य तदभेदो वाच्यः स च बाधितः नान्य
त्र विशिष्टप्राप्तिरुदकमिति संभवति। अपि च व्यस्तसमीचीनमुदकमिति वृत्त समस्तेपि तु उदकविशे
षणप्रयोगः प्राप्तः स च वृत्तस्य विशेषणयोगो नेति वचनेन वारणीयः। सिद्धान्ते तु बहूनामिति धर्मा
णां वचने रवसाधने स्यान्न फौरवं न स्यादेकार्थीभावआश्रितः वकारादिनिषेधाय बहुव्युत्पत्ति
भंजनं कर्त्तव्यमिति न्यायासिद्धत्वस्माकं न दोष इति स्थितं॥ ऊढेत्यादि। अनडुत्कर्त्तृकोढ़रूनकर्मीभूतो रथः र
थकर्मकोढ़रूनकर्त्ता तु समासार्थः रुद्रसं उपदानकोपहरण कर्मपशुः पशुकर्मकोपहरणसंप्रदाना स्था
ली वधिकोद्धरण कर्म ओदनः ओदनकर्मकोद्धरणावधिः स्थालीत्यादि

भ. र.

१३७

रथेः इहकर्मादीनां समासे नाभिहितत्वात् प्रथमा। प्रथमार्थोत्पत्तिरिष्टेदये अनयोर्न समासो ऽशेषत्वादि
त्यत्र तात्पर्यं। अधिकरणानामिति॥ अत्राप्युक्तावरे तुः इत्यंशोषव्यहरणफलमुपनिबद्धं न चाम्म
त्तगगरत्पादि व्यावृत्तिर्वतत्वफलं एकसंज्ञाधिकारेणैव तत्सिद्धेरिति भावः॥ अनेकं किं बहूनामपि
यथा स्यात्॥ तदुदाहरणं तु मूल एव स्फुटीभविष्यति॥ एवं चात्र सुपिनित्येवानुवर्त्तते न तु सुपेति॥
यत्तु सुसुपेत्यनुवर्त्यानेकं सुबन्तं सुपा सहेति व्याख्यातं तन्न द्विपदबहुव्रीहेरसिद्धिप्रसङ्गात्॥ प्रादिभ्यः
परं यद्धातुजं तदन्तस्य पदान्तरेण सह समासो व्याख्येयः। सूत्रसिद्धार्थानुवादोयं वा चेति॥ इदं
तु वावनिकं पूर्वपदान्तर्गतस्योत्तरपदस्य धातुजस्येति। याच तल्लोपो वक्तव्यः॥ एतद्वृत्त्यादीनामे
वरत्नो। विशिष्टार्थवृत्तितामङ्गितस्य तु संज्ञा॥ स्त्रियाः पुंवत्॥ ऊङभावस्तिर्यदि तु ऊङन्तो ग्नुस्त्रि
त्रि पर्युदासः स्यात् तर्हि दावाद्यमेवग्रहेतां ततः किमिति चेत्तदा उङ्विशेपत्पजनपदह्रस्त्रियाद
त्र ऊङ्विः। दरदोपत्यपद्मगाधनपणादरदः तयोः स्त्रियामतस्येति लुक् दूरड्विड दरदसा वासौ वृ
न्दारिकाच ऊङ्विड्वृन्दारीकादारद्वृन्दारिके तु न सिध्येत् नह्यत्र स्त्रीप्रत्ययः कश्चिदस्तीति भावः।
निपातनादिति॥ एतच्च पूर्वत्रापि योज्यं वैयाधिकरण्ये नस्यरसत्ता बहुव्रीहेर्दुर्लभत्वात्॥ अलु

शिव ४

१३७

137

गिति ॥ ३४ ॥ भाषितंपुंस्कमनतीति भाषितपुंस्कात् ॥ अनङ इतः किं । एवं च समानाधिकरणे एव बहुव्रीहिः ॥ अ
लुगर्थं च यत्नो मास्त्विति यद्यपि सुवचं तथापि ग्रन्थानुरोधेन क्लिष्टं व्याख्यानमित्यवधेयं षष्ठ्यास्त्व
ति ॥ एवं च सूत्रे कृपां चित्स्य षष्ठ्यन्तपाठे ॥ नाकारः ॥ हरदत्तादिग्रन्थविरोधादिति भावः ॥ तुल्यत्वा
दि ॥ अयं भावः ॥ भाषितः पुमान् यस्मिन्नर्थे तं भाषितपुंस्कं प्रवृत्तिनिमित्तं तदस्यास्तीति अ
र्शआद्यच् [illegible] तुल्ये प्रवृत्तिनिमित्ते उक्तपुंस्कं शब्दरूपं लभ्यत इति ॥ स्त्रीवाचकेति ॥ एतेन स्त्रि
याः इत्यस्य स्त्रीप्रत्ययपरतां व्याचष्टे ॥ तथा हि सति इत्थं सूत्रार्थः स्यात् ॥ अनूङः स्त्रीप्रत्यय
स्य पुंसीव पुंवत् ॥ निवृत्तिरित्यर्थः ॥ यथा मरुभूमिवदस्मिन् ग्रामे जलमित्युक्ते अभाव एवा
तिदिश्यते तद्वत् तेनान्वयमेव वाक्यार्थोऽस्तु यथा उक्तं प्राचा उक्तपुंस्कात्परस्यानूङः स्त्रीप्रत्यय
स्य पुंव[illegible] त्संवत्सरा व्यात्स्त्रीप्रत्ययलोप इति चेन्मैवं ॥ अस्याप्यस्याक[illegible]रए वानेकधा दूषित
त्वात् ॥ तथा हि ॥ अस्मिन्पक्षे पटुभार्य इत्यत्रोत्तरपदनिमित्ताया ङीपो निवृत्तेः ॥ अचः परस्मि
न्निति स्थानिवत्त्वसत्त्वे परायास्यात् ॥ किं च वनं उस्याप त्यस्त्रीवर्तन्ते ङीवतङ्क्षेति [illegible] यत्र तस्य लु
कूस्त्रियामिति स्थाने लुकि शार्ङ्गरवादित्वान्ङीन वनङी वासोर दारिकाचवान्तस्पर्दारवे
ष्यते ॥ अवतिनो निरन्तावत्तिर्यपरान स्य स्त्रीत्वस्यानिरस्तत्वाल्लुकूस्त्रियामितिवन्[illegible] न्ते तत्र

म० र०

१३८

पूर्वसवर्णदीर्घप्रवृ
त्तु दीर्घाज्जसिचेति
निषेधान्नेति भावः

ति१

पि चैवं चेऽंड विडंशंदारिकेत्यादि ज्ञापकं नासिद्धत्व ।। किंच गार्ग्यस्य तारदारिकास्त्व गार्गेर्दारिकाः
डीपि तिरस्ते पियत्र ज्ञो रितिलुङ्स्यादत्स्त्रियामिति निषेधात् ।। तस्माद्यथाकारमेव ग्राह्यं ।। लो
किकेति ।। यत्तु चित्रागार्ग्या वामदर्शयामिति मीमांसके विगृहीतं तद्व्यौकिकवहिर्भूतत्वादुपेक्ष्यमि
तिभावः ।। नञ्समासजातद्भ्यत्र प्रपंचितं चित्रा अप्रसितिः ।। अंतरंगानपीति न्यायादिह पूर्व
सवर्णदीर्घो न वर्तते ।। अन्यथा एकादशस्य परादित्वेन तु पोलुकि चित्रगुरित्यत्र अकारो नल
भ्यतेति भावः ।। नेति ।। इष्टसिद्धत्तु राधनपूर्वपदं कचित् दीर्घ्यतेन तु सर्वत्र तथा चोक्तः स
होभसदृतिसूत्रे हरदत्तेन त्वमेवोक्तमिति भावः ।। आनङिति तथा च समर्थसूत्रे भाष्ये होतृ
पोतारेष्टाऊनार इत्यत्र चानुर्गो द्वंद्वत्तीयस्य आनङ् हन्तः पूर्वपदं हेपि तु न स्थेता नस्तत्र
नेष्टा पूर्वपदं नापि तदन्तं होतुरेव पूर्वपदत्वादिति भावः ।। अतएवेति ।। पूर्वपदानां ह्रेपादे
वेत्यर्थः ।। चित्रा जरदिति नञ्चद्द्वन्द्वात्मकस्य पूर्वपदस्य पुंवद्भावोस्तु तथा च राजापि वि
वेत्तेनेति याच्यं द्वंद्वो नञ्नयोः स्त्रीप्रत्ययप्रवृत्तयोः प्रत्येकं भाषितपुंस्कत्वेपि हारतनाभा
भाष्यकारेण सर्वमिदं ध्वनितमिति भावः ।। क्याण्वीति ।। पूर्वपदानां तु गतं उत्तरपदमाश्रित्य
प्रथमस्यापि पुंवद्भावः इति भावः ।। जरच्चित्रेति ।। पूर्वकालैकतोस्सूत्रेजरच्छ स्यप्रथमानि

त्रिवश्च

१३८

158

...त्वस्याभावात् । तथा च पद्वीमे भाष्यीयस्येति विग्रहः पद्वीन्...

दिष्टत्वादुपसर्जनत्वेसति लिंगविशिष्टपरिभाषया जरत्याः इत्येव निपातनः ॥ कर्मधारयोत्तरेति ॥ एतेनादृष्ट
सदृशाग्रजं इति [struck through] प्रयोगो व्याख्यातः ॥ इह घटकेबहूनां बहु
व्रीहौ पूर्वपदं नपुंवद् सुत्स्या रूपे विशेष उक्तः ॥ अनिर्दिष्टविधावपि विशेषांतरं वक्ष्यति पटुभार्या नीलो
त्पलबहुरिति उदाहृतं तत्र स्वरे विशेषो बोध्यः ॥ तथाहि बहुव्रीहि पूर्वपदे नीलशब्दस्य प्रकृतिस्वरः कर्म
धारयपूर्वपदे तु कर्मधारयस्यांतउदात्तः इति महान्भेदः ॥ स्त्री प्रमाणीयस्येति ॥ कारणार्थेल्युडंतत्वा
त् प्रमाणशब्दो विशेष्यलिंगः रित्योन्ङीप् कथं तर्हि प्रमाणाय आस्मृता विति शाबरभाष्यं भावेल्युडं
तं करोतीति णिच्चि पचाद्यचि टाप् ॥ पद्धा ॥ प्रमाणमिवाचरतीति क्विपचार किं वेतान्यशायच ॥ मत्र
तु प्रमाणमयनेयाति मूलभूतां श्रुतियतः ॥ किं वं तादयते स्तस्मात्प्रमाणस्मृतिरुच्यते ॥ इत्यादिरत्र
थनस्त्रयते: किंवतस्यदं रूपमित्याहु: नत्र ह्रस्वस्यापि तीनिनुदुर्वार: आगमशास्त्रमनित्यमिति तुत्र
गतिकगति: इह तु गत्यन्तरमुक्तमेव पदाप्याहु: व्योर्ललीतिय लोपो हि वलादिप्रत्ययापाश्रयइति तदप्रा
प्तत्वात्: तत्र प्रत्ययग्रहणस्याप्रकृतत्वात् गोधेर: पचते त्याद्युदाहरणाविरोधाच नासौ नावत ॥ पारिगणि
ता अत्र तसादित्रयादशक्रमेणोदाहरति ॥ बहुकीर्षिभिति ॥ मध्यपिबक्तादिषु ङीषो वैकल्पिकत्वात्तदभा
वबहुत्रेत्यादिसिद्ध्यति ॥ तथापि पाह्निकानिष्टवारणाय दर्शयतु प्राचां नन्तत्रेसुदाहृतं तत्सर्वनाम्नो

तेनलोपस्य बहि
रंगत्वेनासिद्ध
त्वात्तु क्वा ...
तिभावः ॥४

भ. र.
१३९

शक्तिमात्रे इत्यनेन गतार्थत्वादुपेक्षितं। दर्शनीयतरेति। यत्तु प्राचा पटुतमेत्युदाहृतं तत्स्वाभाविकं इति ध्वनय
न्नाह। यस्यरूपेति। बहुत्वेति। प्रकारवचने थाल्। नञ् इति किं सर्वनाम बहुभ्यः इत्यधिकृतं। एकादिति। एकस्मात्
भागं तिलमात्रं तिलो वा षष्ठं दत्वा इति तिलं। अग्रन्थ्यमिति। अजाविभ्यां थ्यन्। शसीति। बह्वल्पार्थादि त्यम पिस
स्तं न सिलादिषु द्रष्टव्यः इत्यर्थः। त्वतलोरिति। अत्र वदन्ति। जातिसंज्ञामतिरिक्तं धर्ममात्रं गुण इति। ए
वं च क्रियाशब्दानामप्यनेन तु वचनात् इति भावः। अत एव प्राचा नकोपधायास्तिस्त्रः पाचिका तापा
चिकात्वमित्युदाहृतं तन्न त्वो त्रैण चत्वतलोरिति प्राप्तिरिति व्याख्यातं। तदनन्तसर्वभाष्यादिविरोधा
दुपेक्ष्यं तथा हि एकतद्धिते च इति सूत्रे एकतारे एकत्वमित्युदाहृत्य पुंवद्भावेन सिद्धमित्याशंक्य भगवान
ह। उक्तमेनत् त्वतलो गुणवचनस्येति। अत्र कैयटः। एकशब्दस्य संख्यावाचितायां गुणवचनत्वेपि
प्रसहाय वाचिनः। तथात्वा [illegible] दिति भावः इति। एवं हि वदता
शुक्लादय एवेह गुण इति ध्वनितं। अतस्तथेयोदाहरति। शुक्लोत्वं सुतलेनेति। अत एव वक्ष्यत्युदाहरति
कर्त्रीत्व इति कर्त्रीत्वमिति। तथा च स्त्रियामित्यत्र व्याप्तिनी त्वाख्यं तेरितिकैयटेन प्रयुक्तं तथा युंयो
गादिति सूत्रे स्त्रियाः संविधात्री त्वादिति तेनैव प्रयुक्तं। अगर्हय संज्ञाप्रकरणेपि विभक्तेरेव संज्ञिनी
त्वादित्युक्तं। स्यादेतत् निरीक्ष्यमेनेश रदः रूतायतां तीव तामुपगनास्ततु वेलं घष्टतारहसि भर्त

शिव ४
१३९
139

पुनामिः सा तु मा च गति दुःखशीलतां इत्यादिष्वयो गाणां कागानिगित्य
न आह ॥ आर इति साम्यान्यमिति ॥ तथा च पत्नुर्नैयत्तसंयोग इति सूत्रे पत्न्याः फलवति गृहीतत्वादिति व
ति ग्रंथस्तु पादयकर्तृत्वमात्रं विवक्षितं न तु स्त्रीत्वमिति ङीप्रसूत्र इति हरदत्तो व्याख्याते परः सन्निक
र्ष इति सूत्रे एकैकवर्णवर्तित्वाद्धवरति भाष्ये केयरोप्येवमाहुः तेन नेष्टेपुरो गारवतीत्वमासीदि
ति मायोव्याख्यातः ॥ रोहिणीयद् इति ॥ रोहितशब्दस्यार्थं वर्णो दनुदात्तादिति ङीप्रकारो तु वन्नरे च तु
समित्नयो निरज्ञोरोहिणेयः इति स्यादिति भावः गयत इति व्याख्यानमेवात्र शरणं ॥ शत्रुपय्या
यादिति ॥ अत्र च अन्यसपत्ने इति निर्देशालिंगिपो वैरिसपत्नारिद्विषद्वेषणदुर्हृदः इत्यमरः ॥ वि
वाहनिबंधनमिति ॥ तज्जन्यसंस्कारविशेषरूपमित्यर्थः सापत्न्य इति भाषितपुंस्कत्वात्तु पुंवद्भावे
कृते यस्येति लोपः एन चस्तु ान्तु च ज्ञोस्पष्टं पत्नुपारख इत्येति धातौ माधवेनोक्तं भावकर्मणोः
पत्यंतलक्षणो यक् किं सापत्न [illegible] अभाषितपुंस्कत्वात्तु वन्नरोवोनेति तन्तु द्वियसपत्नीशब्दमाश्रित्य स्वि
रोधः यत्तु नित्यं सपत्न्यादिषु इत्यत्र न्यासरक्षितं ॥ समुदायो वारणं पुंवद्भावबाधनार्थमिति ॥ तन्न
समानस्य सभावार्थरूपार्थं च निपातनाश्रयणेन समुदायस्वारणस्य तावतैवापद्भवयानात् अन्य
यासवृद्धिह्रस्वादीनामपि बाधापत्तेः किं च तसिलादिष्विति सूत्रे भाष्यकारेण सपत्नीशब्दोपि वा
च्यार्णो भस्याढ इति पुंवद्भावेन सापत्न इति प्रपञ्च्य शिवादिषु केवलयौगिकस्य ग्रहणेन त्याशयेन साध

स॰ २॰

१५०

तइति प्रयोगो वारितः। निपातनस्य पुंवद्भावनिरूपणपरत्वे तु तत्सर्वं विरुध्यते इति दिक्॥ भावत्काइ
ति॥ ठच्छस्याद्यामवाभन्वेपि पुंवद्भावो विधीयते। अन्यथा हि सर्वकारेत्यभन्वा पुंवद्भावस्य सन्नि
धानपरिभाषया कारकेणानन्यात्मा आपेति कवत्। भाष्यकारस्तु इति अनेन नस्य च वार्तिकयोरुक्ते
संभवोपि ध्वनितः। उत्तरं हि श्लाघ्य सर्वस्याप्रवृत्तत्वात् निष्कर्षेनुर्वेयर्थ्यस्पष्टमेवेति भावः। इष्टेरूपा
इत्यत्र भाष्यात्। सर्वमयट्त्यादिनामयडादौ नापरिगणितत्वात् सिलादि वर्गिभावात् नस्य च ग्रा
गतार्थेतो। अतएव सर्वतः सर्वत्रेत्यादि नोदाहृतं। सर्वकभार्य इत्यादि नेचाह्रीया। पुंवचि
तिसूत्रे गतार्थता। नकोपधाया इति निषेधात् न चास्यापि तेन निषेधः शङ्क्यः स्त्रियाः
पुंवदित्यादिप्रकरणोक्तस्यैव तेनाऽनिषेधात्। अस्पाइष्टेस्तु तस्मिन्प्रकरणेऽसमाविष्टत्वा
त्। सर्वप्रियद्दति। अशरणीप्रियादिषीति पर्युदासाद्याप्तः। सर्वस्यैतिर्वाती घरकानेकभा
गमधो किंचिद्येतसया शर्वस्येत्यर्थः। अनरपवनदितर त्यादौ परस्य न पुंवद्भावः॥ लिङ्गादि ति
॥ अनस्याराणाग्द् एतयोः कानूर्वस्यापि विधीयमानमित्वं निर्विषयं स्यादिति भावः॥ यत्तु
पूर्वोक्तं सर्वनाम्नः समासे स्वर्वे पुंवदिति पञ्चव्याचख्युः॥ नालिंकार्यमनुवृत्तिः सर्वनाम्नइ
त्यादिनो सर्वनामशब्दे न संज्ञोपसर्जनेन भिन्नारावगणणापाठितो उपलक्ष्यते तेन सर्वनाम्नका

वे५ श्रीव४

१५०

140

वित्तनस्याः शुद्धः अतिसर्वोपुत्रेऽस्मत्रनाशिवृसंगः इति नेदं तत्सर्वमापातरमणीयं ॥ न
त्याशिसमासेऽस्यना कां ॥ २ इति मात्रे भाष्यात् ॥ मध्यडाकृतेः आसंवातण्याचमीरिघं प्र
युक्तं इति जामध्यायामपि पावनीमर्थं भवन्तमथाप्यायुक्तिलाभसीयन्तिरितिकिंचाग्राम
स्योऽसर्वइत्यादावतिव्याप्तिः नवजा तेभ्यो नितिषधः सौत्रज्ञापितमात्रविषयकः इति सिद्धां
ताना रूपवतीः सर्वजातिवाचकत्वाभावेनातिव्याप्तिरदोषाद्वा वार्त्तिकार्थमिन्नपिस्यवीयः वा
र्त्तिकयंथे एतद्भाष्यात् ॥ न चात्र विवादिन संठकृ छसौरिस्यस्यनिरालंबनापत्तेः सर्वनामशब्दे
नात्पर्यापिनस्याष्ठ ३ उक्तोपहरगायोलक्षणं विगृह्यापि सुस्थत्वात् । दक्षिणस्य सर्वाये इत्यादावुपसर्जने
नत्याऽस्या प्रापने अननुमात्रगतः सामर्थ्यात् सर्वनामताउपलक्षणानन्तु विशेषणत्वेनेव
तेः प्राक् सर्वनाम्नः संप्रत्यसर्वनामत्वेऽपि भूतवत्तालक्षणेनेत्याकारेस्थितेमयापिसर्वत्र
उक्तामिति चेन्न हि उपसर्जनमभिन्नालक्ष्मलेइति लक्षणस्य स्वरुक्तैवपराहतेन इत्यवधीयतां म
न्येवमतिसर्वो पुत्रेऽति व्याप्तिः ॥ अतिसर्वाशुष्कस्य कदाऽप्यसर्वनामत्वेनतत्राप्तिस्यात्सेरुक्ति
समताभावादित्यास्तां तावत् ॥ स्वभिन्नामित्यत्यात्माममेवदर्शनीयाममतेनतन्नस्विद्याः उ
वदिस्येवसिद्धेः एकस्याप्येवं रूपमभेदेन कर्मत्वकत्वेनयोः सत्वेऽपि वासवाभेदेन समानाधिकरण्या

विद्यमानास्तीति भावः। मद्रिकापत्नहरति। मद्रसु भवा मद्रिका मद्रदेशः कन्॥ पाकाभार्येति। अस्मे
कःसु कपाकाभूयसीति कर्मधारयपक्षोयम् उत्तरपदस्य निपातितः नत्विह ततहितः। नापित्रं व
यासिद्ध्यसमस्तेति द्वन्द्वाधिकारात् गादित्वाच्च॥२॥ वृद्धिनिमित्तस्येति वृद्धिशब्देनेति किं गावती भार्या
ऽस्य गावभार्यः। आसर्वनाम्न इत्याकारविधौ वृद्धिशब्दो नास्ति फलोपधानेति निमित्तशब्दः फली
पाहेतपरः स्यात् यथायोग्यपरत्वं तु वैयाकरणभार्या न सिद्ध्यदिति भावः॥ अकेशेति। सह नञ् विद्यमा
न इत्येतत्त्रिविशेषभावः। जातेश्च। जातेः परा इति जातिवाचकात् परत्वमात्रमिह विवक्षितं न तु जाते
रित्येवं विधानपर्यन्तमात्रकाः भाष्यकारसिकत्तमित्युदाहरणं ओपसरव्याणिकस्य नायं निषेधः इत्युक्तेः
तेन हस्तिनी भार्यं इत्यादौ नात्रलक्षणस्यापि निषेधः सिद्ध्यतीति भावः। पः ध्वस्य पतिरित्यादिः शा
चानुविद्यद्विषी वैयाकरणः तन्निर्मूलम् भार्यैत्यादाववश्यं भवत्येवेति भावः। आतलोपीति शाङ्ग
रवादित्वात् नायनञ् प्रत्ययान्त यदि निष्कारकस्य एणीभार्य इत्युदाहरणं तु नारस्य परवि
रोधादुपेक्ष्यम्॥ सौत्रस्यैवेति। व्याख्यानमेवात्र शरणं। संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये॥ ऽपद
र्तमानविरहात्पूर्वेणा अव्ययीभाववचनम्॥ उपदशा इति। उपशब्दः समीपे समीपेविवर्त्तते। अव्य
यीभावः। द्वितीये तु बहुव्रीहिरिति विवेकः। सूत्रेणैति तु प्रथमैकप्रिया इति शब्दस्यापि
न्येषामपिद्रष्टपते। अत्रपाकवालंकृत्य ग्रहणं कर्म व्यतिहार बहुव्रीहौ पूर्वपदान्तस्य दीर्घत्वमा

त्वं वा न वीति ॥ तत्रात्वं वेत्सपाणिनीयम् ॥ अत एव सुष्टु सुधिर्वा ह वीति उदाहरणम् अप्रमाणिक
मेव ॥ भाष्यादिविसंवादात् ॥ अत एव हरिणाग्रहणस्य हशोऽर्थे तात्पर्यं न कृत्स्नमिति प्रामाणिकः
पंथाः ॥ अर्वाचीनास्तु अत्र माकुः ॥ तथा च पंजिकायां विलोचनदासेनोक्तं ॥ नाम्नस्तु सर्वपद
स्यात्वं दृष्टुपदमिति एवं च प्राचां कैश्चिदिति वक्तुम् उचितम् पाणिनीयसूत्राशयमध्यवसायमध्यनिह
परस्त्वनुचितं एवेति दिक् ॥ प्रत्ययोगुणः ॥ तत्किं किं ॥ पद्भ्यां गुणो लिरिति ॥ यथा पिच्चारोदिति सूत्रेन
पिभजन्नादितेत्रिति संज्ञाद्वयस्य एकत्वम् अस्त्येव तथाऽपि विधेयसमर्पकं पदं ॥ यत्र संज्ञारूपम
एव संज्ञा स एव को विधिरिति भावः ॥ यथा पिच्चादिति तत्र परस्मैकालस्य संज्ञैव तथापीह तत्का
रउच्चारणार्थः ॥ आरोहन्त्य एवास्तु संरूपत्वस्येति तु प्रत्याख्यातम् इति भावः ॥ नेनसहेति
तुल्ययोगे तुल्ययोगे किं ॥ सह वृद्धाभिः तु ते भीरवः निर्गर्भी विद्यमानता वाचीसहशब्दः ॥
दृशास्तु तेषु विद्यमानेषु प्रत्ययः ॥ वोपसर्जनस्य उपसर्जनस्येति नसहस्य विशेषणं अभावा
पात् ॥ किं सूत्रं रपदे नसं विधोपितस्य समासस्य तद्भावयन्बहुवरकं उपसर्जनसर्वावयवव
स्य समासस्य बहुव्रीहेरिति यावत् ॥ अधिकारेण च षष्ठ्यौ तदेतदन्ततदा बहुव्रीहेरवयवस्येति
तेन नसहरता सहपुत्रः ॥ प्राप्तिकामिति ॥ सहकाया ॥ प्रथमायाः उक्त्वरः सकर्मकादि
त्यादिनिर्देशादिति भावः ॥ स्वरविशेष इति ॥ रविसतिवित्तरसंतो दृसंस्यात ॥ अस्तितु र

र्वपदस्य वृत्तिस्वर इत्यर्थः ॥ संख्याया इति संख्यां न स्यात् तत्पुरुषस्यां नावयवो ऽज्वाव्य इत्यर्थः ॥ एकवि
शतिरित्यादेस्तु न । अन्यत्राधिकलोपादिरुक्तेः ॥ स्थूलादेति ॥ यत्तु भाष्ये प्रत्युदाहृतं स्थूलत्वि
रिस्तुरिति तन्न ॥ अदर्शनादित्यवप्रसंगात् ॥ यत्तु व्याचख्युः समासान्तविधेरनित्यत्वात् नरु
तइति तदपातनतः एवं हि षडनुपितयैवन भविष्यतीति प्रत्युदाहरणस्यासंगतिप्रसंगात् ॥ नेतुरि
ति । नन्वत्रेयो नेतृशब्दस्तदन्ताद् कुनोहेरित्यर्थः नेता नायकः ॥ न तु स्थूलप्रख्यादिति स्थूलपूर्वाद्दु
वीहेरखनेत्यर्थः ॥ खुरखरनासिकायाइत्यापेक्ष्यते ॥ केवलादेशावचनं प्रत्ययनिरसार्थं ॥ उपस
र्गाच्च ॥ उपसर्गग्रहणं प्रादीनामुपलक्षणं नासिकाशब्दस्याक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगा
त्तदाह प्रादेरिति ॥ तं भरूकेति ॥ प्रणोनयवस्यो ऽप्रष्ठप्रनः स्षाइत्यादवयास्य नेत्याक्षिप्तसं
गात् ॥ शोभनमिति ॥ प्रातः शब्दं नृप्रा तस्ल नकमलस्यते ॥ अन्यथा प्रातः शब्दस्याधिकरण
प्रधानत्वपास्सामानाधिकरण्यासंभवात् इत्याहुः ॥ एणीपदादिषु त्रिषु निपातनात्पुंवद्भावः ॥
धर्मादनिच् बहुव्रीहिरणापूर्वपदमाक्षिप्यते इत्यनुपदमेव वक्ष्यति ॥ तत्र केवलादित्यनेन विशेष्य
तइत्याह ॥ केवलादिति प्रत्युदाहरणे चा केवलादित्युभयविशेषणं तथा व्याख्यातं तेन त्यौत्रेण केवलादि
ति धर्मशब्दस्य पूर्वपदस्य चाविशेषणमित्युक्तं ॥ पाणिनीयमतदर्पणे च केवलादिति केवलधर्म

प्राग्यद्योर्मेन नामिस्मृक्तं न तत्त्वे मायाभावात् ॥ धर्मपदविशेषणेऽत्रयोजनाभावात् ॥ धर्मशब्दं तं यत्रोत्तर
पदं तत्रार्थत्रिः फलमिति चेन्न तत्र धर्मपदस्य बहुव्रीह्यवयवीभूतपूर्वपदात्परत्वस्याभावात् ॥ नि
पदस्येति ॥ २६ सर्वनामसंख्ययोरुपसंख्यानमिति स्वशब्दस्य पूर्वनिपातो न भवति ॥ आहिता
ग्न्यादेराकृतिगणत्वादिति ररूतमाधवौ ॥ आपेक्षिकमिति नन्वत एव केवलसमासं मध्यं पूर्वप
दस्याप्रवृत्तस्य समासप्रथमावयवेरूढत्वेनैव मध्यमपदस्यारात् संभवादिति चेन्मैवं पूर्वपदाक्षेप
तात्पर्यग्राहकत्वेनैव केवलपदस्य सार्थकत्वात् ॥ कर्मधारयेति ॥ पत्याङ्कुः ॥ साध्योयमोस्येति
साध्यधर्मासंदिग्धस्त्वासोसवेतिविग्रहः स च संदेहः साध्यधर्मवत्त्वारक एव पर्यवस्यतीति ॥ सो
यं रथ्यालोष्ठः ॥ उक्तरीत्यैव साध्यधर्मस्य सामान्यासंदिग्धत्वलाभात् ॥ ननु कर्मधारयपूर्वपदत्वे
निवृत्तुल्यभः केवलादित्यस्य समासानात्मकादित्यर्थोस्तिति चेत् मैवं त्वदुक्तप्रवृत्तिनार्थस्याकार
ग्यंथानारूढत्वात् ॥ अस्मदुक्तार्थस्तु भाष्यकारेणोद्घाटित इति धातुमाधववचनयोः स्पष्टः ॥ निरनि
धर्माग्न्यस्थानीभवतीति प्राचां प्रयोगोपि अस्माकमनुकूल इति दिक् ॥ दन्तेवेति ॥ तथा च वदस्यन्तेऽस्मि
ज्ञमसुतं पिबेति ॥ पादेरोर्मालुक्यो व्याधः ॥ अत एवाह ॥ आधेनेति ॥ वयस्तु हिंसामात्रे प्रयुज्यन्ते ॥
वालीहिमाद्रुमालीगुणानीरिखुगानिनिर्मितोदाहितिरोर्भांति यथा केशाकेशीति ॥ तत्रतेनेति बहुव्री

म॰ र॰

१४३

६१

ति: तथ्य यहणाद्ग्रहणं एणयुक्ता नीवकमे स्यतिशतोऽपि इति शाङ्कागृह्यते ॥ इ अन्यपदस्य तिष्ठद्गुप्रभृति
षु पाठानुदेतस्याव्ययीभावत्वं तन्नेवं चाव्ययीभावसंज्ञः पात्रकृणेः इति संज्ञा बाधात् समासस्य
रेणेवाल्लोदात्तत्वं सिद्धं तत्किमित्युच्यते त्वनष्वाहुः । विशेषणार्थं तत् तिष्ठद्गुप्रभृतिष्विकारम
त्र पाठे हि सुगंधिरित्यादौ भूतिव्याप्तिः स्यात् ॥ यद्वा । दण्डादण्डीत्यादौ संज्ञयोः समावेश एव उपजीव्य
विरोधस्यान्याय्यत्वात् ॥ एवं च स्वारार्थमपि चिंत्यं ॥ द्विदण्डीति ॥ द्विदण्डाघातेऽपत्र तु इच् न समुदाय
निपातनस्य विषयविशेषपरिग्रहार्थत्वात् ॥ उभाहस्तीति । निपातनादेवात्र एवं विनापि प्रयोगः ।
उभयाहस्तीति पक्षेऽपपद्य ॥ उभयाहस्त्याभरा ॥ ग्रसभ्यां जानुशब्दस्ये क ते ऽर्थग्रहणमुपपदनिबंध
नंवा द्वित्वमाश्रित्य जानुनो रिति द्विवचननिर्देशः । न फलं तु स्यान षष्ठीत्वस्फुटीकरणं जानुन
स्तु क्तौ हि पंचमीयं तत्त्वमाधिकारश्चतुरपि प्रत्यय इति समाप्येत ॥ नदेनतस्व नयन्नाह ॥ जानुरादे
शायते ॥ छंदसि तु स्वतंत्रोऽपि दृश्यते ॥ उपजानु वाधीनसमसमानदे ॥ धनुषश्च धनुरंतस्य निधनु
[illegible] रंतादिति तु प्राचः प्रमादः ॥ अथ कथं खलाव एपाशंसाधनं धनुषमरहायनं णवदितिष
व्यदेशः । समासांतविधेरनित्यत्वात् ॥ अन्निसत्वे प्रमाणं तु अश्वादिगणे राजनशब्दस्य पाठः । स
हि पतेः रखादयस्तत्पुरुषे इत्यन्नोदात्ते नार्थः ऐजारः सरखीति रचा ॥ नित्यत्वे तु किं ते नेति दिक् ॥

[illegible]

१४३

143

च्यविभागो नेति ॥ एवं च गुणवाचिन एव ग्रहणं न तु द्रव्यवाचिन इति फलितोर्थः ॥ घ्राणेति
॥ आस्ते च गंधशब्दाद् द्रव्यवचनः वर्त्तते जलमियं पिनष्टि गंधानिय मियमुद्रूयते स्रजो विचित्राः
इति दर्शनात् ॥ गंधस्तु सौरभे न्यस्तो गंधके गर्वलेशयोः ॥ स एव द्रव्यवाचनो बहुत्वे तु स्निवस्मृत इ
ति कोशान्तरे तेन महीभृत पुष्पसुगंधिरादेर्भग्नवाल सत्कारसुगंधोऽस्यादित्यास्यातं ॥ एतच्च सर्वं
हरदत्तग्रंथे स्पष्टं ॥ केचित्तु तदेकान्तशब्देन स्वाभाविकत्वं विवक्षितं ॥ आगंतुकस्य नेत्याहुः ॥ तथा च
भट्टिः ॥ आघ्राय पिबतां गंधवहः सुगंधः इति व्याख्यातं च जयमंगलायां गंधस्य तु न्मनि सु सुरभि
भ्यः इतीकारः समासान्तो न गंधस्यैत्वे तदेकान्तग्रहणमिति वचनात् सुगंध आपणिक इति
पठन्ति ॥ अत एव भग्नवालसत्कारसुगंधावित्यादौ नाप्राप्तमादिकत्वं दुर्घटवृत्तिरत्नेनोक्तं ॥ अ
ल्पाख्यायामिति सूत्रस्येति व्यधिकरणपदो बहुव्रीहिः अत एव ज्ञापकात् ॥ यद्वा स्वरूपो गंधो
स्मिन्निति एव विग्रहः गंधशब्दस्य विशेषणत्वेपि अस्मादेव ज्ञापकात् परनिपातः ॥ इति वि
श्वकृति ॥ एतेन पर्यायोयं गंधशब्द इति प्राचो ग्रंथो व्याख्यातः अल्पाख्यायामिति सूत्रस्था
पि हैव सारसः ॥ यत्तु वदन्ति गंधशब्दो लक्षणयाल्पत्वं गमयतीति तचिन्त्यं शाकेर्धारि
सोकृत्वात् पादस्य यस्त्रायं लोपः समासान्तो न स्यादादेः परस्यत्वादेः स्यात् शैषिकः कप्

त्रपसर्जनेन समासं नापेक्षकस्य षष्ठी कस्या अप्राप्तत् ॥ अनेक आह ॥ अयं समासांत इति कथं पुनर भा
वो भावस्यावयवः स्यात् तत्राह स्थानिद्वारेणेति ॥ औपचारिकमवयवत्वं वचनबलादिभा
वः ॥ वयसीति कथं नहि समादन्ते पोषात् सुदतीसमर्जेति । न ह्यत्र वयो गम्यते न सुदतीति भा
ष्यं ॥ आह ॥ शोभनादंतादस्याः समस्त जाता । ननु नूनमिति कथं चोद्देशविषयो गम्य
त एवेति ॥ उरःप्रभृतिभ्यः कप् लक्ष्मीरिति । न च नञ्चेति सिद्धनियमार्थमिह पाठः एक
वचनांतस्यैव नित्यो यथा स्यात् । अन्यत्र शेषादिति विकल्पार्थ इति तेन अरुशमरूपाल
क्ष्मीको न सोढं सिनिम इति सिद्ध ॥ अरुशाः लक्ष्मी यस्येति विग्रहः ॥ यत्तु प्राचोक्तं नञ्तश्चे
ति कप् ॥ बहुलक्ष्मीक इति तत् प्रासादिकमिति व्याख्यातारः । नियमशास्त्रस्य निषेधमुखे
न प्रवृत्तिरिति नियतमाश्रित्य वा योज्यं । अनर्थके नापीति । कथं तर्हि सुपर्वाणः शी तिप्रा
चामुदाहरणं स्वयमप्यनुसृतं ॥ कपो दुर्वारत्वात् ॥ नञ्च नञ्तमनादिति निषेधः प्रच
प्राचीनानामेव सम्यग्निर्देश्यमानत्वात् । समासांतविधिरनित्य इति कथं चिन्त्य
माधेयं सुपर्वी तिपुरोरनाकस्तु त्रीयभाष्यादेव नुक्तं ॥ तत्रादिनेति ॥ एतच्च व्रतसूत्र
स्य रतादिग्रंथानां बहुव्रीहिप्रकरणे कवमा आर्यचेतिव नतु नः भाष्यकारोक्ते त्युप

ति२

शिव१

ष्यालो वचनयालभ्यते ।। यत्तु बहुव्रीहि इतिपदोक्ताः समासास्ताः सविषये बाधका भवंति ।
नान्ये ।। अनुक्तसमासांतपरेण शेषग्रहणेनेति तत्र ।। अवकृ इत्यादीनां समासांतरेवारि
तार्थं तयापरेणकपा बाधापत्तेः ।। बहुनारुगीति उपसर्जनह्रस्वः ।। सप्तमी विशेषणे कंठे
कालइति ।। यदा कंठे किंचिदस्तीति निर्ज्ञाने कालइति विशेषणं तदेदं बोध्यं ।। अन्यदा तु
सप्तमीग्रहणं विनापि विशेषणत्वादेव सिद्धं ।। चित्रगुरिति ।। यद्यपीह उपसर्जनह्रस्वीभ
तिसिद्धं तथापि बहुव्रीहौ सप्तमीत्युक्ते तत्र कोंड इत्यन्यपाये न उपसर्जनह्रस्वत्वं बाध्येत ।।
अतो विशेषणग्रहणं ।। सर्वनामेति ।। कथं तर्हि तः परो यस्मात्स तपर इति ।। कथं च जह
त्स्वार्थाः शक्तिरिति ।। इह हि जहत्स्वं पदं ये जहत्स्वं च सोऽर्थो यस्मा इति बहुव्रीहिगर्भो बहुव्रीहिः ।।
तथा च स्वपरशब्दयोः सर्वनामत्वात्पूर्वनिपातनभाव्यं सत्यं ।। अत्र भाष्यादिप्रयोगाज्जहदं
तादित्वाद्वा सिद्धं ।। सारंगजग्धीति ।। अस्वांग पूर्वपदाद्वेति ङीषु नायं वा स्वस्मिंनिमित्ति नपुं
सके भावे क्तः इत्यस्य न पूर्वनिपातः निष्ठाशब्देनावेहि तस्यै वैकल्पग्रहणादित्याहुः ।। ।। ब
हुव्रीहिः ।। ।। चार्थे द्वंद्व इति चशब्दस्योत्सार्थः ।। असामर्थ्यादिति ।। एकार्थीभावाभावा

स॰ मा
१४५

दिस्यर्थः ॥ तथाहि बहुव्रीहिघटकपदानां कर्मार्थं तन्मभावेन द्वन्द्वघटकपदानां चार्थे तन्मभावे
न एकार्थीभावस्यावश्यकत्वं समर्थः पदविधिरिति परिभाषितत्वात् ॥ चार्थे द्वन्द्व इत्युक्तेश्च ॥ नचै
कशङ्कि विषयाणां समप्रधानानां परस्परं निरन्वयइतरान्वयः संभवति येन तत्समुच्चयानां
चयोस्यातां किंतु मिलितानामेवान्वयो वाच्यः मेलनं च समुदायः स च वार्त्तिपदार्थश्च
ति विशेषणं विशेष्यं चेति द्वैधं तत्राद्ययोरन्तरेतरयोगद्वन्द्वः द्वितीये समाहारद्वन्द्वः उभय
थापि समुदायस्य द्वन्द्वेनोक्तत्वाच्चशब्दाप्रयोगः न चैवं नीलोत्पलमित्यादावपि चशब्दा
तन्मभावेन विग्रहदर्शनादेकार्थीभावसत्त्वाच्च ॥ द्वन्द्वो दुर्वार इति वाच्यं ॥ सामानाधिकर
ण्येन विशेषणतेति तत्पुरुषसंज्ञया द्वन्द्वसंज्ञाया बाधात् ॥ अतु कोचित्कर्मधारयसंज्ञया बाधस्याद्व
स्त तत्पुरुषस्योः एकसंज्ञाधिकारबहिर्भूतत्वात् संज्ञानां परस्परसमावेशस्य सुप
सिद्धत्वाच्चाप्रवृत्तौ ॥ सामानाधिकरण्याविवक्षायां तु द्वन्द्व इष्टापत्तिरेवेति दिक् ॥ होतृपोतृ
॥ अनयोरुत्तरपदत्वाभावादानङ् ॥ अनाद्यप्रदत्ते ॥ कथं तर्हि अस्त्यौ थद्वौ दार्प्यविशेषशालिनी
लोचनाधारकृत् नराणेनिभारावि ॥ अग्राह्य ॥ ॥ अत्र नित्यमिदं प्रकरणं समुदायाभाद्बहुत्वादिति

द्विवा॰
१४५
145

दृश्यते ॥ द्वंद्वश्च प्राणितूर्य्यसमाहारे वेति ॥ विपरीतस्तु नियमो न भवति समाहारे प्राण्यङ्गादीनामेवेति ॥ निष्प्रत
वेत्येवेति सूत्रे च कुर्वन्नगृह्णात्याह समाहारवचनस्य माभूदितिरतं तिप्प्रसुतं धास्यतीति पर्य्यायः ॥ उदगादि
नि ॥ इत्यत्राङ्कोतकुकालेषु च भेदेन्तु भ्रातीति शितेषाचाभ्यां तत्रोग तव्यामिति संवादेरत्वात् तत्र विस्मृत्य क
क्विप्तासनं तव्रतीदमुच्यते ॥ कठेन प्रोक्तमधीयते कठाः वैशम्पायनान्तेवासित्वाणिनिः कृतचरकाद्धुक ।
अध्येत्रणस्तु प्रोक्ताल्लुक् कालापिनाश्च सब्रह्मचारीत्यादुपसंख्यानादित्ति लोपः ॥ अध्वर्युक्रतुरनपुंसकं
त्र्यपतिनरतः ॥ यजुरिति ॥ पदानमधीते पदकः क्रमादिभ्यो वुन् ॥ एवं क्रमकः पदान्यधीत्य क्रमोध्येतव्यः
इतिस्यष्टत्वत्यासत्तिः अध्ययनतः कृपितापुत्रोऽविप्रकृष्टेति किं याज्ञिकवैयाकरणौ ॥ जातिरप्राणि
नां कथं तर्हि रिंजितानुशिखिधास्तस्वोलादिति भारविना तत्संहिताः शोलादिति व्याख्येयं ॥ विशिष्टलि
ङ्गो नदी ॥ स्त्रैवत्वारोपृथग्दार्वा अवयवधर्मेणावयवे निर्द्वंद्वे बोध्यः नदीग्रहणमदेशत्वात् ॥ जन
पदादिदेशः अत एव पर्वतानां न केलक्षगन्धमादनं च केलाशगन्धमादने ॥ चकारेण बाध्यते ॥ इ
चकारः पुनर्विधानार्थ इति भावः ॥ पात्राविति ॥ यैर्भुक्ते भस्मना शुध्यते कांस्यमित्यादिस्मृतेः सुसं
संस्कारेणापि पात्रं न शुध्यतीति तेषामित्यर्थः ॥ अनिरवसितानामिति निषेधबलादेव शूद्रशब्दः
त्रैवर्णिकेतरपरः न तु शूद्रत्वजातिपरः ॥ गवाश्वमितीति ॥ इह पशुद्वंद्वे विभाषार्थग्रः ॥ दासीदासामि

ति॥ पुमान् स्त्रिया॥ एकशेषो ऽनुवर्त्तते॥ अत्र नात्रैक॥ गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्वरूपं तामि
ति गणपाठो रूपमेषां विगृह्णीतानुपूर्व्वोत्तरपदनिर्देशः शासमानेनात्पर्य्यमित्यर्थस्तेनाश्व
ऽश्वाभावप्रसंगे न भवति॥ अपशवो वा ऽन्यत्र अन्य पशवो गावः अश्वाः पशुग्रहणमिति॥
विकल्पार्थमित्यनुपपद्यते॥ नपुंसकत्वार्थमिति॥ अयं भावः पशुद्वंद्वे सेवसिद्धे॥ अश्ववडव
यः पूर्ववत्प्रतिपत्तिविधानार्थं तेनाश्ववडवमित्येकवद्भावपक्षे पूर्ववदश्ववडवाविति नद्वाधित्वा
सनपुंसकमित्येतदेव भवति॥ तथा हि नान्ये एकवद्भावभाजं परामृश्य विधीयमानं नपुंसक
त्वं शक्यं एकवद्भावविरहपक्षे साधयितुं शक्यत्वात्। विप्रतिषिद्धं च भवत्येवेति। विप्रतिषिद्धग्र
हणाभावे नु सनस्यात्॥ अद्रव्यवाचिनामेवेति नियमादिति भावः॥ यत्तु रन्तिरन्ता कामक्रो
धावित्युदाहृतं तन्न तत्रापि शीतोष्णे सुखदुःखमित्यादाविव पाक्षिकस्यैकवद्भावस्य दुर्वा
रत्वात्॥ नियमं मंथेलोदरस्य मिति निस्थितं॥ न चाद्रव्यवाचिनां वैकल्पिकत्वेति तर्हि विप्रतिषिद्धानामेव
तदाशयः कल्प शीतोष्णे उदके इत्यत्र पाक्षिके कैकवद्भावापत्तेः॥ न चेष्टापत्तिः अनधिकरणवाची
ति किं शीतोष्णे उदके इति स्योक्त्या सह विरोधापत्तेरिति॥ दधिपयसी इति व्यंजनत्वादि कलः॥

अधिकरणैतावत्त्वे च समासार्थस्याधिकरणमाश्रित्य योवर्त्तिपदार्थः तस्य एतावत्त्वं परिमाणनि
यमः तस्मिन्गम्यमाने इति व्याख्येयं । उभयसंख्येति । अत्र व्याचख्युः समाहारद्वंद्वस्यैवायं निषे
धो न तु नियमस्य तथात्वे हि स नित्यं नियमयेदिति षष्ठ्यपि चार्थे द्वंद्व इति समाहारद्वंद्वः स्यात् इतीतरेतरेति
ध्वनयन्व्याख्येयं । नियमो न स्यादिति । अयं भावः प्राचां पक्षे दशादंतोष्ट्रा इति त्वदुदाहृतमेव
न सिद्ध्येत् । प्राण्यंगानां समाहार एवेष्यते न इतरेतरः योगद्वंद्वस्य निषिद्धत्वात् । न तु समाहारद्वंद्वो
पि प्रसक्तस्सूत्रेण निषिद्ध इति चेत् । तर्हि वाक्यमेव स्यात् । द्वंद्वद्वयस्यापि निषेधात् ॥ एवं च पंच
स्विन्नस्याधिकरणाभिरव्याभिक्षाधुना मधुकरी सद्द्वेत्यादिना मसाधुत्वं स्यात् । किं च समाहार
द्वंद्वनिषेधोप्यर्थः न्यायबलेनैव तद्वारणात् । तथाहि । वर्त्तिपदार्थस्य संख्याविशेषे द्योतिते स
माहारद्वंद्वस्य प्राप्तिरेव नास्ति सविशेषणानां वृत्तिर्नेति वचनात् सापेक्षत्वेनासामर्थ्यात् । कथं त
र्हि दशायं चमत्वा इति समाहारे द्विगुरिति चेत् । प्रधानभूते समाहारे दशसंख्यान्वयादिति गृहाण
न चासन्यायेनेतरेतरयोगद्वंद्वोपि न स्यादिति वाच्यं तत्र प्रधानस्य सापेक्षत्वात् उक्तं हि भाष्ये भ
वति वै प्रधानस्य सापेक्षस्यापि समास इति न्यायश्चैतत्तावत्प्रधानस्यैकदेशत्वाभावात् ॥ सामान्याप्रयो
गइति लिंगादिति दिक् ॥ विभाषा समीपे । पच्चपौरु समाहारद्वंद्वो वेति व्याख्यानेपि न दोषमित्याह

म॰ रु॰
१५१

पिवक्रममनुरुध्याह ॥ नियमो वास्यादिति ॥ उपदशमिति । एकवचनं वा पूर्वेऽव्ययीभावस्य चानुप्रयो
गः ॥ यदि तु बहुव्रीहिः स्यात्तदा उपदस्य पाणिपादस्येति षष्ठी स्यात् ॥ उपदश पाणिपादस्येत्येवं चेष्यते
इत्याकरः ॥ आनङृतो द्वन्द्वे ॥ उत्तरपदे नष्टे पूर्वपदं नाक्षिप्यते तेन मध्यमपदस्याप्यानङ् न भवति ॥ होतृ
पोतृनेष्टोद्गातार इति ॥ एतद्व्यसमर्थसूत्रे भाष्यकारेण पदयोः स्पष्टं ॥ आनः सहोभयत्र मस्यास्तनीयाम्
इति सूत्रपदमनर्थानुस्पष्टतरा यत्तु ज्ञाचोक्तं पूर्वपदस्याप्यानङ् स्यादिति । पञ्च व्याख्यातं भिद्
द्वन्द्वपदकार्यविज्ञापनमाह न्यवनारित यश्चाधिकृतेनोत्तरपदं नष्टे पूर्वपदमाक्षिप्यत इत्युक्तं तत्सर्व
माकारविरोधादुपेक्ष्यं ॥ प्रसिद्धसाहचर्यस्येति द्वन्द्वस्य मर्यादावचनस्य क्रमस्यापत्तपात्रव
या कृताभिव्यक्तिर्घिमिति सूत्रेऽभिव्यक्तिग्रहणो नात्यन्तसहचारि तद्युगलं द्वन्द्व इति निपातनादिति भा
वः ॥ इत्यः देवताद्वन्द्वे इति ॥ काशिकानुरोधेनानुवर्तितं ॥ आश्वलायनसूत्रे निर्लनयोर्द्वं
वताद्वन्द्वे पि दृश्यते ॥ आग्नीषोमी प्रणयामीति ॥ आग्नेरुद्देति । अग्निः स्तूयतेऽस्मिन् स क्रतु
विशेषः संपादादित्वादधिकरणे क्विप् ॥ रुत्वमा भूदिति ॥ अकारस्येति सकारस्य श्रवणं भवति
तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः ॥ विसर्गमिति ॥ तथा च षत्वविधिकारे नेयवानुमे
यः लक्ष्यानुरोधादिति भावः ॥ मातरपितरौ ॥ मातरशब्दस्यारङादेशो निपात्यते ॥ वाक्त्वक्

श्रीव१
१५१
147

मिति॥ वृद्धानां दृढेनुयाकुत्सकुत्वं दृढगर्भे दृढेनुवाकत्रजत्वं॥ इति दृढः॥ विरूपाणामपीति॥
॥ नक्षत्रमेषामिरेवसुलभेरूपेनेइतिपुनपुन्सांसौत्रस्यरूपश्रुत्यस्यार्थपरतयापिव्याख्याना॥ रथो
रथा॥ अपत्यमत्रैङ्रिंतरमितिरवोचार्यः परिभाषितस्येत्यत्र नारत्तिमगसांरुचयानदी
॥ गोत्रशिष्यतरतिभागविज्ञीभागवितिशाष्ठान गार्ग्यकादिनत्रायु निरस्ता वीरबुब
दुलमितिकुत्सायांठक्॥ कुत्सासौवीरत्वं चाधिकमपेक्ष्यते॥ ननुपुत्रत्वमात्रकृतेनैवरूपगा
र्ग्यगार्ग्यायणौ॥ हिरण्यवरत्वं शवेरूपं नगोत्रादिदृष्टं॥ एवञ्चपुत्रयुक्तं वेलक्षणं स्फुटीकर्तुं वि
वधनानेन विग्रहमाह॥ गार्ग्यायणावितिः॥ पुमान् स्त्रिया॥ ननु रसंख्यवरश्चेत्यत्र प्रसंगः स
मस्त्वजातिसाम्येपि वैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्ताद् इति चेन्नैवंसरूपगत्र
नुरत्ने॥ अनुरसौ ज्ञापकं नुभ्रातृपुत्राविति सूत्रं॥ नन्वेवमपिगोरियं गोश्चायं तयोः सहो
॥ तौ गावाविति नियमतोनस्यात्तल्लक्षणविशेषाभावादिति चेन्नैव॥ तदितरलक्षणविशेषविरह
रूपविशिष्टाभावेनान्ययोत्सचेद्विशेषाभावोस्येव॥ इदं द्राणपाविस्यादोतु नैकशेषः॥ पुयोग
वत्तविशेषात्॥ पिता मात्रा भ्रातृपुत्रौ नत्वेतत्सूत्रं अदृष्टं व्यर्थो॥ तथाहि॥ यः शिष्यते स लुप्यमा

विद्

ति०

म॰२॰
२५८

नार्थोभिधायीति न्यायेनास्मिन्विषयेपि तृशब्दाद्वमातरमपि यक्तिश्वसुरश्वश्रूं न तु शक्तिरेवेति
ऽस्त्येलक्षणा । वस्तुतस्त्वादेतत्त । तद्यस्य येन विनापि सुलभं न च पूर्वसूत्रं समूहवत इदमपि सूत्रद्वयं
हि निरर्थकमिति वाच्यं द्वन्द्वे द्वन्द्वस्यापि पदेऽइष्टत्वादिति चेन्न ॥ एवं ॥ पितृश्वशुरशब्दयोरिव मा
तृश्वश्रूशब्दयोः उक्तविषये केवलयोः प्रयोगं वारयितुं सूत्रारंभात् ॥ अनभिधानमाश्रित्य प्र
त्याख्यानं तु दुर्बलमिति दिक् ॥ त्यदादीनि सर्वैः सर्वैः किं त्याःस त्यत्यदादिभिरेव सहैकावि
वक्षायां मा भूत् । पूर्वस्य मातिशब्दपरविप्रतिषेधादिति भावः ॥ त्यदादितः शेष इति ॥ आद्यादे त्वात्त
सिः त्यदादीनां शेषः स्यात् विवक्षितेषु यः पुमान्यच्च नपुंसकं तच्छेषो न लिंगप्रतिपादकानि भवं
ति अर्थात् त्यदादीन्येव ॥ अद्द्वन्तादेः दृग्धादि विशेषणानां प्रायुक्तं न किं तु विशेष्याणि ब्रूते
चेति भावः ॥ तद्वेति । पिप्पल्याः अर्धं पिप्पल्यर्धः ॥ सा चेति ॥ अर्धपिप्पलीत्यर्थः इह सर्वत्रेति
एतेन तरत्वं दूनानेकशेष इति भ्रमं व्यावर्तयति ॥ ननु तथैव किं न स्यादिति चेन्न । एकशेषस्
स्यान्तरंगत्वात् ॥ न च यद्दुराम्रमात्र किं तु पलोपि विशेषोऽस्तीत्याह तेनेति ॥ यस्तु द्वन्द्वापवाद
एकशेष इति केषांचिदुद्घोषस्स आपवादशब्दो बाधकमात्रपरतया नेयः । इकोगुणवृद्धीइति सू

वचनात्तिः

त्रिवङ्गः
२५९
178

त्रेतश्च षस्तदप्यवादोवेत्यत्रयथा॥ त्यकशेषः॥ ॥पुंसंगादाः परार्थ ति॥ अभिधान मितिकु
रणात्लुप्॥ अनेनेतद्दर्शयति नकेवलयोल्ल स्यापायवयवशा त्यासर्वत्र निर्वाहः॥ किंतु विशिष्ट
विषयकंशा तत्प्रकारमेवस्वीकर्तव्यं॥ अत एवतो विशेषणस्य पदार्थैकदेशत्वान्न विशेषणसंबंधः॥ द्वं
द्ववशा स्याप्रयोगः बहुव्रीहौ पयूदादेः वाक्येतु सर्वमिदं भवत्येवेति वेलक्षण्यं किंच॥ अवयवशक्त्ये
वनिर्वाहः इत्याग्रहमीमांसकानां बहुव्रीहौ अन्यपदार्थशक्तिर्न सिद्ध्येत॥ योगरूढ्य नत्सहादिनां
दुर्ह्येभास्यान्तरत्वशक्त्यनुसारिणापानिरूढलक्षणापेव निर्गालान्॥ न वेशपातिः अपसिद्धान्ता
दितिभावः॥ अविग्रह इति लौकिकाविग्रह इत्यर्थः॥ अस्वपदेनेति समस्यमानयावत्पदा घटि
तविग्रह इत्यर्थः॥ कृद्धृः॥ अजस्रमिति॥ इह तु त्मत्यपविधौकरग्र अजस्रशनि समस्तानुवादस्
मर्थ्यान्नधातुनासमासो किं त्विप्यतेतत्रैव वनिर्पत्तनेइति इह दत्तौदिग्र येस्य शिति अत्तार्थ कृने
नसहेति योगविभागेनाप्यनतसुसाधम्॥ ॥इति सर्वसमासशेषः॥ अकृ स्तद
त्तस्येति॥ तद्वाचकपरशब्दान्तस्य तात्पर्यः यदितु अजेसमासार्थ सति नेति व्याख्यायेत तर्हि इह
इदं इत्यत्रैव स्यात्तन्नाशप्रत्ययपादिचाद्वेद्वे पदे नेति व्याख्यायेत तो गन्दपूरित्यत्रैवस्या

म॰ मा॰

१५९

त्वान्नुदृष्टपूर्वत्वइत्यत्रोनत्स्मात्त्यात्मित्यापात्तोक्रमेवक्ष्यामः॥ तत्समासांतस्यपत्तिये नाविधिस्त
दन्तस्येति सूत्रे प्रयोजनं मेहृदपूस्य सनृणां दीर्घविधाविति वार्त्तिके आपस्मिंइतिस्वाप इति भा
ष्यवान्नत्रमासेणामित्यवधेयं॥ व्रतीपसमीपमिति वाति कूलासंज्ञ नान्यत्र आपोस्मिन्निति वि
ग्रहः समासोदयजनमिति॥ दवाइत्यतेस्मिन्निति ——— तिसुत्यत्यायत्तभूमिः समा
यशाद्वस्यपुंस्त्वं लोकादित्याहुः॥ भाष्येनु क्लीवत्वमुदाह्रियते॥ अवर्णान्ताद्भवते॥ द्व्यंतरि ति
ति
सूत्रे परआद्ईत्वमनवर्णादिति वक्तव्ये मा भूत् द्वापं परापमिति भाष्ये॥ नतेत्रेति
सूत्रेवद्विधिनस्मात्वाबीलस्वांगादिस्वरणान्ते दाधस्तु पञ्चम्या अवीनं द्वेपं परेपमिति भाष्ये
केश्वेति भावः॥ ऊदनोर्देशे दीर्घो वाग्णाश्रयणेदीर्घमित्याकरः वहूचासुस्वरूपेगोमानोभि
रित्यादेश्वनूपशाद्वं नावगरह्लोति॥ अनुगतान्यापोस्मिन्नितनूपोदृशः जलप्राय मनुरूपस्या
न्यमाः॥ प्रतिसाममिति॥ अव्ययीभावः प्रादिसमासः बहुव्रीहिर्वा स्थभूमइत्यादयो बहुव्रीह
यः पक्षता भवति पद्माकाराणाभिर्यस्येति गोरूणं नपभशब्दनसामानाधिकरण्याद्बहुव्री
हिः यद्वागंङ्गदित्वात्सवन्त्याः परनिपातः एतेनोर्णनाभो व्याख्यातः अत्र आपः संज्ञा छदसी
रिति ह्रस्वोविशेषः गवाद इति गावः किरणाः॥ अचतुरेति निपातनं न इति॥ निपातनफलन्तुस

शिव॰

१५९

149

मांसविशेषनियमः इरिलापादिकं च ।। तदहाराः आद्या इति बहुव्रीहिः यद्वा इति बहुव्रीहौ एवेत्यर्थः ।।
तेनानन्तत्पुरुषे प्रचत्वार इत्येवेति भावः ।। त्रिचतुरा इति ।। त्रयश्चत्वारो वेति विग्रहः संख्य
याऽव्ययेति बहुव्रीहिः बहुव्रीहौ संख्येये डजिति डचोऽपवादो च अत्र त्रिचतुरमिति ।। द्वारगवादेकव
चनात् ।। ऊर्वष्ठीवमिति ।। सक्थ्यस्थीवन्तु मानुषे इत्यमरः ।। जानूरूपर्वाष्ठीवदस्थियामिति च ।। स
रजः पंकजं इति कथं न ॥ सरजसमपराजयके तकीमांडसवमित्यादि सरजसमकरं दनि
र्भरात्तु अव्ययविभक्तिबुद्धीरधाविरजाइति प्रमादएवायमित्याहुः ।। गोष्ठश्वेति ।। राजे
नसप्तमीतत्पुरुषएवेति नियमं दर्शयति षष्ठीतत्पुरुषे तु गोष्ठश्वेत्येव ब्रह्मवर्चसमित्या
दि षष्ठीतत्पुरुषौ ।। वर्चो दीप्तिः फलं मांसमई नीलिपत्यः मांसभोजी तदीयं वर्चः पल्लव
र्चसं ।। अवतमसमित्यादि अवहीनं संततं च तम इति विग्रहः ।। अन्धमिति गाढमि
ति फलितोऽर्थः ।। अत एव ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः विष्वक् संतमसं इत्यमरः ।। श्वसो वसु प्रश
स्तमिति एतेन अवसु श्वाश्वादीयस्तु निष्कु वसीयदिति व्याचष्टा तामाकरे विरोधादुपेक्ष्या इति ध्वनयति व
सीयइति ।। तथा चास्यते यः कामयेत वसीयान् स्यामिति वसु मांपत्नो वसीयान्स्यामि
दू

तिर्वश्वसशब्द इति यद्यप्ययमन्यत्र कालविशेषे वर्त्तते तथापीह समासे उत्तरपदार्थभूतं प्रशंसामाश्रित्य
विपर्ययमाह ॥ अग्नी विषयतायात्योतकोयमिति यावत् ॥ एतच्च श्वस्तिरीत्याकं ॥ श्वसशब्दस्येतदर्था
वनासीत्यापि सुवचं उत्तरपदार्थमात्र इति वा लुप्तं च पाणिनीयमतदर्थेण ॥ अर्थं परपदस्य
श्वः शब्दः कालवाच्यपि अभियत्रेत्स्वभावेन तेन नमो मंगलार्थं कात्विति ॥ अन्वक्षर इत्यप्रक
रमनुच्यते ॥ अनुगतमक्षरं तं चरः इति प्रादिसमासः ॥ अनुगतं तरहोस्मिन्निति त्यादि बहुव्रीहिर्वी

व६

तन्त्रमित्तन्त्रं परेणानाधिगम्यादिह यदुक्तो वृक्तितग्रवक्त ॥ तं ग्रवतद्गहश्चेति तन्त्रमन्तरः से विदुः ॥
नरजनात्त इत्यतः प्राणीति प्राग्बहुव्रीहिग्रहणं कर्त्तव्यमिति वार्त्तिकोक्तेरिति भावः ॥ प्राच
तु बहुव्रीहौ सङ्ख्यपदार्णोरनिषेध इत्युक्तं नञ्पूर्वे इत्यादावित्यर्थ्या शरेण वायाज्ञातेन सु
धीरित्यादिसिद्धं ॥ नञ्स्तत्पुरुषात ॥ नञ इति षष्ठी ॥ इति सकलसमाससाधारणाः समासा
न्ताः ॥ स्तोकान्मुक्तः इति ॥ समासप्रयोजनं तु स्तोकान्मुक्तस्यापत्यं स्तोकान्मुक्तिः स्तोकान्मु
क्तायाः स्तोकान्मुक्तेयः इत्य स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेनेति समासः ॥ आस्त्रे पठितात् एव स्तो
कादयोगस्यत्त इत्याशयेनाह ॥ एवमिति ॥ ओजः सहकथं नर्हि सततनैशतमोवृतमन्यतर

न्तेभारवि:॥ अत्र तु यदि रतिरन्ते उत्तरपदाधिकारे तदलुग्ग्रहणं नास्ति किं तु केवलपदाधिकार इ
वेति तत्रा भाष्ये पदं गाधिकार इत्यत्र हृष्टकेषीकेत्यादेः प्रयोजनत्वेनोदाहरणात् यदपि हृद
तादयकश्चाहुः उत्तरपदाधिकारेण पूर्वपदे नेहृत्कोजःप्रभृतयो विशेष्यत्वे पूर्वपदभूतेभ्यः ओ
जःप्रभृतिभ्य इति नचात्र तमःशब्दः पूर्वपदं किं तर्हि सततनेशातमःशब्दः यत्र तु तदन्तवि
धिरिष्यते तत्रोपात्तेनन्वाह्निलविशेष्यत्वेपथाहृष्टकेषीकान्तविति तदपि चिन्त्यं भाष्य
वार्त्तिकविरोधात् विशेषणविशेष्यभावस्य वस्यार्थमेव पदं गाधिकार इत्यादिनात्र शक्तिरि
तिकैयटवचनस्य चमपि व्याख्यातत्वात् भारविप्रयोगस्त्वन्यः समाधेयः॥ कृतं रात्रिः नैश
तमस्तौ कृतं तत्तत्तिषष्ठीतत्पुरुषः नपुंसकभावे कृत्स्नयोगे ङौषधिवत्तायां षष्ठीततस्सत नैश
तमोकृतं यस्मिन्निति बहुव्रीहिः यद्वा रतु वर्त्तनेयन्तर्थे [illegible]
[illegible] क विधानमिति भावकः शेषप्राग्वत् स्वराशतिवत्कव्यमिति हृत्यात्मनश्रुतं
शापिवार्त्तिकान्तर्गतः ननु सत्वमितिकोचेष्ट्राम्यन्तितत्रादर्तव्यमिति भावः नयाहिसातिउ
नरस्तचेष्टात्मनइति न लभ्येत परस्य चेति नदुतरस्तु चेव व्यर्थमेव स्यादिति स्पष्टमेव विवक्षि
तो बहुव्रीहिर्वाध्यः इति एकस्यापि वस्तुनो भेदपरिकल्पवर्त्तिपदार्थत्वं अन्यपदार्थत्वं च

म.र.
१५१

——— ज्ञणोयमिति भावः ॥ वैयाकरणाख्यायां व्याकरणे भवो वैया
करणी श्रणत्नगयनादिभ्य इत्यण् सा चासावाख्या चेति कर्मधारयः ॥ आत्मनेभाषा इति ॥ यद्यपीय
माख्याष्टाध्याय्यां न दृष्टा तथापि वैयाकरणी भवत्येषा धातुसूत्रगणोणादिवाक्यात्मकं पंचग्रस्था
नं व्याकरणमिति स्वीकारात् ॥ अस्याश्च धातुपाठे दृष्टत्वात् ॥ ननु प्रवर्तितचिरत्नभावविरहात्
रंधनायस्यालीगनिवत् समासो न स्यादित्यत आह ॥ योगविभागादिति ॥ एतच्च वृत्तिन्यासादानुसृत्यो
क्तं अलुग्विधिसामर्थ्यादित्यपीह सुवचं ॥ पूर्वं [illegible]च ॥ हृदिस्पृगिति ॥ हृदयं दिवं च स्पृशतीति वि
ग्रहः ॥ कर्मण्यधिकरणत्वविवक्षायां सप्तमी ———
भाष्ये तु कर्मण्येव सप्तमी नु क्तं अलुग्विधिरेव ज्ञापक इति तदाशयः ॥ अप्सव्य इति ॥ दिगादित्वाद्यत् ॥ अगु
ण इति वान्तादिपाचानुपत्तु स्थाने जशत्वपठितत्वाभ्युपगमस्तु हते तदाक[illegible]विरोधादुपेक्ष्यं ॥ अमूर्ध
इति हलन्तादित्येव सिद्धे ॥ अमुमतामिति [illegible]कार्ययोरामभागयोः ॥ अस्वग्ने सेष्टवम् अमुमेसामा
प्रवीतारमन्तु वाक्ये नत्र बाह्यप्रयोगास्मि ॥ नन्वेवं प्ररूतिवदनुकरणमित्यतिदेशान्न अमुरिति स्यात् ॥
प्रत्ययलात्तत्तदंताः प्रथमायाश्चाभावे मतुवे पदुत्वभः ॥ अतिदेशाप्रवर्तनोत्तु सालुक्कः प्राप्ति
रवनासीतिचेत्सत्यं अतिदेशस्य वैकल्पिकत्वान्नोक्तदोषद्वयमपि वैकल्पिकत्वे प्रमाणं

इत्यधिवक्षः
१५१
151

तुयन्नदत्तेभ्यस्तिसोऽत्रनिर्देशः ॥ उक्तः ॥ वृत्त वार्त्तिकमपि न यत्निधेयं ॥ यत्तु वाचामतिष्ठितिपठित्वा
म्नश्रुमतिरित्युदाहृतं तन्मन्दः ष्याद्वेन हर्ष्यत्तु वदन्तिमत्तुष्ठितिपाठप्रथमांतान्मतुपः कथं भवः इ सं २
निचिंत्यं तन्देवप्रियं नंपाठान्तरस्यानारकत्वान्मतुपः संभवोक्तत्वाच्च पश्यतोहर इति षष्ठी चाना
दरे इति षष्ठी पश्यन्तमनादृत्य हरतीत्यर्थात् ॥ देवानां प्रियेति ॥ मूर्खा हि देवानां प्रीतिं जनयन्ति
देवपशुत्वात् ॥ शुनःशेप इति ॥ शुनवशेपमस्य शुनःशेपः ॥ शेपः शेपश्शब्दो हि स्वकारान्तोप्य
वो १ स्ति श्रीशो नीपादित्याद्देरणादिकः पद्यमयः तथा च मंत्रः ॥ अस्या मुंचं तः शुनःशेपमि
ति ॥ एवं पुच्छलांगूलाभ्यामपि बहुव्रीहिः ॥ ऋषिविशेषणमेताः संज्ञा वर्द्धव ब्राह्मणादेव
विसर्गः ॥ मातुः पितुर्भ्यामिति सूत्रे समासइत्यनुवर्त्तितं तस्य फलमाह ॥ असमासे त्विति ॥ इह
पाक्षिकमपि षत्वं नेत्यर्थः ॥ अलुक्समासः ॥ घरूपेचेलडिति पचादेरित्यपद्यते वर्थं ब्राह्मणी
तरति तेनसि लादिघिन्निपुंवद्भावस्तु न जातेश्चेति निषेधात् ॥ एतेन पुंवद्भावं बाधित्वापरत्वाद्ध्र
स्वइति व्याचक्षाणाः परास्ताः ॥ आमलकीतीति ॥ आमलकीशाखा रक्ताने स्त्रीलिंगः ॥ एवं
कुवलीशब्दः ॥ नद्याः शर्वस्य त्वेश्रुतादन्यशेष सच द्विधेत्याह अश्व नेतिनिर्मूलमित्यन्तुरीति
रुनोक्तं पुंवद्भावोत्र पक्षेवक्तव्यः ॥ अयस्त्र शविवृत्तशब्दकर्षयोगात्त्राकुरुत्वीत्वस्याविवद्धि
ने २

न त्वास्मि इस्मिन्निति ।। अत्रेदं वक्तव्यं इयुवङ्स्थाव इत्यादि मुनित्रयानुक्तत्वादप्रामाणिकं ।। सत्त्व
न्ता ङिन्न सिलादिष्विति नित्यः इयुवङ्स्थाव उक्तः ननु यास्ति कः भाष्य वार्त्तिकयोरपि नाधिकमु
क्तं प्रमाणं तामभ्युपेत्यापि ब्रूमः कथमिह वचनं व्यस्तं इयुवङ्स्थावो यः प्राप्तः सोत्र पक्षे वक्त
व्यः इति उत इयुवङ्स्थाव इव वक्तव्यः इति ।। अयमियुवङ्स्थावनिषेधार्थमिदं वचनं स्यात् ।। तथा च
इतः प्रागेव ल्वादृत्ताहृताभिः अयसी तमां विदुषीतमा इति दीर्घङी बिशिष्टान्निरूपाणि सिद्धानु
नाम प्रकर्षयोगादित्यादि त्वदीयग्रन्थस्त्वसंगत एव स्यात् सद्भिरुपसंख्यानमप्या चष्ट इति
न्यासकृतोपवर्णितः प्रत्याख्यानं च तस्य इयुवङ्स्थावफलकत्वे सत्येव स्यात् ।। ननु नान्निर
त्तिफलकत्वे वस्तुतस्तु तदपि न ।। ज्ञापकं तदन्तात्तद्धितविधानार्थमित्युक्तत्वात् ।। स्वार्थ
इत्यलिंगायन तरमेव श्रियकृत्तं न प्रकर्षादिविवक्षेति भावो निरूणीतः वाद्वितीयस्तु संभ
वत्यादि न सिलादिमध्ये तत्तमपो न गणपाठतो तेनु सर्वेरेव परिगणितो दर्शनीयतरा
दर्शनीयतमेति चोदाहृतं न च इति ग्रन्थो विदुषीतमेत्यादि दीर्घोपन्यासः स्थितं प्रदर्श
नपरो न तु त्रेरूप्यपर इति वाच्यं ।। प्रकर्षयोगादित्यादि ग्रन्थशेषविरोधात् ।। तस्मादसंग
त एवायं इति ग्रन्थ इति एतच्च सर्वं इति मन्यत इति वदता हरदत्तेन ध्वनितं ।। न्यासकारस्य तु इदमु

पसंख्यैनमिति भ्रमः तत्रत्याख्याने युक्तमिति भ्रमश्चास्यैवेति मन्तव्यं यदुक्तौ नास्पष्टमेव
एवं स्थिते पदेतेषु वचनेषु वीवक्षारमिति प्रक्रियाग्रंथः न्यायसिद्धमिदमित्यादिना व्याख्यातं ग्रं
थस्य चरितन्यासोक्तकार्यानुवादी मूलशेषे चिन्त्यादनादर्तव्यमिति दिक् । पादस्य पदपदेति सौत्रो
विभक्तिलुक् । अचः शोद्भ इति शास्तस्य पत्स्यैदमेकदेशानुकरणं । उदमेघ इति । साहचर्या
त्पुरुषस्यैव संज्ञा । उदपेषमिति । स्नेहने पिषः इति णमुल् । उदधिर्घट इति । उदकं धीयतेऽस्मि
न्निति विग्रहः कर्मण्यधिकरणे चेति कि प्रत्ययः । उदमंथ इति । द्रववद्द्रव्यसंसर्जनाः सक्तवो मं
थः । तृतीयेति योगविभागात्समासः । व्यरुः संप्रसारणं । इत्यनुवृत्तस्थने नर्स्वपदमुत्तर
पदं च व्याक्षिप्यते इत्याशयेनाह । पूर्वपदस्येति उत्तरपदयोरिति च । इहोत्तरपदेन पूर्वपदमनी
विशेष्यते न तु विपरीतं । तेन करीषगंधापरमपुत्र इत्यत्र नातिप्रसंगः मालभारीति मालां
बिभर्त्तीति ताच्छील्ये णिनिः केचित्तु हारिणीति पठन्ति । कारेसत्यागदस्य । सत्यकारः सम्य
करणं । अशपथे इति परत्वाड्डाचं बाधित्वा मुम् । अगदंकारो वैद्यः अस्तुकारोऽभ्युपगमः । अस्त्वि
ति तिङन्तप्रतिरूपकमव्ययं धेनुंभव्य इति । भक्षणं योग्येति कर्त्तरि यत् । धेनुश्चासौ भव्या चेति वि
ग्रहः । अभिविष्यंती धेनुरित्यर्थः गोतमस्यतौ नु स्नातकधर्मेषु अधेनुं धेनुभव्येति ब्रूयादि

श्री.म.र.

१५३

निषयुक्तं न त्वार्षत्वान्नुमागमो नेति तच्चारम्यायां मितेश्च राम्यायां इत्यादत्तः ।। लोकं इत्यादि
इत्यानि: इत्या कर्मणिनिरूढदत्तः श्रीहेम इत्यपि पठन्त एव । अनभ्याशमित्यादि । अभ्याशस्समीपं न
विद्यते यस्मिन् अनभ्याशं दूरं एति इत्युशास्त्रिरत्यादिना इणः क्यप् भ्राष्ट्रमिंधं कर्मण्यपि एवं तेन वाष
ष्ठीसमासः । तिमिंगिल इति तिमत्स्यविशेषः गिरतेर्मूलविभुजादित्वात्कः । गिलगिल चेति गि
लगिलती निगिल गिलः । तिमीनां गिल इति नियमाद्दीर्घः नियमेवेति पूर्वविप्रतिषेध
नेति भावः । सज्योतिरिति समानं ज्योतिरस्येति बहुव्रीहिः यस्मिन् ज्योतिष्यादित्येन दत्ते
ऽउपनिपतितं तदस्तपर्यन्तं मनुजत्वमानमाशौचं सज्योतिरित्युच्यते । एवोदरादीनियं
यावद्दिष्ट । निरुक्तादिशास्त्रसिद्धानां समासपदानामुणादयो बहुलमिति सिद्धिः अनेन
नु समासपदानामिति विवेक इति हरदत्तः । वस्तुतस्तु समासविषयकमेवेदमिति नानि
यमः हस्तिसिंहशब्दयोः प्रयोगायां कारिकायामुदाहृतत्वात् ।। हतेः पचाद्यच् विसगागमः । हि
सेस्तु पचाद्यचि हकारसकारयोः स्थानव्यत्ययः यद्विनुमेवदित्यादि सङ्कोकस्यापि [illegible] नस
रोदाहरणतायां नाग्रहः । किंतु नैरुक्तानुसन्धिरने कथन्त्यनावन्मात्रेदाहृदत्तो काविवेको
पिनिर्बाधएवेति दिक् । आहृति गणोयमिति । तेनात्मदपि सिध्यतीयथालुम्पेदवश्यमः क

५२

श्रीवः

१५३

153

सेनुकाममनःसौ ग्राहितनतयोर्मासस्य पचिपुहंजोः॥ अं तामितिशेषः इत्यत्र त्वयामेतुत्तरपदे ऽवस्य
मशब्दस्यात्तमकारस्य लुपेत्॥ तथाकामशब्दे मनःशब्दे च परे तुमशब्दस्यांतस्येति॥ षष्ठ्यर्थे
प्रथमायुद्दृयन्तूत्रन्यथ परे प्र पचधातुः तस्मिन्परे मासस्यांतमकारं लुपेदित्यर्थः॥ अवस्यसे
त्यः॥ गंतुकामः॥ गंतुमनाः सहितः संहितः संमतनः सततः मांस्पचनी मांस्पंकः॥ हल्संयोगात्त
लोपाभावोपि निपातनाद्बाधः॥ छन्दसि तुम्र्यसमयादित्वे नापि निर्वाहउक्तः अपरस्पराः क्रि
यासातत्य इति सूत्रे सातत्य इति निर्देशेन वेकदेशानुमितिद्वारा इचौचार्थ्यपठितोयं श्लोकोस्मा
भिनरत्याद्दे नहिवृति॥ उपधायां॥ उत्तरपदेधिनिबोधप्रा उपनयतः इत्युपानत् संपदादि
त्वात्कर्मणि क्विप् निवर्त्तते इति नी॥ नाचवर्षतीति प्राद्वृ मर्मावित् नियमं माविता॥
रुचदीसोमिरोचते इति नीरुक् ऋतिसहते ऋतीषट् सहः इत नात्तस्यच त्यत्र सह इति योगवि
भागादनुक्तसमुच्चयाद्वा सस्य षत्वं इति न्यासकारः पूर्वपदादिति षत्वं इति हरदत्तः परितनोती
२४ तिपरीतत् गमः क्वाविति व्यत्ययगमादीनामिष्यत इति वचनात्त नोतेर्नलोपः॥ यत्तु वेदभाष्ये त्रीत
मित्रावरुणार्ताविति मंत्रस्य व्याख्यायामुक्तंत्रत स्य वर्द्धयितारा वित्यर्थे तभावि न्यर्थादृ
धःक्विप् नहिवृती त्यादिनापूर्वपदस्य दीर्घ इति तच्चिंसाप्रत सूत्रे वृधरनुपात्तत्वात्तस्मादन्येषामपी

म.र.० १५४

निदीर्घस्तत्त्वबोधः ॥ वनं पुरगा॰ग्म्य त्ययेन षष्ठ्याः स्थाने प्रथमेत्याह । वनशब्दस्येति विपर्ययस्ति ॥ असंज्ञात्वेन पूर्व
पदात्संज्ञायामित्यस्याप्राप्तेरिति भावः ॥ अनतारवाहः । निपातनादिति ॥ मनुष्याश्चक्षते । हलदंतादिति स
प्तम्याः अलुगिति नत्वेति भावः । प्रथमेति । सप्तम्यर्थस्य प्रातिपदिकार्थेन्तर्भावादिति भावः ॥ निषाद इति ॥ ६३
निषीदंत्यस्मिन्पापमिति निषादः ॥ पुलिंदो मनुष्यजातिः ॥ हलश्चेत्यधिकरणे घञ् कथं तर्हि प्रतीहा
रो द्वारिकः । अत्राहुः ॥ प्रतीहारो द्वारं मं तास्यास्त्याश्रयमिति णिच् कचितीकइति ग्रैष्मिकः । क । प्र । प्रसुनोद
नेत्यादि ॥ अत्र केचित् ॥ दृष्टूनीति ह्रस्वांतं पठित्वा दृष्टूरनि वक्षुड्रोहावे वायं दीर्घ इत्याहुः । अन्ये
तु दीर्घांतमेव पठंति । तन्मु रूषस्याप्युदाहरणतामाहुः ॥ इरुषादिति केचित्तु काश्यपीति तालव्यमध्यं पठ
न्ति तत्मासादिकामेति भावः । शिरीषवनमिति ननु यस्य फलमेव न पुष्पं स वनस्पतिः वनस्पतयः फ
लैः पुष्पात्ते रूपुष्पाद्वनस्पतिरित्यमकोशात् । स च उदुंबरादिः । शिरीषस्तु न तथा तस्य पुष्पफलोभय
सत्वात्तत्कथं मिह णत्वमिति चेत्सत्यं इह वनस्पतिशब्देन वृक्षमात्रमुपलक्ष्यते ॥ अत्र च लिंगंतु
पियुक्तवदिति सूत्रे व्यक्तिवचने इति किं शिरीषाणामदूरभवो ग्रामः शिरीषः तस्य वनं शिरीषवनं तं व
नस्पतित्वमतिदिश्यते ततश्च णत्वं स्यादिति भाष्यकारोक्तिः हरिकादिभ्य इति ॥ ओषधित्वान्नाप्तिः ॥
हीरपाणात् उशीनराः इति ॥ उशीनरशब्दो देशवाची न तु सिधुः अव वाहिषीकः ॥ गिरिनद्यादीनामिति व
क्तव्यमेतत् ॥ संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेयं माषवापिणावितिबहुलमाभी द्वाप

ध्यं

शिव ४ १५४ 154

इदंमल्ली०

इतिभट्टोजिदीक्षितकृतायांप्रौढमनोरमायांसमासाख्यविषयः॥

इतिप्रोगानिः ॥ श्रीरिवापारागीति ॥ कर्मराणपत्रम् ॥ उत्तरपदं यदिति ॥ अत्र च व्याख्यानमेव शरणं ग्रंथो वस्तुनुमध्य
उरामिह ज्ञापकमित्याक्रुत्स्नं दर्शयति ॥ न तु एवं ज्ञापकं शिथिलमिति ध्वनयति ॥ किं चानीति कानी
ति ॥ अत्र कुमतिश्चेति नित्यं णत्वं प्राप्तं ॥ हरिमाणीति ॥ मेनेणंप्रतात् किपुः ॥ प्राक्तु नुत्वतेः समासान्तका
रान्तमुत्तरपदं नान्तत्वात् नीपुण त्वं चतुरंगयोगे नेति वत्वाप्यंगत्वस्य तेन योगः इत्युक्तिग्रहः ॥ अनति
तरति ॥ अवधापकस्य पदस्य तद्धितस्येत्यरोनभवन्ति तदा निषेधस्त्वयर्थः ॥ अंई गोमयेति ॥
अत्र गोष्पदः पदं पारस्करइति ॥ पारं करोतीति विग्रहस्त्वो हेतु नाघील्येति टः ॥ किं किं दधाति ॥ किं किं
दधातीति विग्रहे आतोनुपसर्गे कः ॥ पूर्वस्य किमोम लोपः सुट् षत्वं च निपात्यते ॥ रूढिशब्दश्चे
तेक थं चिह्युत्पाद्याः ॥ तद्बृहतोरिति ॥ रास्त्रं वंतादिति ॥ तलोपस्येत्यपत्रेति भावः चत्वेनैतु उपलक्ष
णं झरो झरीति लोपस्यापि सुवचत्वात् ॥ दकारतकारावितितद्धृहतोर्यथासंख्यं बोध्यं ॥ प्रायस्य
ति प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनमिति स्मरंति ॥ आस्पदं प्रतिष्ठायामिति ॥ तेन परश्श
ता इति सिद्धं ॥ अधि अपतीर्णन तताः परश्शताः इति भाष्यः शतात्पराः इति विग्रहे पंचमीति यो
गविभागात् समासः राजदंतादित्वात् परनिपातः सर्वनाम्नो रत्नमात्रे इति पुंवद्भावः लोकाश्रय
त्वालिंगस्य विशेष्य निघ्नता पारस्करादित्वात्सुडिति दिक् ॥ ॥ इति समासाश्रयाः विधयः ॥ ॥

ओं श्रीगणेशाय नमः ॥ ३ ॥ समर्थानां ॥ ननु च इह न सूत्रेण कार्यो भावरूपं सामर्थ्यं गृहीतुं नोचितं समर्थः
पदविधिरिति परिभाषया गतार्थत्वात् ॥ स्वकाले तेन नेष्टि तु लुग्विधानाच्चिसुवं तात्तद्धितोत्पत्तिः । तथा च ।
पदविधित्वस्य इष्टत्वमेव भ्रमत आह । सामर्थ्यमिति निरेते त्यादि ॥ अस्य फलं तु नस्याप्रत्ययमिति सूत्रे मूले
एव स्फुटीभविष्यतीत्यस्य समर्थानां प्रथमादिति युक्तं वक्तुं समहीनासंगीनाह । प्राग्दीतो [illegible] ॥ अश्वप
त्यादिभ्यश्च प्राग्दीव्यतीयेष्विति । दीव्यतः [illegible] प्राक् प्राग्दीव्यत । अपपरिबहिरञ्चवः पञ्चम्या इत्यव्ययीभा
वः इत्याहुः प्राग्दीव्यतमिति तु उचितं [illegible] इति चपवृत्तेः ॥ तन्नो भवार्थे [illegible] ॥ अ
मे इत्यादिगणनात् । अव्ययीभावस्याव्ययत्वप्रयोजनं लुङ्मुखस्वरोपचाराः इति परिगणनीयं ॥ अ
चामादीति । निर्धारणे षष्ठी ॥ तेनार्थसिद्धमाह । अचरांते ॥ अचो ञ्णितीति सूत्रादच इत्यस्या
नुवृत्तिरपीह सुवचा । ग्रामादिकमेवेति ॥ यद्यपि चानुवर्त्त्यपादे राऽऽनिगणत्वात् [illegible] तन्मा
पपादीन तथापि [illegible] यानुरोधादेवमुक्तं दित्यादितां पूर्वं पतिग्रहस्य [illegible] पदशब्दे न बहुव्री
हि कृत्वादित्यादिभिर्द्वन्द्वः कार्य इति व्याचष्टे ॥ दित्यादिभ्यः पत्युत्तरपदाच्चेति ॥ पत्यन्तादिति तु
नोक्तं बहुव्रीहावपि प्रसंगात् [illegible] इति ॥ ननु दितेरपि प्रत्ययोर्देवतार्थे [illegible] वकाशाः अपत्ये तु
रत्वादितः [illegible] कस्यानवता । पठन्ते अत्र पूर्वविप्रतिषेधः [illegible] विशेषलक्षणात्

म०२०
१५६
156 य४

ऽपवादात्सर्वविभक्तिषु प्राप्तमिति॥ अर्थविशेषे किं॥ औष्ट्रपदं॥ उष्ट्रपादिनैगम पुत्रंतस्येदं पत्राध्वर्युपरि
षद्भ्योऽन्यत्र॥ अयथकथं दैतेय इति॥ अत्राहुः दितिशब्दात्कृदिकारादक्तिन इति ङीषि कृते स्त्रीभ्यो ढक्
ऽपत्स्यतु ना॥ लिंगविशिष्टपरिभाषया अनित्यत्वादिति॥ आदित्य इति॥ आदित्यपत्याश्च एप्रत्यये
तिलोपे लोपमातिलोपः॥ नचाद्द्योपरस्यस्थानिवद्भावः॥ नपदान्तेति यलोपे तन्निषेधात्॥ का
शिकायामिति॥ हरदत्तमाधवादिग्रंथेष्वेवं॥ तथा चव्यवृत्योनः नामुपामस्मात्स्तोपाभ्यां भुतेर्यो
त्ननाः इति॥ भाष्ये तु नैतद्दृष्टं॥ नत्रषष्ठाप्रयोगो निवार्य्यः॥ बाहिकप्रशस्ति॥ टिलोपवचनमव्यय
नाभमात्रस्यपस्यानित्यत्वज्ञापनार्थं तिमासातीपरत्वादिसिद्धं॥ लोपप्रवृत्ते पञ्चवचनं आद्युदात्तार्थं
प्राचांमध्ये तु एपचेतिपदान्तेन तदन्तारकरं॥ अन्यथामइति॥ भाष्योदाहरणादेवेह तदंतविधिः॥ अ
न्यथा वलवाचिनः स्यामन्तशब्दस्य केवलस्यापत्यो न्तयोगाभावेपि ज्ञातादि ह्येवविधिस्यात्॥ अ
न्यस्यस्वस्थामयस्येति बहुब्रीहौ पृषोदरादित्वात्सस्यतः॥ गोरिति। न केवलमपत्यएवकिंतु सर्वेषु
प्राग्दीव्यतीयेषु॥ गव्यमिति॥ गव्येभवं गोरिदं गोर्दवनास्येत्यादिरर्थः॥ अनेन हि गव्यमिति ज्ञेमि
निसर्गे विध्यमानं दूषयन्तो वार्त्तिककाराः समाहिताः॥ कोलितु प्राग्दीव्यतीये भ्योऽन्यत्रापध्य
ऽयंपदितिव्याचक्षाणो गवाचरतीति गव्यस्तावद्यथाहुः॥ गोरुपत्यमित्यादि॥ हेतुमनुष्येभ्योऽन्यतर

शिवः
१

स्यात् ॥ यं मयप्रकृतिरूपमयदो ॥ उत्सादिभ्योऽञ् ॥ अणोऽपवादः नामितेत्यादीनां आपवादोऽयं ॥ रूपव्याते
वष्कयासे ॥ असेः समासे श्वीवार्यसङ्ग्रहेयं ॥ वष्कयस्यापत्यं वाष्कयः ॥ असे किं ॥ गोवष्कयिं ॥ असमस्तेन
देवदत्तेन विधिं ज्ञापयति ॥ तेनाग्रधेनूनां समूहः आधेनवमिति सिध्यति ॥ धेनुशब्दस्य रूपोत्सादौ ।
न वैवं धेनुकं गोधेनुकं च न सिध्येदिति वाच्यं ॥ धेनुरनञ्रिकमुत्पादयतीति विशेषवचनस्य
भाष्ये आपि शालिमतत्वेनउदाहृतत्वात् ॥ रूढमिति ठकमिति स्वार्थ इति कैयटः ॥ अग्निकलिभ्या
मिति ॥ अपमर्थः ॥ सत्र वरतासा स्यादेव तेनाधिकारेऽग्नेर्ढगिति सूत्रितं ॥ दृष्टं सामेत्यधिका
रकलेर्ढगिति वार्त्तिकवरतापूरितं ॥ तदिदं सूत्र अध्ययमनीयप्राग्दीव्यत इति प्रकरणे अग्निक
लिभ्यां ढगिति पाठे तेनाऽग्नेरपत्यं अग्निना दृष्टं साम अग्नो भवं अग्नेरागतं अग्नेः स्वं वाग्ना
ग्नेयं कालेयमिति सिद्धं एतेन मीमांसकैर्यदुक्तं कलेर्ढगिति पाणिनिसूत्रमपार्थकमित्यादि
तत्सर्वमवैयाकरणमीमांसकस्तोपार्थमिति प्रपंचितं शब्दकौस्तुभे ॥ ॥ स्त्रपत्यादिविक
रार्थसाधारणः प्रत्ययः ॥ स्त्रीपुंसाभ्यां ॥ प्राग्दीव्यतेत्यनुवर्तते ॥ स्त्रैणः इति ॥ स्त्रीषु भवः स्त्रीभिश्चर
तिस्त्रीभ्यो हितं इत्यादि ॥ वतार्थ इति ॥ सामामाप्रेक्षितं ज्ञापकमिति भावः ॥ अनणोदर इति ॥
स्त्रीवदिति कथं न इति चेत् नलोपः स्त्रीत्वं ॥ स्त्रीनापुंसत्वं ॥ पुंस्त्वेति ॥ आच त्वादिति कारादिति वचनात् ॥

द्विगोर्लुगनपत्या द्विगोरिति षष्ठी ॥ तदर्थस्वेत्तुलं । तत्रार्थान्तरस्यामत्वादेरिव भाविनोपि लुग्घ्याघ्यवसायात् । तदेन
दाह ॥ द्विगोर्निमित्तमिति ॥ अजादिरिति ॥ एतच्चोत्तरसूत्रादचीत्यस्यापकर्षणाल्लभ्यते । वाग्रहणमनुवर्त्त्य
व्यवस्थितविभाषाश्रयणेन भवति ॥ गोत्रे लुगचि ॥ गोत्रे किं । वत्साद्भ्यो गोत्रे इति प्रकरणे तयस्य लुक्प्राप्तः ।
तस्यैवालुग्यथा स्यात् । नेह । कुवलस्येदं कौवलं । बादरं ॥ यूनि लुक् ॥ २८ ॥ द्विगोर्लुगनपत्ये चि ॥ यूनि गोत्र
नेत्यवस्थ्यते । तथा च लुग्लुग्ग्रहणं शक्यमवक्तुं ॥ अजादाविति किं । ग्लौचुकायनरूप्यं । प्राग्दीव्य
तीये किं । तस्मै हितं ॥ ग्लौचुकायनीयं । ननु उपगु अ इति स्थिते ओर्गुणं बाधित्वा परत्वादचो ञ्णितीति
वृद्ध्या भाव्यं । गुणस्य तु पिचव्यस्त्वादिरवकाशः । किं च ऋतेरुणाऽवादेशाच्चात उपधाया इति वृद्ध्या
भाव्यमत आह ॥ आदिरादिवृद्धिरिति ॥ परत्वादिति भावः । अत्र त्वोपधावृद्ध्या अवकाशः । गोः । पाचकः । आदि
वृद्धेरवकाशः । सुश्रुतः । सौश्रुतः । औपगवः । त्वाष्ट्रः जागतः इत्यादौ उभयप्रसंगे परत्वादादिवृद्धिरेव भ
वति । न च पुनः प्रसंगविज्ञानं सकृज्जताविति न्यायाश्रयणात् ॥ अत्र च ज्ञापकं अनुशतिकादिषु पुष्क
रसदृश पाठः ॥ अन्यथा उपधावृद्ध्या पौष्करसादः सिद्धत्वादुत्तरपदवृद्ध्यर्थस्तत्र पाठोऽनर्थकं स्यात् ॥
प्रकृतेति । परिभाषायाश्च समर्थग्रहणमेव ज्ञापकं । तद्धि परिनिष्ठितपरमिति उक्तं । परिनिष्ठितत्वं च
स्याप्प्रातिपदिकांशे एव । न तु सुप्विशिष्टे इत्यवधेयं ॥ तेनौपगवः दंडिमानित्यादि सिद्धं । अश्विमान
णि इति सोत्रप्रयोगश्चात्र लिंगं । यदि तु नलोपे कृते नारंभः परिभाषा ज्ञाप्यते ॥ पामादिगणे वि

शिवः
२

ष्ठगिति तुल्लोपदलोपश्चार्थे नसंधौरित्यत्रागदृन्नसंधिग्रहणेन पारे नाष्टि तान्त्राद्धि नोत्पत्तिः॥ न हि समर्थ
ग्रहणाच्च मकर्तुर्नेन तु समासस्याद्धि तेनानित्यं वाधेत॥ न च तद्धितस्य वैकल्पिकत्वात्पक्षे सापीति
वाच्यं। पत्रोत्सर्गापवादो महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्तत इति प
रमध्येणस्यावेति वाग्रहणेन ज्ञापितत्वादित्याशंक्याह। देवपत्नीत्यादौ जानित्वादिति। यु
तु माचार्क। अरण्यानत्वा ज्ञीविः। पत्र व्याचख्युः। टि ह्वाणनित्यनेनेति। तदुभयं प्रामादिकमि
तिभावः॥ औत्सस्येति॥ उत्सः प्रस्रवणं वारिप्रवाहो निर्झरोऽस्य मरः। तस्यापत्यं योगस्तु गांगेयो भी
ष्म इतिवत्॥ जीवति तु वंश्ये युवा [illegible] पितृपितामहादिरुत्पादकश्च वंश्यो वंशः तत्र भवो वंश्यः।
दिग्मादित्वाद्यत्। पौत्रप्रभृतीत्यनुवर्त्तते षष्ठ्या विपरिणम्यते। आख्यानादित्याह। पौत्रादे
रिति। तुशब्दो भिन्नक्रमः। युवेत्यस्मात्परो बोध्यः। स च एवकारार्थ इति व्याचष्टे॥ युवसं
ज्ञमेवेति। एको गोत्रे अपत्यप्रत्यय इति॥ एतच्चाधिकारबलाल्लभ्यते॥ औपगव इत्यादि॥ उ
पगोरण्। गर्गादिभ्यो यञ्॥ नडादिभ्यः फक्। आसत्त्यारंभफलमत एवं व्याख्यापयति। गो
त्र इति। स्वगोत्रे तदपत्यस्य एको न संख्यानेति तीये द्वयोः चतुर्थे अपाणामित्यादौ त्वर्थः। प्रथ
मे। तृतीये एकस्मादनित्येत्यापत्तिः। चतुर्थे बहूनामित्यादौ त्वर्थः। पितुरेवेति। तथा चामरः॥

आत्मजस्तनयः सूनुः सुतः पुत्रः॥ स्त्रियां त्वमी॥ आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे इति॥ ततः प्रा
ग्यामिति॥ तस्यादि॥ न पतन्त्यनेनेत्यपत्यमिति व्युत्पत्तिः पृक्ति विंशतीति सूत्रे भाष्ये स्ताददर्शि
ता॥ अवरे हि नोपिपितामहादीनामुद्देशेनेति प्रसिद्धं नरकात्त्रायमाणाः पुत्राख्या नेषु॥ सूत्रकारोऽप्याह॥ अ
पत्यं पौत्रप्रभृतीति॥ ऋष्यपक्षे हि अपत्यमिति प्राप्त्यमिति गौणी वृत्तिरास्थेयाणीयास्यात्॥ गोत्राद्यू
नि॥ गोत्रप्रत्ययान्तादेवेति॥ ननु युववत्वं तत्सामर्थ्यादिति प्रथमपक्षेऽर्थः॥ द्वितीयपक्षे तु मूलप्रकृतेरपत्यं त
रयुवप्रत्ययान्तेत्यर्थः॥ स्त्रियां त्विति॥ अयं भावः॥ अस्त्रियामिति योगो विभज्यते॥ पूर्वाणि शास्त्रस्व
रूपपरं॥ परिभाषा चेयं॥ पत्रयुवसंज्ञा विधीयते तत्र॥ स्त्रियामिति तु पातितं तत इत्यर्थः॥ सिद्धस्य
गतिरिति॥ जीवति तु वंश्ये युवा॥ अस्त्रियामिति तु सर्वत्रापि तु सूचितं॥ अत इञ्॥ तपरः किं॥ शुभंया
इत्यशोभंयः॥ कथं तर्हि द्रौपदी तादाशरथ्यादयस्त इति॥ अपत्यत्वरूपविशेषस्याविवक्षा
यां शैषिकोऽण्॥ बाह्वादिभ्यश्चेति॥ यत्तु बाध लोडने इति धातोर्माधवेनोक्तं केवलस्य बाहरपत्ये
नायोगात्सामर्थ्याल्लब्धं न विधिः सो बाहविरिति॥ न चिन्त्यं॥ आनन्तीति बाह्वीत्याश्वलायनसूत्रादौ
द्वादिभ्यश्चेति सूत्रे बाहविरिति भाष्यप्रयोगात् तदुदाहरणाच्च बाहुः संज्ञाशब्दत्वात्॥ औडुलोमिरिति॥
यद्यपि लोमशब्दान्तोऽयं तथापि सामर्थ्यादिह ग्रहणं॥ उडुनीव शरीरे यस्य लोमानि यस्य तस्या
पत्यमौडुलोमिः॥ शारलोमिः॥ बहुत्वे तु इञोऽपवादोऽकारः॥ प्रागेवोक्तः॥ उडुलोमाः॥ शारलोमाः॥ इह

याः पुराणादिप्रसिद्धाः संज्ञास्ताभ्यो ऽन्यत्र न्यायो बोध्यः ॥ निरूढत्वेन प्रथमोपस्थितत्वात्ताभिस्ताभिरेव विधिर्निरा
कांक्षत्वात् ॥ यत्तु इदानींतनो वा कुत्सस्यापत्यं वा स्वरूपस्त्येव ॥ उक्तं च ऋषिणामभिव्यक्तपदार्था ये स्वतन्त्राः
लोके विश्रुताः ॥ शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु इति ॥ अनर्थकं संदिग्धार्थकमप्रयुक्तं च
क्रमेण विशेषणव्यावर्त्यं ॥ तदुक्तिषु तत्सदृशेष्वित्यर्थः ॥ अनन्तरापत्यमात्रस्यापत्यस्याग्रहणे इत्यत्र
राजन्यश्वशुरादिति पत्नी । मिमीते माता तानस्य स्वसा मातृष्वसा ॥ मातृपितृभ्यां स्वसेति षत्वं न । वारुणकि
रिति । वरुडादयो जातिविशेषाः । इत्यादीति । आदिशब्दान्निषादकिः चाण्डालकिः बैम्बकिः । वक्ष्यतऽ
ति । ब्राह्मणो जो इति विहितस्यापत्यस्येति शेषः । यञिञोश्च । गोत्रे यावित्ति । गार्ग्यः । द्वीपादनुसमुद्रं
यञ् । द्वैप्यः । सुतंगमादिभ्य इञ् । सौतंगमिः । तदपत्यमेभ्यः भूत । अनृष्यानन्तर्ये । अनृषीति पंचम्याः सौत्रो
लुक् । अस्त्वस्तीति । आनन्तर्ये इत्यत्रेत्यर्थः । वैदेहीत्यत्र ऋष्यणमाशंक्य इञ् बाह्वादेरिति । प्रवराध्यायेति ॥ ए
तत्र स्त्रीपुंसाभ्यां नञ्स्नञौ वृत्तिसूत्रे केचन पठन्ति ये स्पष्टं कापेयस्त्रि ॥ इतश्चानिञ इति ठक् । कापेयः गार्ग्यादित्वात्
यञ् । आंगिरसाः इति नियमार्थसूत्रे गणे वा ठञ् लोहितादिकार्यार्थं । काप्यायनी । वोधिः इति । अनृषि
त्वादिञ् । बाह्वादित्वाद् वा तद्राजः । यञञोः । यञञोः आंगिरसे यञ् इति नियमार्थसूत्रे लुक् स्त्रियां ॥ विहितस्ये
ति । परिशेषितस्य एव इति बोध्यं । एतदांगिरसस्य नुरत्यालभ्यते । अत एवाह । अनांगिरसे इति । वक्ष्यमाण
इति प्राग्दीव्यतोऽणिति ऋषिभ्योऽणि इति सूत्रे रोति भावः ॥ अश्वादिभ्यः फञ् । गोत्रे इति । कश्चिदृष्यपि । तथा हि । अश्वादि

अयं भावः । नियमविधिमुखेन प्रवृत्तो यञञोः आंगिरसयोः यत्र विधीयते तत्र लुक् आंगिरसे विहितस्येत्यर्थः । यदा तु निषेधमुखेन प्रवृत्तिः यञञोः आ
गिरसयोः लुग्न भवतीत्यर्थः तदा यञः परिशेषितस्य ... इति परिशेषितस्येत्यर्थः ॥ नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरिति

म०२०
१५९
159

ऽगो गोत्रत्वनपि सा नाग्न्यः पठ्यते । वैल्यः । आनडुह्यः । आत्रेय इति । बिलिर्नाम राजर्षिः । ततो वृद्धेत्कोसलेति ञ्यङ् ।
खमिति। अपपरीवर्ज्जने इति परेः कर्म्मप्रवचनीयता। पंचम्यपाङ्परिभिरिति पंचमी। अपपरिबहि
रंचवः पंचम्येत्यव्ययीभावः। लतष्टक्। स्वामिनो मुखं वर्ज्जयित्वा यः सेवकोवसपारिमुखिकः। यस्
तु सर्वतो भावेपरिशब्दः आदिसमासश्च। ततः यतोयतः स्वामिनो मुखं ततो यो वर्त्तते सः सोर्थः। एवं पारि
पार्श्विकोपि। द्विगुणार्थमिति। बहुस्वच्छुदेयकेदानकर्म्मतयातस्यगर्हितत्वं। वार्द्धुषिकइति। वृध्यर्थं द्विगुणं

तत्तेर

शिव४

ग्रयन्तीति विग्रहः॥ अथ कथं वृद्ध्याजीवश्च वार्द्धुषिरि ...त्यमरः। नस्तेनः स्यान्न वार्द्धुषी। वार्द्धुष्यं तु वणिक्रियावा
र्द्धुषिः समकं पतेत्यादिवास्वच्छंदवाचः कवय इति हरदत्तः। गर्ह्यं किं। द्विगुणार्थं वृद्धिं च प्रयच्छत्यधमर्णः। कु
सीद दशैकादशात्ष्ठन्ष्ठचौ। निपात्यत इति। अत एव वाँ भप्यकारांतो भवतीति भावः। तदेव दर्शय त२
ति। दशैकादशान् इति। संख्याया अल्पीयस्या इति पूर्वनिपातः। उंछतीति। भूमौ पतितस्य एकैकस्या
पादानमुंछः। शाब्दं करोतीति। प्रकृतिप्रत्ययादि विभागेन व्युत्पादयतीत्यर्थः। अत्रैवार्थे यं प्रत्ययः
अभिधानस्वाभाव्यात्। तेनेह न। शाब्दं करोति वर्वरः। दार्दुरिक इति। कुलालः। दर्दुरो मत्स्याच्च विशेषः
दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः। दर्दुरा चण्डिकायां च ग्रामजाले तु दर्दुरमिति विश्वः। मात्स्यि
क इति। मत्स्यस्य ङ्यामिति परिगणितत्वात्सूर्यतिष्येति यलोपो न। मार्गिक इति। आरण्यक चतुष्पा
त्सु हरिणे च वर्त्ते मृगशब्दः। तत्राद्यस्य विशेषो द्वितीयस्य तु पर्यायो हरिणशब्दः। पदोत्तरप
पदं गृह्णातीति। पदांतमिति तु नोक्तं। बहुत्सर्वन्नामत्वं। धर्मं चरतीति। चरतिरिहासेवायां। नत्व
नुष्ठानमात्रे। तेन दैववशाद्धर्मप्रवृत्तोऽपि दुर्वृत्तो धार्मिक इति नोच्यते। आसेवा हि स्वारसिकी प्रवृत्तिः

ना४

म.र.त द्वि.

१२९

179

एवमग्रेऽपि। समवायान् समवैति। समूहवाचिभ्यो द्वितीयान्तेभ्यष्ठक् स्यात् समवैतीत्यर्थे। इह सम
य पूर्वस्य ग्रहणार्थः। प्रविश्यैकदेशीभवनं। तत्र गुणभूतं प्रवेशं प्रति प्रकृत्यर्थस्य कर्मता बोध्या।
विशेष्यानुरोधेन तु लोके सप्तमीप्रायेण प्रयुज्यते। कुरुक्षेत्रे समवेता इति यथा। सैन्याः सैनि
का इ[illegible]ति। द्वितीयान्तात् पठको। यत्तु सत्तायां समवेता ये सैन्यास्ते सैनिकाश्चेत इति तत्फलितार्थकथनप
रं। संज्ञायामिति। ललाटकुक्कुटीशब्दाभ्यां द्वितीयान्ताभ्यां पश्यतीत्यर्थे ठक् स्यात्। सम्यक् ज्ञानं संज्ञा तस्यां प्रसिद्धिवि
षयीभूतेऽर्थे विशेषः इति यावत्। लालाटिक इति। दूरे स्थित्वा प्रभोर्ललाटं पश्यति न तु कार्येषु पतिष्ठते इत्य

२६५

र्थः। लालाटिकः प्रभोर्भाव[illegible] दर्शी कार्याक्षमश्च यः इत्यमरः। कौक्कुटिको भिक्षुरिति। सन्न्यासी पादविक्षेपप
र्यन्तदेशपर्यन्तमेव चक्षुः संयम्य गच्छति [illegible] भावः। मार्दङ्गिक इति। मृदङ्गवादने प्रकृते लक्षणा।
मुख्यार्थे त्वनभिधानात्। धानुष्क इत्यः ष इति षः। परश्वधाट्ठञ् च। चाट्ठक्। द्वयोः कुठारः स्वधि
तिः परशुश्च परश्वधः। आस्तिक इति। अस्तिनास्तिशब्दौ निपातौ। यद्वा वचनसामर्थ्यादस्तीत्यास्या
तात् नास्तीति निपाताख्यात समनुदायाच्च प्रत्ययः। दिष्टमित्यादि। दैवं दिष्टं भागधेयं भाग्यं स्त्री नियम

शिवः

२५

इति।३

शः। नालंबते दैष्टिकतान्नानिषीदति पौरुषइति माघः। यत्तु भ्राचोक्तं प्रमाणानुगामतिर्दिष्टा सास्या

स्तीति दैष्टिक इति। तन्न। आकरविरोधात्। दिष्टस्य स्त्रीत्वस्यापेक्षितार्थपरत्वेमानाभावात्। किंच।

सास्यास्यास्तीति विग्रहो प्रयुक्तः। न ह्यस्यर्थेयं प्रत्ययः स्मर्यते। न चा आस्तिक इत्यत्रेवास्यर्थ

स्य प्रकृत्यर्थतया पीह प्रवेशः। इत्यास्तां तावत्। हितं भक्ष्याः। अस्येति प्रकृतमपि चतुर्थ्या विपरि

णम्यते [illegible] हितनयोगात्। यद्वात इहापकृष्ट[illegible]व्यं। प्रकृतिश्चत दीयभक्षणे लाक्षणिकी त्याशयेना

ह। अपूपभक्षणं हितमस्मै इति। आणा। इकार उच्चारणार्थः। टोडीबर्थः। यवागूरुत्तिकाश्र

णा विलेपीतरला च साइत्यमरः। आवसथात्ष्ठञ्। वसतीत्यर्थे। आवसंत्यस्मिन्नित्यावसथ।

उपसर्गेवसे[illegible]रित्यं प्रत्ययः। कुसीदस्त्रा दिति। कुसीदस्त्रोपात्ताभ्यां प्रकृतिभ्यामित्यर्थः।

इहयथां थकारः सांहितिक इति संभाव्यते तेषामेव गणेन क्रियमाणे ष्टलादेः षित्त्वमना

र्थमिति भ्रमः स्यात्। अतो वार्त्तिकवारः सर्वानेव पर्यजीगणत्। ठकावधिः समाप्तः॥ ॥यु

ग्यइति। युगं रथांगं तद्वहतिइत्यर्थः। प्रासंग इति। प्रासज्यते सा वितिकर्म्मणि घञ्। धुरो यड्ढकौ

इहधुरोऽहकुचेत्येवोचितं। स्वः सर्वधुरात्। शाहस्वरूपापेक्षयानपुंसकनिर्देशः॥ वंधुनिवृत्र्अीशाविति व
त्। सर्वधुरामिति। सर्वधूः सर्वधुरा। पूर्वकालैकेतिसमासः॥ ऋक्पूरिति समासांतः॥ परवल्लिङ्ग
मिति स्त्रीत्वं। टाप्। एकधुरीणाइति। चकारेणाखस्यानुकर्षणासामर्थ्यासंश्लेषश्रवणं। अन्यथाहि चका
रं विनैवप्राकरणिकस्यपतोलुग्विधीयते। जनीवधूरिति। जायतेस्यांगर्भइतिजनिघसिभ्यां
मिण्। जनिवध्योश्चेतिनवृद्धिः॥ कृदिकारादितिङीष्। जन्येति। जामातुर्वयस्यायाकुः सा हिवधूं
जामातुः समीपंप्रापयति। कालिदासस्तुवध्वायानयाहेपपिप्रा युं क्त। यातेतिजन्यानवह
कुमारीति। पद्याइति। पद्यस्तत्प्रदर्थेइतिपश्राव। अधनुषात्किं। चोरं विध्यति। संभाव्यतेहिचो
रव्यधनेधनुषः करणता। यदातुधनुषेतिप्रयुज्यतदासापेक्षत्वादेवनभवति। वशंगतः
। वश्यंवशः॥ इष्टा। वशिरण्योरुपसंख्यानमित्यप्। मूलमस्यावर्हि। प्रथमांतादावर्हीत्युपाधि
का[illegible] मूलशाह्यघत्स्यात्। मूल्यानुजाइति। मूल्योसादनं विनासंग्रहीतुमशक्याइत्य
र्थः। मध्यतोलवने क्रियमाणेकोशस्या अपियस्यामवस्थायांपतेयुस्तामवस्थांप्राप्ताः मु

शिवः
२५

सुकुम्भकाइतियावत्।यप्रत्ययइति।तेनधेनुष्याशब्दोन्तोदात्तः।यतितु तित्स्वरःस्यादिति भावः।।
संज्ञायामिति।ऋणप्रस यया धेनुर्दोहनार्थं उत्तमर्णाय दीयते तस्याः संज्ञेयं।नौवयोधर्म।
अष्टभ्यो यथासंख्यं।अष्टस्वर्थेषु यत्स्यात्।इह तास्यादियोगे यथासंख्यं करणे कर्त्तरि हे
तौ तुल्यार्थयोगे च तृतीया भवतीति सहैव ह समर्थविभक्तिरर्थाल्लभ्यते।मूलेनानाम्यमि
ति।मूलं नाम पटादीनामुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं द्रव्यं।तेन तस्मादतिरिक्तं लाभा
ख्यं द्रव्यं आत्मानं प्रतिशेषी क्रियते।आङ्पूर्वस्य तु नमतेरभिभवोर्थः।तस्मात्सोरद्युपधादिति
ति यति प्राप्तेऽत एव निपातनात्यत्।अनाम्यं।अभिभवनीयं।आत्मानं प्रतिशेषीकर्त्तव्यं।सच
लाभाख्यो भाग एव।लोके तु यावता द्रव्येण पटादिकं विक्रीयते तत्र समुदाये मूल्यशब्दः प्र
सिद्धः।एवं च लाभमात्रे व्युत्पादितस्य मूल्यशब्दस्य तद्घटिते संघाते निरूढलक्ष
णा बोध्या।सीतये ति।सीता हलाग्रं तेन सम्मितं संगतं निम्नोन्नतादिरहितं कृतं समीकृत

मितियावत्। तुलया संमितमिति॥ सम्मितं परिच्छिन्नं। रूढिश्चेयं संज्ञायामित्यधिकारात्। अत ए
व सदृशमात्रे प्रयुज्यते न तुलाया ग्रायहः। अत एव वयसा तुल्यः शत्रुरित्यत्र न। स्निग्धो वयस्यः स
याद् इत्यमरः॥ पथ्यमिति। शास्त्रीयात्पथो नपेतमित्यर्थः। संज्ञाधिकारान्नेह। पथो नपेत श्चौरः। मार्गाद
नपेत इत्यर्थः॥ इच्छयाकृतमिति। छदिसंवरणे चुरादिः। इच्छायामपि वर्त्तते। ततो घञि इच्छाप
र्याय श्छन्दशब्दः। स्वच्छन्दो कुलदच्छक इत्यादौ। असुनि तु सांतः सोत्र प्रकृतिः। यद्यपि वेदे त्रि
ष्टुभादिषु चायमस्ति तथापीह न गृह्यते संज्ञाधिकारात्। तत्र निर्माणे इच्छायाः करणत्वा
त्सामर्थ्यात्तृतीयान्तादिति लभ्यत इति भावः॥ हृदयस्य॥ कृद्योगात्कर्मणि षष्ठी। अतो किके
तद्धिते प्रकृतिभागे तु वचनसामर्थ्यादेव। एवमन्यत्रापि बोध्यं। जनस्य जल्प इति। जल्पश
ब्दो भावसाधनः। कर्त्तरि षष्ठी। हलस्य कर्ष इति। कर्षणं कर्षः। कर्मणि षष्ठी। करणस्य कर्त्तृत्व
विवक्षायां। कर्त्तरि वा। रथसीताहलेभ्य इति तदन्तविधिः। द्विहल्यः। त्रिहल्यः। तत्र साधुः। सा
धुरिह प्रवीणो योग्यो वा नोपकर्त्ता तत्राहितस्मे हित इत्यनेन भाव्यं। अग्र्य इति। यत्तु प्राचा अ

ग्रे भवः अग्र्यः अग्रियः अग्रीय इति रूपत्रयमिहोक्तं तत्र । अयाद्यत् यच्छौ चेति सूत्रद्वयस्य छन्दोविष
यत्वान्नहि भवे छन्दसीत्यधिकारे पठ्यते । छन्दोधिकारश्च आपादसमाप्तेरिति सिद्धान्तः । लोके तु भवार्थे
अग्रिम इत्येव भवति । प्रतिजनमिति । जनेजने इति प्रतिजनम् । तथार्थे यदव्ययमिति वीप्सायाम
व्ययीभावः । प्रतिजन ॥ इदंयुग संयुग पापकुल परस्यकुल अमुष्यकुलम् सर्वजन विश्वजन पञ्चजन पर
स्यामुष्येति षष्ठ्या निपातनादलुक् गुडादिभ्यष्ठञ् । गुड कुल्माष सक्तु अपूप मांस ओदन इक्षु वेणु सङ्घात
प्रवास निवास ह्रत् वसने वसति रिति वसेश्चेत्यतिप्रत्ययः । स्वस्य पतिः स्वपतिराढ्यस्तस्मिन्त्साधुः स्वापतेय
म् सभाया ॥ यति तु तित्स्वरः स्यात् । क्रतुर्भवत्युक्थ्य इतिवत् । यतो नाव इति तु न । यदुत्पत्ति वेलायां ह्यच्क
स्य यदन्तस्य आदिरुदात्तः स्यात् इति व्याख्यानात् । एतच्च वेदभाष्ये स्पष्टम् । यथाश्रुतव्याख्याने तु आद्युदा
त्तः स्यात् । नमः शष्प्यायच फेन्याय चेत्यादिवत् । इह पक्षद्वये शष्प्य फेन्यादीनां परस्परसंवादेऽपि छान्दसत्वे
न निर्वाहो बोध्यः । समानतीर्थे वासी ॥ निपातनात्सिद्धिः । गहादेराकृतिगणत्वाद्वा । सतीर्थ्य इति । तीर्थे य इति
समानस्य सभावः । तरन्त्यनेनेति तीर्थम् । तरतेस्थक् । तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । योनौ
जलावतारे चेति विश्वः । इह तज्ज्ञापकवाचिन एव ग्रहणम् । शायितः स्थितो दृष्टः जलाशयः कुपोशयमि
ति यथा । समानमुदरमिति । पूर्वापरेत्यादिना तत्पुरुषः ततो यतन्नित्स्वरापवाद ओकारस्योदात्तः । सोदर्यः

म॰र॰त
हित
१८२
182

ओ चोदात् इति नानुवर्तते। विभाषोदरे इति समासः। तत्र तीर्थे इत्यतो य इत्यनुवर्तते सा च विषयस
प्तमी। तेन सोदर इत्यस्माद् यः। प्रत्ययस्वरः। कथं तर्हि अपश्यामानन्तं गच्छन्तं सोदरोऽपि विमुञ्चतीति
मुरारिः। उच्यते सह समानमुदरं यस्येति सभावः। अत एव यत्र भ्राता सहोदर इत्यपि सिद्धम्। इति
प्राग्वितीयाः। समाप्ताश्च चातुरर्थिकाः। अथ पाञ्चमिकाः। प्राक् क्रीताच्छः॥ इत्यतः प्रागिति।
अर्थोऽत्रावधित्वेन गृह्यते न तु प्रत्ययः प्रकृतिर्वा। तेन प्राक्क्रीताद्ये ऽर्थास्तेष्वस्योपस्थानम्।
अवधिसजातीयो ह्यवधिमान् भवति यथा मासात्परः इति कालः प्रतीयते। ग्रामात्पूर्व इति देशः।
एवं च समासेऽर्थे प्रकृतिविशेषाद्विहितो यदादिभ्यश्छं बाधते। अन्यथा यच्छयोः सन्निधानाविशे
षात् छच्छानीयरामिव पर्यायः स्यात्। ननु यदादिविषये छो न भविष्यति। विभाषा हविरपूपा
दिभ्य इति विभाषाग्रहणाल्लिङ्गादिति चेत्। सत्यम्। एवं सति अवधिग्रहणं मास्तु। छ इत्येवा
स्तु। स्पष्टप्रतिपत्त्यर्थत्वादिति चेत्तर्हि अर्थ एवावधित्वेन निर्देष्टुमुचितः। अन्यथा भक्तिते
ऽपि लक्षणे न णान्तो व्याधिरिति न्याय आपद्येतेति दिक्। गवाद्यन्तर्गणसूत्राण्याह। नाभि
नभं चेति। नाभिशब्दो यत्प्रत्ययं लभते। नभादेशश्चेत्यर्थः। नभ्योऽक्ष इति। रथाङ्गं सच्छिद्रं ना

भिः। तदनुप्रविष्टः काष्ठविशेषोऽग्निः। स च तदङ्गत्वात्तस्मै हितः॥ अञ्जनं तैलाभ्यङ्गः। तद
पि स्नेहनत्वान्नाभये हितम्। रथ्येति। शरीरावयवे तु परेण बाधान्नेति भावः। युग्यमिति। चकार
स्यानुक्तसमुच्चयार्थत्वान्नस्तद्धित इति टिलोपो न ये चाभावकर्मणोरिति प्रकृतिभावस्तु दुर्लभः।
संप्रसारणादौ कृते अनरूपाभावात्। दीर्घपक्षे तद्धितानसामर्थ्याट्टिलोपो मा भूत्। पक्षान्तरे तू
क्तैव गतिः। नड् चेति। नस्येति स्ववचम्। ऊधन्य इति। ये चेति प्रकृतिभावः। विभाषा हविरपूपा
दिभ्यः॥ हविर्विशेषाणामिह ग्रहणम्। न तु स्वरूपस्य। तस्य गवादिषु पाठात्। ननु विपरी
तमेव किं न स्यात्। गवादिषु विशेषाणां ग्रहणम्। इह तु स्वरूपस्येति चेन्नैवम्। असंज्ञा
तविरोधित्वेन तत्रैव स्वरूपग्रहणस्य न्याय्यत्वात्। अपूप तण्डुल पृथुक मुसल सुवर्णक
टक कर्णवेष्टक इत्यादीन् प्रक्रम्य पठ्यते अन्नविकारेभ्यश्चेति। अस्यार्थः। अन्नविकारा अन्न
प्रकाराः अदनीयविशेषाः। तेभ्यो यद्वा स्यात्। ओदन्या ओदनीयाः। एवं च अपूपादीनां केषां
चित्पाठः प्रपंचार्थः। हविरपूपादिभ्यो विभाषाया उगवादिभ्यो यत्पूर्वविप्रतिषेधेन। चरवस्त
ण्डुलाः। सक्तुधानाः। चरुर्नाम हविरिति काशिका। स्थालीवचनस्य चरुशब्दस्य तत्र

म॰ए॰त
हित
१८३
183

त्ये हविषि उपचाराद्वृत्तिरिति कैयटहरदत्तादयः। यद्यपीदं त्रिसूत्रीवैयधिकरण्यविरुद्धम्। तत्रादित्यस्थ
रुरित्युपक्रम्य अदितिमोदनेनेति वाक्यशेषश्रवणात् चरुशब्द ओदने शक्तः। लोके स्थाल्यामौपचारि
क इति सिद्धान्तितत्वात्। तथाऽपि कैयटादीनामयमाशयः। लोके स्थालीप्रयोगस्तावत्सर्वसंमतः।
तथा च स्थाल्यामेव शक्तिरस्तु। तदनुरोधेन वेदे लक्षणा चिन्त्या लोके गृहीतशक्तिकः शब्दो वेदेऽपि बो
धक इति स्वीकारात्। उक्तं च लोकप्रसिद्धार्थसमन्वयेन सूत्रान्तरेण प्रतिपादिते सति शक्त्यन्तरं तत्र न
कल्पनीयम्। तथा सतीह क्लृप्तलक्षणा भवेदिति। तस्यमिति। नाभि नभं चेति नभादेशस्तु न भवति
तस्य गवादियता सन्नियोगशिष्टत्वेन यत्ताभावे वप्रवृत्तेः॥ खलयव॥ अत्र वृषशब्दोऽकारान्तोऽस्त्येतत्तदन्त
कारान्तः॥ अन्यथा ह्यसंदेहार्थं न लोपमकृत्वैव निर्दिशेत्। आत्मन्विश्वजनेति वत्। वृषाय हितं वृष्यम्। ब्रह्म
ण्यमिति। ब्रह्मन्नकारान्तो ब्राह्मणपर्यायः। इह वृषतशब्दाद्ब्राह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति छोऽपि अन
भिधानान्नेत्याकरः। रथ्येति। रथाय हिता। गवादिषु पाठो नाङ्गीकृतः। हितार्थ एव यथा स्यात्। अर्थान्त
रे मा भूदिति। अजाविभ्यां थ्यन्। अजशब्दः पुंलिङ्ग उपात्तः। अत एव द्वन्द्वे घीत्यविशब्दस्य पूर्वनिपातं बा
धित्वा अजाव्यदन्तमित्यजशब्दस्य पूर्वनिपातः कृतः। लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गादपि थ्यन्।
तसिलादिष्विति पुंवद्भावः तत्र थ्यनः परिगणनात्। कर्मधारयादेवेति। आख्यानमत्र धारणम्।

जननीयमिति। विश्वजनः सर्वसाधारणो वेत्यादि। विश्वोजनोस्येति विग्रहे पि स एवार्थः। तस्मै हितमित्य
र्थः। पंचजनादिति। रथकारपंचमाः चत्वारो वर्णाः पंचजनाः दिक्संख्ये संज्ञायामिति समासः। एतत्र भ
तिवार्त्तिक [illegible] त्रितयमपि कर्मधारयविषयमेव। तेन षष्ठी समासा द्बहुव्रीहेश्च छ एव। पंचज
नीयः। सर्वजनादिति। पूर्वकाले कसर्वेति [illegible] तत्पुरुषः। सर्वजनीन इति। साध्वर्थे प्रतिजनादि
भ्यः खञिति खञि तु सार्वजनीनं वैश्वजनीनो प्युक्ता हितो हितार्थे तु ख एव न तु खञ्। मातृभोगीण
इति। मातृभोगिः शरीरं तस्मै हितः। यद्यपि मातृणा भोगः सुखस्वादि न तो अश्वफलकायये
ति तु क्तं तथाप्यहेरि ति प्रयोगबाहुल्याभिप्रायं। राजेति स्तु शरीरमात्रेऽत्याकरः। मातृपितृ
भ्यां तु औत्सर्गिकश्छ एव। मात्रीयः पित्रीयः। राजाचार्याभ्यां तु नमिधानात्र छोन। किं तु राज्ञे
हितमाचार्याय हितमिति वाक्यमेवेत्याकरः। सर्वादिभि। अनुकरणत्वात्सर्वत्र न कार्या
भावः। माणवीनमिति। अपत्ये कुत्सिते मूढे मनेरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्य स्त
न सिध्यति माणवः इत्यप त्याधिकारे वार्त्तिकं। तत्रैव तत्सूत्रस्थ निर्देशासिद्धार्थकथनपरमि

न्यपदा१

म०र०तद्धित

१८४

184

निबोध्यं । चतुर्थ्यं तादि ति । एतच्च सामर्थ्याल्लभ्यते विकृत्यर्थायां प्रकृतौ प्रत्यय उच्यते । तच्च तस्मात्तादर्थ्ये चतुर्थ्य
वगम्यते । यद्वा तस्मा इत्यनुवर्त्तते । छादिषेयाणी ति । यद्यपि तु चर्म विकारश्छदिः तदा परत्वाच्चर्मणो ञिसाप्नोति
पूर्वविप्रतिषेधेन तु ढञ् एवेष्यते । छादिषेयं चर्म । आह च । यञ्ञ्यावञः पूर्वविप्रतिषिद्धं ढञ्च्येति । ए
वं च निरवकाशत्वं सत्ये वप्रतिपदविधित्वं बलीयस्त्वप्रयोजकं । न तु सावकाशाऽऽदिति मुनिसंमतं लक्ष्य
ते । तेन स्वं पितडाकानि इत्येवयुक्तं । परत्वान्नुम्प्रवृत्ते । प्रतिपदोक्तत्वाद्दीर्घमाश्रित्य स्वांपितडाका
नि इति मतं तु दुर्बलमिति दिक् । चर्मणोञ् । चर्मणाइति पंचमी । तथा हि समर्थविभक्ति चर्मवाद्वाच्चर्मार्थायां प्रकृ
तौ प्रत्ययः स्यात् चर्मणो द्वीपी यादेसदाह । चर्मणो याविकृति रिति । वार्ध्रे इति वृधिवपिभ्यां रनिति
रन् प्रत्यये वर्ध्रशब्द आद्युदात्तः चर्मवाची । तस्य विकार इत्य [illegible] णा दि वृति ङीप् [illegible] वा
ध्रीरज्जुः । वर्ध्री ति तु वधेरौणादिके ष्ट्रनि । नध्रीवध्रीवरत्रा स्या [illegible] इत्यमरः । चंचाः पत्र्यवभिकाः प
स्येति भाष्यं । प्रनुवाचं च ध्यम्बस्यनामेति वेदत्र योगः । अत्रावग्रह का लेकृत्वं स्वस्तु आपा शिति ति बोध्यः ।

षष्ठीनतु४

शिवः

२९

तदस्यास्यादिति संभावने लिङ्। इष्टकानां बहुत्वेन संभाव्यते एतत्· आकार आसां स्यादिति। देशस्य वगुणे
न संभाव्यते प्रकारो ऽस्मिन्स्यादिति। इह प्रकृतिविकारभावस्तादर्थ्यं च न विवक्षितं किं तु योग्यता
मात्रं तेन पूर्वस्यायमविषयः मतुविधाविव सकृत्तद्ग्रहणे न सिद्धे द्विस्तच्छब्दोपादानं स्पष्टार्थं च्छयतोः प्र
णविधिः। प्राग्वतेष्ठञ्। ठञित्येव वक्तव्ये प्राग्वतेरिति वचनं मध्ये योऽधिकार वान् अपवादः सर्व
भूमिपृथिवीभ्यामणञौ शार्ङ्गच्छेदादिभ्यो ञ्चेत्येवमादिः तेन विच्छेदे पि ठञेव यथा स्यादित्येवमर्थं
तेन पारायणं तुरायणेत्यादौ ठञ् लभ्यते· नन्वेवं पारायणादिसूत्र एव ठञ् निर्दिश्यतामिति
वन्न। उक्तसूत्रे येषां पर्युदासस्तेभ्यः क्रीताद्यर्थे ठञ् इष्टत्वात्· तस्य च प्रकृत सूत्रं विनाऽलाभात्।
तेन गोपुच्छिकः सामतिक इत्यादौ ठञर्थमिदं सूत्रमिति स्थितम्। यत्तु प्राचा तेन क्रीतं तृतीयान्तात्
क्रीतार्थे ठक् स्यात् सप्तत्या क्रीतः साप्ततिक इत्युक्तं तन्न· आगोपुच्छेत्यादि पर्युदासेन ठकोऽसंगतत्वात्
तेन क्रीतमिति सूत्रस्य त्रयोदशप्रत्ययानधिकृत्य कृतस्य ठञ्मात्रपरत्वेन व्याख्यायाश्च संगतत्वा

नं० ४८

म.र.तद्धित

१८५

185

च। यदपि व्याचक्षते। अतः परस्मार्हादिगोपुच्छसंख्यापरिमाणाट्ठगित्यधिकृत्यार्हीयान्दर्शयति। तेन क्रीतं।
यं तत्वात्वा यंकनादेर्विषय [illegible] इत्युदाहरति। सन्तत्ययादी [illegible] ति। अत्रेदं वक्तव्यं। तेन क्रीतमित्यस्य ठ
ञादित्रयोदशसाधारणा तथा आर्हीयान्दर्शयतीत्यवतारिकातादं वैसंगता। अनन्यार्थस्य प्रथमो
पस्थितस्य च प्राग्वतेष्ठञित्येतस्योपेक्षान [illegible] र्हतया प्राग्वतीयानित्यस्य वक्तुमनुचितत्वात्। किंच
कनादेरित्यादिशब्दोनुचितः। त्यं तस्य कन्विधावेवप्रयोजकत्वात्। आदिशब्द [illegible] ग्राह्यस्य दुर्वच
त्वा [illegible] दिति दिक्। यद्यप्यत्र प्रत्ययावधित्वेन गृहीतस्तथाप्य [illegible] पर्यंष्विवोपतिर्न प्रकृतिः। तेनाप

८४

वादविषये न भवति। अत्र च ज्ञापकं स्वर्णाञिन्यतस्यामिति सूत्रेऽन्यतरस्यांग्रहणं। आर्हादि
तदर्हतीति। अर्हतीति तिङंतस्यैकदेशः शब्दतोनुक्रियते। न तु तदर्हमिति सूत्रान्तर्गतम
ञंतमिति भावः। अत्र च व्याख्यानमेव शरणमिति हरदत्तः। अत्र श्लोकवार्तिकं। ऊर्ध्वमानं
किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः।

इतेनक्रीत

शिव ४

३०

अस्यार्थः इयत्तापरिच्छिन्नं गुरुत्वेन पलादिशब्दवाच्येन वा बालादिना तुलादावा
रोपितेन येन स्वर्णादिगुरुत्वमुन्मीयते तद्द्रव्यं द्रव्यादुन्मानमिति शब्देन विव
क्षितम् तदुन्मानं आरोहपरिणाहाभ्यां स्वगताभ्यां येन कोष्ठादिनिर्मितेन व्रीह्यादि
परिमीयते तत्परिमाणं प्रस्थादि परिः सर्वतोभावे आयामो दैर्घ्यम् सर्वेण मीय
ते तत्प्रमाणं तच्च क्वचित्तिर्यगवस्थितस्य वस्तुनः यथा वस्त्रादेर्हस्तादिः॥ क्वचिदूर्ध्व
ध्वदिगवस्थितस्य यथा हस्तिनमुदकमिति। संख्या तु उन्मानपरिमाणप्रमाणेभ्यः पलादिप्र
स्थादिहस्तादिभ्यः त्रिभ्यः त्रिभ्यो बहिर्भूता एकत्वद्वित्वादिबोध्येति। इह संख्यापरिमाण
योरेव प्रकृतत्वेपि उन्मानप्रमाणयो विवेचनं प्रसंगात्कृतमिति
बोध्यं। असमासे निष्कादिभ्यः॥ निष्क। पण। पाद। माष। वाह। द्रोण। षष्टि। इति सप्त निष्कादयः। तत्र
द्रोणशब्दः परिमाणवाची। षष्टीशब्दः संख्यावाची। तान्यां तदभिप्रायेण वचनं। इतरेषां तु उन्मान
उन्मानवचनलग्यया पूर्वसूत्रेणासिद्धेः किं समासप्रतिषेधार्थं वचनं। अन्ये त्वाहुः॥ पूर्वसूत्रे

रिश्चेदकमात्रं संख्या [illegible] मिति परिमाणशब्देन गृह्यते। तेन सर्वस्यैषा अपवादः। परिमाणं तु सर्वत इति भेदेन व्युत्पादितं तु प्रमाणपरिमा
णाभ्यां संख्यायाश्चापि सं [illegible] शये इत्यादावुपयोक्ष्यते। एतच्च पदमंजर्यां स्पष्टं। अणुगवामिति। उगवादिभ्यो यत्। यवापूपामिति। विभाषा हविरपू
पादिभ्य इति यत्। न्यासकारस्त्वाह। अत्र विकारादेव सिद्धे ऽपूपादीनां पाठसामर्थ्यान्न तदंत विधिरिति। तद्धितविरोधातु पेस्य मिति
भावः॥ इतकं ध्य मिति। संख्यापूर्वपदानामिति किं। इष्माभ्रत्र। परमपारायणं वर्त्तयति। द्विशूर्प्यमिति। द्वाभ्यां शूर्पाभ्यां क्रीत
मिति तद्धितार्थे द्विगुः। ततो वेऽप्यालुगं ता प्रकृतिरिति संख्यापूर्वपदादपि शूर्पाद ञ अन्यतरस्यामिति अञ् अप्रत्ययो वा ध्यई पू
र्वेति लुक्। द्वैशौर्पिकमिति। ठञो द्विगुंप्रति निमित्तस्याभावाल्लुगभावः। परिमाणांतस्येत्युत्तरपदवृद्धिः। शतांच्च। उत्तरसूत्रे
णाप्राप्तस्य कनोऽपवादः। शतं शतं नायाहति। शतेन सहितं शतं तेलित्युत्तरपदलोपी समासः॥ पंचक इति। लौकिक्याः संख्याया उद
हरणं। बहुक इति। पारिभाषिक्याः। चालारिंशत्क इति। इसुसुक्तांतात्कः। अर्धवतस्त्रिंशद्वत्याग हरणाद्धुत्यवयवस्य तिशदृस्य प
र्युदासो न। कतिक इति। वतोरिड्वा। वतोरिति पंचमी। सा च कनिति प्रथमायाः षष्ठीं प्रकल्पयतीत्याह। वत्वतात्कनुइति। अर्द्धिकमि
ति। अर्द्धशब्दः कार्षापणस्यार्द्धे रूढ इति भागवद् पेक्षया सामर्थ्ये नशंकनीयं। यथा प्रकरणादिवशेन भागविशेषे विज्ञाते समि
नास्त्यसामर्थ्यं। शूर्पात्। ठञोऽपवादः। शूर्पशब्दस्य परिमाणवाचकत्वात्। शतमान। [illegible] कनामिति। शतमानं परिमाणं
तत्छ्राप्त॥ विंशतित्रिंशद्भ्यां क्रीतं विंशतिकं। संज्ञायां [illegible] असंज्ञायां हि विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायामिति ड्वुन् स्यात्। संज्ञा च यद्यपि

शिवः
३१

परिमाणस्य लब्धा ठञ्प्राप्तः। अर्धान्तरस्य तद्धितकोप्राप्तः। वसनशब्दात्तु ठगेवासहस्रं संख्या। ततः संख्याया अतिशदन्ताया इति कन्प्राप्त इति विवेकः। अ
ध्यर्द्धपूर्व। अध्यारूढमर्द्धं यस्मिंस्तत् अध्यर्द्धं प्रादि धातुजस्येति साधुः। अध्यर्द्धपूर्वं च द्विगुश्चेति समाहारद्वन्द्वः। सो त्रं पुंस्त्वं। अध्यर्द्धपूर्वाद्विगोश्चे
परस्येति। अनेनसूत्रे द्विगोरिति पंचमी लुक् भवति। एतच्चवृत्तिकारशीलाव्याख्यातं। अत्र वार्त्तिकं। द्विगोर्लुक् कितन्निमित्तग्रहणं। द्विगोर्निमित्तं य
स्त द्धितस्तस्य लुगिति वक्तव्यं। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं द्विशूर्पेण क्रीतं द्विशौर्पिकं नित्यत्र पूर्वोदाहृते द्वितीयस्य मा भूत्। तथा अ
र्थविशेषासंप्रत्ययेऽतन्निमित्तादपि। यत्र तद्धितार्थं द्विगुणा सहार्थेनाभिधत्ते तत्र सतद्धितो निमित्तं यस्य न भवति तस्मादपि द्विगोः परस्य
लुगिति वक्तव्यं। द्वयोः शूर्पयोः समाहारो द्विशूर्पी तया क्रीतमिति त्यत्र त्वनभिधानात्प्रत्ययो नेति भाष्यकृतः पंथा। पांचकालापिकमि
ति। एवं पांचलोहितकमपि बोध्यं। पंचकलापाः परिमाणमस्य पंचलोहिन्यो गुञ्जाः परिमाणमस्येति विगृह्य तद्धितार्थेति समासः
तदस्य परिमाणमिति ठञ्। भस्याढे इति पुंवद्भावाल्लोहिनीशब्दस्य कारनकारयोर्निवृत्तिः। परिमाणविशेषस्य नामधेये एते। असं
ज्ञाग्रहणं प्रत्ययां [illegible] तस्यैव विशेषणं न तु द्विगोः। एतच्च वृत्तिकृता चरणे तं सूत्राशयमनुरुध्योदाहृतं। भाष्य
वार्त्तिकयोस्तु असंज्ञाग्रहणं प्रत्याख्यातं। तथाहि। द्विगुविशेषणमसंज्ञाग्रहणं। पञ्चकलापं पंचलोहितशब्दे द्विगुः। कृततद्धि
तलुकावेव संज्ञे। यस्तु नाभ्यां कुलघ तेठञ्कुसज्ञयत एवेति। स्यादेतत्। अध्यर्द्धशब्दः संख्यावाची तथा च लोके गण्यते। एकोऽध्य
र्द्धो द्वाविति। अत एवाध्यर्द्धकमिति कन्। अध्यर्द्धकंसमिति तद्धितार्थे द्विगुश्च भवति तत्किं अध्यर्द्धपूर्वग्रहणेनेति चेत्सत्यम्।
ज्ञापनार्थमिदं। संख्याकार्यं किंचिदस्य नेति। तेन कन्समासोत्तरपदवृद्धिभ्यो न्यन्न भवति। न यथा। अध्यर्द्धकरोति। [illegible]
नेदृक्तवस्तुच्च। यः सकृत्फलां तां क्रियामभिनिवर्त्य पुनस्तामेव कुर्वन्मध्ये निवर्त्तते स एवमुच्यते। विभाषा। अध्यर्द्धसहस्रमिति।
शतमानविंशतिकेति विहितस्याणो लुक्। तदभावे तु संख्यायाः संवत्सरस्येत्युत्तरपदवृद्धिः। इदानीमेव ह्युक्तं। अध्यर्द्धशब्दः सं

१९१
राम
१८७

स्या धा चीति। द्वित्रिपूर्वान्निष्कात्। अध्यर्द्धपूर्वग्रहणमुत्तरार्थमनुवृत्तमपि नेह संबध्यते। द्विगोरिति तु संबध्यत एव। षष्ठीसमास व्यावर्त्तयितुं। अत्र व्याख्यानमेव शरणं। अन्यथा ध्यर्द्धपूर्वाद्द्वित्रिपूर्वाच्च निष्कादिति समुच्चयः स्यात्। द्विनैष्किकमिति। प्राग्वतेष्ठञ्। मतान्तरे तु ठक्। परिमाणं तस्य तु उत्तरपद वृद्धिः। विंशतिकात्खः। शतमान विंशतिकेत्यणि प्राप्ते तस्य च लुकि प्राप्ते खो विधीयते। खार्याः। तदस्य परिमाणमिति ठञि प्राप्ते तस्य लुकि ईकन् विधीयते। पणपादेति। पादस्य पद्भ्यामिति गो यत्स्थितेत्यत्र तावत् पण्यंगस्येव पादस्य ग्रहणं तस्येवाक्षुदिति गतिविवचनेः संबंध संभवात् यथा पादावपि तस्येवानुवृत्तिरिति भावः। इह तु पणमाषाभ्यां साहचर्यात्प्राणावा चिनो ग्रहणं। शाणाद्वा। पञ्चेठञिति। यद्यपि शाणशब्दमानं तथापि पादिदित्यत्र परिमाणग्रहणानयेन वृत्त्या परिच्छेदकमात्रं गृह्यत इति वा दिनां मते स्यादि पर्युदासादिति भावः। मुख्यमते तु ठगेव बोध्यः। शताच्चेति ‑ सूत्रे शताच्चेति वक्तव्यं। पूर्वेण नित्ये प्राप्ते विकल्पार्थ। अध्यर्द्धशत्यं। अध्यर्द्धशतं। पंचशत्यं। पंचशतं। यद्भावे संख्यालक्षणस्य कनोलुकू शताच्चठन्यताविति लुनभवति। तत्रासमासग्रहणस्यानुवर्त्तितत्वात्। द्वित्रिपूर्वादण्च। वार्त्तिकमिदं। दशिसूत्रस्तस्त्रैधाक्षिप्तं। काणादित्येवेति। शतग्रहणं तु नेह संबध्यते व्याख्यानात्। अत्र च भाष्यं प्रमाणमिति भावः। यत्तुन्यासकृतोक्तं। शतशाणाभ्यां वेति वक्तव्ये पणपादेति पूर्वसूत्रे शतग्रहणं क्रियते तस्येदं फलं। शतशब्दः स्वरितत्वेनानुवर्त्तमानोपि शाणाद्वेत्यत्रैव संबध्यते। तदुत्तरसूत्रे तु न संबध्यते तेन नाणेनेति। तदेतत्सामर्थ्यवर्णनं आरं विधायकवार्त्तिकस्यैवेत्यभ्रमप्रयुक्तमित्यास्तां तावत्। त्रैरूप्यमिति। अणि एकं। पक्षे द्वितीयं। ठञो लुकि तृतीयं। तेन क्रीतं। तृतीयान्तात् क्रयणकर्मणि वाच्ये ठञादयस्त्रयोदशप्रत्ययाः यथायथं स्युः। ननु देवदत्तेन क्रीतं पाणिना क्रीतं संतोषेण क्रीतमित्यादावतिप्रसंग इति चेत् न। करणे तृतीयैवेह समर्थविभक्तिः सापि मूल्यद्रव्यसमर्पकाद्धतुपन्नान त्वन्यापि। अन्यत्र धनाभिधानान्न प्रत्ययः। एतच्च तद्धिताः इति महासंज्ञाकरणाल्लभ्यते। तेभ्यो प्रयोगेभ्यो हित

पद्य शतेत्यर्थे

लु॰

शिव॰
३२

शा३ पू१

इतिव्याख्या। नात्र। पुत्राच्छ च। कथं पुत्रीयति। न हि क्रतुः संयोगाना पुत्राद् इति येन्मैवं। संयुज्यंते नेनेति युपत्यादियेन यागादिकरणेन पुरुषा
फलेन संयुज्यंते स यागादिरपि संयोगः न केवलं संबंध एवेत्याग्रह इति हरदत्तः॥ तस्येश्वरः॥ तत्र विदित इति च। योगविभागो यथासं
ख्यनिरासार्थः। उत्तरार्थश्च। तस्य वापः॥ तस्येति वापापेक्षया कर्मणि षष्ठी। न कर्त्तरि। तेन देवदत्तस्य वापः क्षेत्रमित्यादौ न तद
स्मिन्नु। शुल्कमरुणं प्रपंचार्थं। तस्याध्याय विशेषत्वात्। तथा वक्ष्यो [illegible] कशालिक इत्यत्र ठगायस्थाने भ्य इति ठग्भवति। आर्हिक इति।
अर्हच्चेति वक्तव्यमिति टिठन्प्राप्तः। सति च तस्मिन् ङीस्यात्। इष्यते तु टाप्। रूपकस्येति। रूपकं कार्षापणं। रूढ इति। तथा च मागवदपृथ
तेनासामर्थ्यं नोद्भावनीयमिति भावः। रथ्यो व्योतरमिति। अत्र पक्षे भारभूतार्थादिशयि वादंशादयो भारशब्देनोच्यन्ते। प्रत्येकं संबंध
विवक्षयास्त्रेण एकवचनम्। वस्नद्रव्याभ्यां। वस्नो मूल्यं। संभवत्। आधारप्रमाणादाधेयप्रमाणस्य यदनाधिक्यं तदुपसर्जनं धारणं सं
वैभेवते रूर्थः। अतः सकर्मकत्वात्तदित्यनुवृत्तात्लभ्यमानाद्द्वितीयासमर्थविभक्तिर्न विरुध्यते। लदाह। स्वेन्निलादि। स्त्रेउवहरतीत्यत्र षष्ठ उपसर्गाः
सघाचेष्टा। उपसंहरतीति। लसचलीति। पचति संभवत्यवहरति निवृत्त्यर्थं द्रोणाप्रमिते त्रीह्यादौ द्रोणाहः। आढकाचित। पसाठ निति। म
तुरकु। आढकादीनां परिमाणत्वात्। द्विगोष्ठंश्च। द्विकमिति च्छः। लदाह। षिवादिति। अपरिमाणेति। तस्मिन्स्त्रे आचित शब्दस्य साक्षादुप
दानादिति भावः। तदस्य परि। इह परिमाणशब्देन परिच्छेदकमात्रं गृह्यते न तु सर्वतो मानमेव। उत्तरसूत्रे संख्यायाः परिमाणे
न विशेषणात्। षष्टिर्जीवितपरिमाणमस्य षाष्टिकः॥ पंचदशमंत्रा इति। साम्नास्तुवीत एकं साम तृचे क्रियत इति हि श्रुतिः॥ तच्च
तृचस्य पंचकृत्व आवृत्त्या पंचदश मंत्राः॥ सप्तदशस्तोमेऽन्यथा [illegible] एकविंशतौ तृचस्य। डित्करणेन कविंशतेर्लोपार्थं
त्रयस्त्रिंशादेति लोपार्थं च। पंक्तिविंशति। पंचन्दशहस्य टिलोपः॥ निपात्यते॥ चाकुरिति कुत्वं। रूढिशब्दा इति। तथा चात्र नावयवार्थो भि
निवेशयित्वं। पंक्तिशब्दो हि नानार्थः॥ अस्ति छन्दोविशेषे यस्य पंचाक्षराः पंचपादाः॥ अस्ति चक्रविशेषे। आम्नाणपंक्तिरिति। अस्ति दशसं
ख्यायां। कृतवान् पंक्तिरथो विलंघ्य यदिति। दशरथ इत्यर्थः॥ द्वयोर्द्दशतोर्विंशतिर्भावः॥ शतिश्च प्रत्ययः॥ अपदत्वं च। द्वौ दशतौ परिमाणमस्य विं

ति४

शतिः। त्रयाणां दशतां त्रिंशद्भावः। शच्च प्रत्ययः। चतुर्णां दशतां चत्वारिंशद्भावः। पंचानां दशतां पंचाशद्भावः। षण्णां दशतां षष्भावः। तिश्च प्रत्ययः।
अपद्वत्वं च। सप्तानां दशतां सप्तभावः। अष्टानां दशतामशी। नवानां दशतां नवभावः। दशानां दशतां शभावस्त्वश्च प्रत्ययः। इति दिक्। पंचद्श
तौ। पक्ष इति। संख्यायाः इति किं। त्रिंशच्चत्वारिंशतोरिति। पंचम्यर्थे षष्ठी द्विवचनं। चत्वारिंशत इति सूत्रपाठे लुप्समाहाराद्वंद्वात्पंचम्येक
वचनं। अत्र ब्राह्मणसंज्ञायामिति षष्ठीसमासेन [illegible] निर्देष्टुमुचितं। एवं हि ब्राह्मणस्य चेत्संज्ञेति स्फुटी भवति। अन्यथा तु यस्य क
स्य चित्संज्ञायां ब्राह्मणस्य च प्रयोगे इति संभाव्येत मंत्रभाषायां वेति स्यात्। इष्यते तु सः। तस्मादिष्टानुरोधेन व्याख्येयं। छेदादि
इह नित्यग्रहणं भाष्ये प्रत्याख्यातं। सूत्रमेव मास्तु इति तदाशयः। दंडादि। पूर्वसूत्राद्यदनुवर्त्तते तदाह। यत्स्यादिति। के चित्तु दंडा
दिभ्यो यदित्येव सूत्रं पठंति। तत्राप्यविरोधादुपेक्ष्यमिति हरदत्तमाधवादयः। तथाहि। कश्चिद्वधो हन्तो यद्वधः। तद्धिते वेत्युक्तं
यदि चेह यद्विधीयते तदेतदुपपद्यते। काणाद्युदात्तत्वं यत्यपि तद्धिते यतोनाव इत्या। द्युदात्तत्वमेवेति। यदि त्वत्र यो वि
धीयेत तदा स्वरो निघातः। यत्तु प्रमाणांतरोपन्यसनं इमथ धर्मेषु वा दंडाद्य यस्त्वच्छंदसि दृश्यते। इष्यान्तराजाविनान्य
त्ति। तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छंति। अपां मेध्यं यज्ञियमित्यादीनीति। तन्न। दंडादिभ्यो यविधानेपि तस्य भाषा
यां चरितार्थतया छंदसि चेत्युत्तरसूत्रेणाबाधस्यन्याय्यत्वात्। तेन त्रिप्रातिपदिकमात्राच्छंदस्यर्हतीत्यर्थे यद्विधीयते
। पद्यत्ययं वद्वद्रिरपि छंदसि चेति सूत्रे मंडूकप्लुत्यायत एव विधेयत्वादिति दिक्। कडंकरदक्षिणाच्छ च।। कडंगरेति पा
ठस्तु हरदत्तमाधवादिविरोधादुपेक्ष्यः। स्थालीबिलात्। छयतावनुवर्त्तेते। पाकयोग्या इति।। त्रिष्फलीकृता इतिया वल्लु।
यज्ञर्त्विजमर्हतीति। अर्थी समर्थो विद्वान्। शास्त्रेणापर्युदस्त इत्यर्थः। देशस्यानर्हं विधत्वादुपसंख्यानं। यज्ञियो देश
इति। यज्ञानुष्ठानयोग्य इत्यर्थः।। ।।आर्हीयानां ठगादीनां दशानां गतावधिः।। ।।पारायणतुरायण।। आदित आरभ्य
अंता [illegible] द विच्छेदेन वेदस्याध्ययनं पारायणं। तत्र गुरुशिष्यायानि वर्त्यंते। अन्यतरास्मिं [illegible] अध्ययन क्रियायामनुलादाव

तथापि शिष्य एव प्रत्ययः इष्यते तत्तु गुरावित्याकरः ॥ तद्दर्शयिति । पारायणिकश्छात्र इति । तो पारायणिको यजमान इति । इच्छन्नपि यजमान
एवेष्यते । अर्त्विक्तु यद्यपि पुरोडाशादिकं निर्वपति तथापि तत्र नेष्यते इति भावः ॥ विषयीभूतार्थ [illegible] इति । संदिग्ध इति तु प्रत्ययो ने
ष्यते इति भावः ॥ तथा च ज्ञानप्रामाण्यं स्वतो न गृह्यते सांशयिकत्वादिति संदिह्यमान एव प्रयुज्यते तदर्थः ॥ यत्तु सांशयिकः संशयमापन्नमा
नस इत्यमरेणोक्तं तदपि संशयमापन्नं मानसं यस्मिन्विषये इति व्याख्येयमिति भावः ॥ ततो ऽभिगमनमिति । अत्र पंचम्यंतात्प्रत्ययः ॥
पथो ण नित्यं ॥ अत्र नित्यग्रहणं भाष्ये प्रत्याख्यातं । उत्तरपथेन । चकाराद् गच्छतीति प्रत्ययार्थ आख्यायते तद्दाह । उत्तरपथेन गच्छती
ति । कालात् । स्वरूपग्रहणमिह न भवति । तमधीष्टो भृतो भूतो भावीत्यस्यं तत्संयोगे द्वितीया निर्देशात् मा [redacted] सा
द्वयसीत्यादौ मासादीनां कालेन विशेषणाच्च । तेन निर्वृत्तं । तेनेति करणे तृतीया । चतुरश्यं तरगलेतेन निर्वृत्त इत्यत्र
तु कर्त्तरि तृतीयेति विशेषः ॥ उभयत्राप्यंतर्भावितण्यर्थाद्धेतोः कर्मणि क्तः ॥ मासाद्वयसि । खञो ऽजिकरणं स्वरार्थं । पुंवद्भाव
निषेधार्थं च । मासीना भार्या ॥ द्विगोर्यप् । पित्वादनुदात्तः ॥ तेन कालांते द्विगाविति पूर्वपदप्रकृतिस्वरो ऽवतिष्ठते । द्वैयह्नि
क इति । नन्वत्र राजाहः सखिभ्य इति परत्वाट्टचा भाव्यं । न च महाविभाषयाट्टचो विकल्पः ॥ इहतीज्ञात्यंतासमासंताङ्को
ति निष्ठ्युपरिगणनादित आह । समासांतविधेरिति । द्विवर्षीणो व्याधिरिति । व्याधिशब्देन प्रत्ययार्थस्याचेतनत्वो
क्ता । चित्तवति तु नित्यं लुग्वक्ष्यति । परजय्य इत्यस्य विवरणं जेतुं शक्य इति । महानाम्न्यो नामेति । तथा चाभाषितपुं
स्कत्वात्पुंवद्भावेनेति भावः ॥ तरद्मनस्विति । योगिकोयं न तु रूढ इति मन्यते । अव्ययसंघातादिति । वचनसामर्थ्याद्द्व
व्यादपि प्रत्यय इति भावः ॥ काल्याद्यत् । काल्यं शीतमिति । प्रातः काले काल्यशब्दस्य व्युत्पत्त्यंतरं लभ्यं । प्रकृष्टे ठञ् । प्रक

ष्यतेनेनेति प्रकर्षः।कर्म्मणि क्तः।। ठञ्व्यप्रत्ययस्यापवादः।अन्यथा तंतरस्य यतो नु प्रवृत्तिराशंक्येत।। ।।ठञः पूर्व्वो विधिः।
तेन तुल्यं क्रिया चेद्वतिः।तुल्यमिति सामान्ये नपुंसकं।ब्राह्मणेनेति।ब्राह्मणरूपकर्तृकेध्ययनेन ब्राह्मणयावत्तृ
ब्राह्मणकर्तृकाध्ययनतुल्यमध्ययनं वा क्यार्थः।गुणतुल्ये इति।अक्रियया तुल्ये इत्यर्थः।अत एव महान्तस
वदिति वतेः साधुत्वरक्षणार्थं प्रतिज्ञावाक्यवद्भिमान्भवितुमर्हतीत्यादिक्रियापदं प्रयुंजते स्म।अर्वाचीनास्तु महान
ससदृशः पर्वत इति व्याचक्षणाः।स्तत्र विरोधादुपेक्ष्याः।ननु तद्रीत्या व्युत्पन्नस्य तादृशबोधोप्यनुभवसिद्ध इ
ति चेत्सत्यं।तादृशेर्थे साधुत्वमात्रं निराकुर्मो न बोधमपि।तथाहि।।भेदाभेदकसंबंधोपाधिभेदनिबंध
नं।।साधुत्वं तदभावेपि बोधो नेह निवार्यते।अव्युत्पन्नस्य साधुभ्योप्यबोधात्।तेनैव व्युत्पन्नस्यासा
धुभ्योपि बोधाच्च कस्मात्।किं बुध्यत इति निपंतुंशकां किंतु किं विशेष्यके किं प्रकारके किं संसर्गके
बोधे तद्धेय किं साधु किंनेत्येव शास्त्रीयो विचारः।विषयः।उक्तं हि भगवतास्समानायामर्थावगतौ श
ब्दैश्चापशब्दैश्च भक्ष्याभक्ष्यादिवन्नियमः।तत्र तस्येव।द्रव्यगुणाद्वितुल्यार्थ आरंभः।क्रिया चेदिति
नानुवर्त्तते।तदर्हं।अर्हशब्दः पचाद्यजंतः।तद्योगे कर्म्मणि षष्ठी प्राप्ता सोत्रो विभक्तिव्यत्यय इत्येके।अ
न्ये तु कर्तृकर्मणोरिति षष्ठ्या अनित्यत्वे लिंगमिदं तेन धर्मे रामो ह्यनुत्तममिति भट्टिप्रयोगः सत्साहित
इत्याहुः।विधिमर्हतीति।द्वितीयांताद्वत्प्रत्यय इति स्फुटीकर्तुं तिङंतेन विग्रहः।कथं तर्हि तेला यथा
वद्विहिताध्यरायेति।उच्यते।यथाशब्दोत्र विषयेसत्वार्थकः तथा त्वं यथात्वमित्यादिषु त्वतलौ।

शिव४
३५

दिदर्शनात्। तथा च द्वितीयां तादृशार्थे वृत्तिः। योग्यतामर्द इति विधानमाख्यानं चेत् सामर्थ्यात् क्रियायोगोपि स्तुल मः। तस्य भावस्त्वत
लौ। अव्युत्पत्तिरिति। ननु यः कश्चिद्धर्मः। घटत्वमित्यत्र द्रव्यत्वादेरभावात्। गोत्वमिति। इह गोशब्दोऽर्थपरः। स्वरूपपरो वेति प्रश्न
द्वयं। आद्ये धर्मविशेषः प्रत्ययार्थः। स च धर्मत्वेनैव भासते। प्रकृतिजन्यत्वादि स्तु प्रयोगोपाधिः। द्वितीये जन्यबोधप्रकारः
प्रत्ययार्थः। बोधकप्रकारकत्वं वा जन्यत्वं तु संसर्गः। सर्वं चेदं सूक्ष्मदृशा भाष्यकैयटारूढमेव। एवं स्थिते कृत्तद्धितसमा
सेष्वेकार्थीभावाभ्युपगमात्। तदुत्तरत्वतलादिभिरपि तत्करीसे वाक्यबोधनिर्वाहे तत्र नापूर्वशक्तत्वं तरं कल्प्यं किंतु तत्र
प्रकृतिप्रत्यययोः पूर्वोत्तरपदार्थयोश्च संसर्गोपि प्रायेण प्रकारस्तया प्रविशति। ओ भगवो राजपुरुषः इत्यादौ तु
तु सम्बन्धार्थस्य द्वन्द्वे प्रवेशाभावप्रसंगाभावात्। पाचकः इत्यादावपि कारकाणां प्राधान्यात् कर्तृत्वादेश्च संबंधविशे
षात्मकत्वात्। एतदभिप्रेत्य हरिटीकायामुक्तं। कृत्तद्धितसमासेष्वसंबंधाभिधानं भावप्रत्ययेनेति। विस्तरस्तु शब्दकौ
स्तुभे द्रष्टव्यः। पृथ्वादिभ्य इमनिज्वा। आणादीति। येइगंता लघुपूर्वा मृदुप्रभृतयस्तेषां गणः समावेशः। चंडत्वशादिषु
गुणवचनेष्वाज्ञ; बालवत्सादिषु वयोवचनस्याञ् इति बोध्यं। त्वतलौ तु पूर्वेण। लघ्वौ। वर्णदृढादिभ्यः। गुण
वचनत्वादेव सिद्धे इमनिजर्थं वचनं। औचितीति। ब्राह्मणादेराकृतिगणत्वात् ष्यञ्। द्वलक्षादित्स्येति यलो
पः। एवं याप्याकामी। अत्र गणसूत्रं। वैयातलाभमतिमनःशारदानां। विशब्दात्परेषां यातादयः पंच तदंता
नां मासनामनंतरः ष्यञ् भवतीत्यर्थः। वियातत्वं। वियातता। वियातिमा। वैयात्यं। विलाभत्वं। विलाभता। विलाभि
मा। वैलाभ्यं। विमतित्वं। विमतिता। विमतिमा। वैमत्यं। इगंतत्वादण् पि। वैमतं। विमनस्त्वं। विमनस्ता। विम

तिमा। वैमनस्यं। वैशारद्यं। विशारदिमा। सम्मो मतिमनसोः॥ संमतित्वं। संमतिता। संमतिमा। सांमत्यं। पूर्ववदाह।
सांमतमित्यादि। गुणवचनब्राह्मणादिभ्यः। कर्मणि क्रियाकार्ये च। ब्राह्मणादिराकृतिगणः इति। केषांचिन्मते ऽस्तु का-
र्यतिराय। तथादि। अर्हतो नुम्चेति नुमर्थः पाठः॥ एकभाव त्रिभाव अन्यभाव इति। एषां पाठः स्वार्थविधानार्थः।
तथा च वार्तिकप्रयोगः॥ आन्यभाव्यं तु कालशब्दव्यवायादिति। यत्तु व्याकरणे [illegible] धिकरणेऽपप्रयोगोऽय-
मिति तिभेदे रूपन्यस्तं। तत्सर्वं पाक्षिणि। प्रोठिवादमात्रपरं प्रायेण तस्मिन्ग्रघट्टके तादृशानामेवोपन्यासा-
त्। तद्यथा। अविरविकन्यायेनेत्युदाहृतं तदपि वस्तुतो निर्दोषमेव। अविः अविकः अनयोर्मध्ये विकारार्थ-
प्रत्ययः कप्रत्ययांतादेव न तु केवलात्। तेन विकंमांसमिति भवति न तु आविकमिति सूत्रादितं तत्र
अविरविकमिति सुबंतद्वयसमुदाये चरमं सुपं विहाय प्राग्भागमनुकृत्य अविरविकन्यायेनेति भगवता
व्यवहृतं। तत्र को नाम दोषः। न हि विभक्तिविशिष्टमेवानुकर्तव्यमिति नियमे बीजमस्ति। अस्यवामीयमि-
त्या[illegible]दिनिरूढ्यव्यवहारश्च। एतेन नासदासीयं ब्रह्मसूक्तमिति शांकरभाष्य उपयोगोऽपि व्याख्यातः॥ आ-
सीदित्यत्र तकारं विहाय प्राग्भागमात्रस्यैवानुकरणात्। अग्नीश्वरादित्यादावप्यनर्थकस्यैकदेश-
स्याप्यनुकरणं प्रसिद्धमेव। अस्तु वा सीदिति तांतस्याप्यनुकरणं। ततः अनुकरणं चानितिपरमिति
निपातत्वादव्ययत्वे ऽव्ययात् अमन्मात्रति दिलोपः॥ प्रकृतमनुसरामः॥ सर्वं वेदइति। पूर्वकाले के त्रिस

माससः। चतुर्वेद इति। तद्धितार्थ इति द्विगुः। अणो लुक्। चतुर्विद्य इति। विद्यालक्षणस्त्र्यान्तादिति ठक्। तस्य लुक्। संघातग्रहणमि-
ति। वर्णग्रहणे तु वकारस्य यस्येति लोपे तस्य पूर्वविधौ स्थानिवद्भावादयादेशः स्यादिति भावः। ननु संघातग्रहणे फलं त्र्यस्ये-
ति कुतो नेति चेत्। आरंभसामर्थ्यात्। आनर्थक्यं तु विधिरिति निषेधात्। कपिञ्जलाद्याः। शुक्कपिञ्जलानीत्यादौ अपि द्वितये
यथासंख्यं नेष्यते। एवं पत्यं तत्पुरोहितादिभ्यः। पथनात युवादिभ्यः। वृषभनो ज्ञादिभ्य इत्यत्रापि बोध्यं। ब्राह्मणादित्वादिति।
यद्यपि ब्राह्मणादिषु राजशब्दः केवलः पठ्यते तथाप्ययमेवासे इति प्रतिषेधो ज्ञापयति। अस्यत्र राजशब्देन तदन्तविधि-
रिति एवं च ब्राह्मणादिपाठस्य समासे विशेषविधित्वाय गेव भवति। अत एव व्यधिकरणो राज्ञः कर्म राज्यं ब्राह्मण-
दित्वात् ष्यञिति शाबरभाष्ये दृपादे ई विते। केचित्तु भाष्यं समर्थयमाना इत्थमाहुः। श्लोकसमादेराकृतिगणत्वादे-
व तदन्तात् ष्यञि सिद्धे राजशब्दस्य तत्र पाठो यकारस्य समावेशार्थ इति। एतच्च हरदत्तमाधवाभ्यामेकीयमत-
त्वेनोपनिबद्धं। ब्राह्मणभजनाति। प्राणिजातीयेय सुवचं। ब्राह्मणादित्वे किं। हलात्वं। ज्ञाती ति किं। वदत्रत्वं। ओङ्गात्र-
मिति। उज्ज्ञात्रादिषु ये ऋत्विग्वचनास्तेभ्यो ऽत्राम्य श्च इति छे आप्ते अत्र विधीयते। सुष्ठु दुष्ठु शब्दाभ्यां गुणवच - नेष्यज्ञि
वघ शब्दा दिगंत लक्षणो णो। श्रोत्रियस्येति। श्रोत्रियश्छन्दोधीत इति छन्दसः श्रोत्रभावः। घं ज्ञत्य यइतियदि ख्यानं
त देरु घलोप इति यथाश्रुतं। यद्यपि तु वाक्यार्थे पदवचनमिति [illegible] पक्षः। लघ्वा चेयइतिरूपं लभ्यते। क्वचि-
त्तु य लोपस्येति पाठः। न त्र्यस्येति संघातग्रहणं द्रष्टव्यं। इगन्ताच्च। लघुः पूर्वो यस्येति प्रातिपदिकविशेषणं। पूर्ववे-
र्वां संनिधानादिगवधिकेऽमेव। इगंतात् किं। घटत्वं। लघुपूर्वात् किं। पाण्डुत्वं। कथं काव्यमिति। यद्यपि कुधातो-
रावश्यक इति एयति काव्यमिति सुसाधं तथापि कवेः कर्म त्यर्थे काव्यमिति स्यादिति प्रश्नः। अभिधानं

चरितार्थ
त्वादे समासे
त्रे
दे
अवयवे

म.र.त. ५सा च भवनापेक्षया कर्त्तरीत्युक्तमेव। अलौकिके तु प्रक्रियावाक्ये नाद्दित्वविधावनुवादसामर्थ्यादेवेति बोध्यं। यवयवक॥ अत्र प्रत्ययार्थसामर्थ्य...

३०१

१८।

यकमिति। अभिधेयस्य भावः कर्मेत्यर्थः। समर्थादिति। सूत्रेण नित्ये प्राप्ते विकल्पार्थं वचनं। गोत्रचरणात्। अपत्याधि
कारादन्यत्र लौकिकं गोत्रं। तेनापत्यप्रत्ययान्तेभ्य इत्यर्थः। प्रवराध्याये पठितेभ्य इत्यपरे। गोत्रं च चरणैः सहेति जातित्वात्प्रा
प्ते ञ्जातीत्यनिषेधार्थं वचनं। गार्गिकयेति। आपत्यस्येति यलोपः। ...श्लाघ्यत्यत्त्व:। ... ... इति। ... ...। ... ...
तिवा ...। ...स्य भावस्त्वतलौ विशेष्यविशेषत्वः सिद्धः। विभक्तेरनुच्चारणात्। तच्चैवं वेति भावः। ...ति।
अनेन ... ... फलं दर्शितं॥ ॥ नञ्तत्पुरुषा... कारः समाप्तः॥ ॥ धान्यानां भवने। भवनापेक्षया कर्त्रे शिवबीय
मवाति रिहत्यनिवचनः। ब्रीहिशाल्योः। निर्देशादेव षष्ठीसमर्थविभक्तिः। विभाषा। रवजिधासेवचनं। नचोमाभंगयोर्नित्य
त्वविधिरिति पत्तव्यमुमाशाणसप्तदशानि धान्यानीति स्मरणात्। नचोमाभंगयो र पिपाठादिति नाशे स्थितं। सर्वचर्मणः
अत्र तृतीयासमर्थविभक्तिः। सामर्थ्यात्। कृतइत्यपि प्रत्ययार्थः। तत्र चर्मणा कृत... भेवा चिन्तितं। यथा ... सुख
म... दृश्यते स्मिन्निति ... ... दर्शनि आदर्शादिः। अधिकरणे ल्युट्। नन्वसादृश्यप्रतिषेधात्कथं समासस्तत्राह। निपात
नादिति। एतच्च वृत्तिग्रंथमनुरुध्योक्तं। भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशब्दस्यापि न तः। तथा च मायाम्... यथा
थामुखीनः सीतायाः पुप्लुवे बहु लोभयन्निति। यथामुखं दर्शनमिति। अव्ययीभावस्यापि यथामुखशब्दस्योक्तत्वान्तं
गादिगणपाठत्वस्य वचनत्वात्। कर्मणि ... ... साति रूपेण गलम्बणे षष्ठी नाव्ययीभावादित्य सर्वस्येति। संमुख
स्येति नोक्तं। प्रत्ययसंयोगेनान्तलोपनिपातनात्संचाप्युक्तं सम्मतशब्दस्यार्थे प्राये दृश्यते। संमुखो भवे संमुखा
मुखो भवेत्यर्थ इतीतः। तत्र च वक्तव्यत्वाद्यस्याभिप्रेतत्वात्। कथं तर्हि संमुख... संमुखीनं तनु जन्मसहृतक

२०

शिवः
३६

सा

२२

तिभट्टिः॥ अभिमुखं स्वावस्थाना[illegible]धम्यादितिहरदत्तः॥ सर्वपथीन इति। पूर्वकालैकेति समासः॥ अनुरिति समासांतः॥ तस्यपथ्यंल
ग्रहणेन ग्रहणात्त्व॥ अनुपदसर्वान्ना। यवभक्षयति नेये ष्विति निपातनात् निङ् न स्य दंडः॥ अनुगवायाम इति। यस्यचायाम इति
यथार्थे यदव्ययमिति वाव्ययीभाव इत्यर्थः॥ स्थलविशेष इति। गतिविशेष इति व्याख्यांतरं। नयतेः॥ अप्रधाने कर्म्मणि
त। अप्रधाने द्वितीया॥ अत्रेयं द्यूतशास्त्र मर्यादा॥ चतस्रो वीथयः प्रत्येकं द्वादशकोष्ठोपेताः॥ शारास्तु त्रिंशत्। ते
चैकैकतः किल वेनैस्व वामपार्श्वस्थप्रकोष्ठपर्यंतं प्रदक्षिणप्रसव्यगतिभ्यां नेयाः सर्वे प्ययानयीनाः॥ ससहायस्य शारस्य प
रेर्नाक्रम्यते पदं। असहायस्तु शारेण परकीयेण बाध्यत एष बहुसंमतोर्थः॥ यत्तु केयटेन द्व्योः पर्य्युदासेन त्रयो दशा नामेय पया
नयीन तत्याशयेन मतांतरं [illegible] केचित्त्वियादिनोक्तं। तन्मते द्वे वीथी। शेषं प्राग्वत्। प्रदक्षिणप्रसव्यतेन च एकैकं कि
तवं प्रति विवक्षितेन तु कंचित्प्रति किंचि[illegible]ने च पंक्ति चरम कोष्ठस्थाभ्यामितरे[illegible]षामेवेति बोध्यं। शार इति। ध्यूणां यनेन
द्यूतकाराः परस्परमिति शारः॥ द्यूतसाधन विशेषः॥ बाहुलकाद्दञ्। परोवर। अवरस्येति। आद्येरित्तिशेषः॥ तत्वे कृते आ गु
णः॥ अवारपारगामीति। गमेरिनिः॥ आङि णिद्वेति बहुलवचनात् केवलादपि णिनिः॥ भविष्यति गम्यादय इति भविष्यत्काले
ता। न्यासकारस्तु। आवश्यके णिनिः॥ सोपि भविष्यत्येवेत्याह। अयस्मीन। अविभक्तिको निर्देशो न तु स्त्रीलिंगनिर्देशो यं
। अयस्मीप्वीनेगासमूह॥ अयस्मीनं गोमंडलमित्यादावपीष्टत्वात्। आसन्नमित्यर्थ इति। अवाश्चालंबने तिसूत्रेण आ
विदूर्ये संभेः षत्वविधानादव ष्टभ्य शब्द॥ आसन्नपरइत्यर्थः॥ अधयाद्योयति वार्थे समासोपि निपातनादेव। गोश्च
गोः प्रतिपन्नेलक्षणया वर्त्तते तद्दर्शयति। प्रसर्पणपर्यन्तमिति। आगवीनमिति। आङ् मर्यादाभिविध्योरिति सव्ययी
भावे उपसर्ज्जनह्रस्वत्वे चकृते खप्रत्ययः ओर्गुणः। गोः पश्चादिति। पश्चादर्थेव्ययीभावः॥ पर्यान्तमिति। क्रियाविशेषणं
अत्र हरदत्तः॥ द्वितीयां लादि प्रत्ययः॥ अलुगित्यस्य क्रियाविशेषणत्वात्। नचालंगामी सस्यस्तु पद्भालोविति णिनि

णिनिप्रत्ययांततया कृद्योगलक्षणा षष्ठी स्यादिति वाच्यं। क्रियाविशेषणत्वान्न तदप्रवृत्तेः। शोभनं पाचक इत्यादौ तथा दर्श
नादित्याह। कुत्स्नस्येत्यर्थे द्वितीया कर्मत्वं। तच्च न भावनामात्रं प्रति। तत्कर्मणः विक्लित्त्यादेः प्रातिपदिकार्थत्वाभावात् संकोचे मानाभावाच्च।
किंतु विक्लित्त्यनुकूलव्यापाररूपं यत्फलं यस्यं प्रति कर्मतास्तं तुलादेरेव षष्ठी [illegible] ति तदाशयः। अत्र देवकाण्डं। लक्ष्मतो नानि
प्र तीति समासः। क्रियाविशेषणत्वाद्द्वितीया समर्थविभक्तिः। गोष्ठात्वल्। गावस्तिष्ठन्त्यस्मिन्निति गोष्ठः। घञर्थे कविधा
नमिति अधिकरणे कः। अंबांबगोभूमी इति षत्वं। एकाहेनेति। नन्विरुग्यरुदह इति निष्ठागमस्य त्यपंबाधित्वात् परिमाणाख्यायां
सर्वेभ्य इति घञ्प्राप्नोति। अस्ति चात्र परिमाणाख्या एकाहेनेति परिच्छिद्यावगमात् तत्त्वं। अस्मादेव निपातनादत्र अपू
अध्वस्येति कर्त्तरि षष्ठी। शालीनकौपीने इति शालाप्रवेशौ। अवयवार्थे तु शालीनवाभिनिवेष्टव्यं शालाप्रवेशमिति। अप्राप्य
त्यादन्यत्र गंतुमशक्तः। शालामेव प्रवेष्टुमर्हतीत्यर्थः। कूपपतनमिति। यदकार्यं तत्स्वप्नादनीयत्वात् कूपावतरणम
र्हतीत्यर्थः। तदाच्छादनमिति। वासः खण्ड इत्यर्थः। अपरे आहुः अकार्यशब्दे करोतिः क्रियासामान्यवचनस्तेन लज्जाहेतु
त्वेनाच्छादनीयत्वात् पुरुषलिंगं कौपीनं [illegible] अस्य रूपवाच्छादनमिति। आत्मनजीवति। आत्मशब्दो यद्यपि
घातवचनस्तथाप्यत्र भाष्यादि पर्यालोचनया विवक्षितमर्थमाह। शरीरायासेनेति। भारवहनादिनेत्यर्थः। सप्तभिः प
देरिति। तद्धितार्थे द्विगुः। अप्राप्यत इत्यर्थे खञ्। हैयंगवीनं। दोहः क्षीरमिति। गोदोह इति षष्ठी समासः। ह्यस्शब्दस्य
तेन सह सुप्सुपेति समासः। ततो विकारेनुदात्तलक्षणस्याञोपवादः खञ्। अत्र ह्यस्शब्देन कालप्रत्यासत्तिर्विवक्षि
ता। नवनीतमिति। यद्यपि वृत्तौ नवनीतमित्युक्तं। अमरेणापि तत्तु हैयंगवीनं यद्ध्योगोदोहोद्भवं घृतमित्युक्तं तथापि नव
नीतमेव विवक्षितमिति हरदत्तादयः। तस्य पाक। पाकः परिणामः। मूलमुपक्रमः। ज्ञानचोपक्रमस्यनेत्वं। प्रयोजनाभा
वात्। पच्यतीति प्रतिपन्नापद्धितानां पक्षमूलं च। तेन विन्नः। विन्नः प्रणीतः। विन्नो भोगप्रत्यययोरिति निपातनात्साधु

अमयद्व ५

मयद्व ३

त्वं। विभाषाचुंचुरिति उकारस्य यगभावार्थं प्रत्ययः॥ विनभ्यां नानाञौ असकारोवृध्यर्थः॥ स्वरार्थश्च॥ संप्रोदश्च॥ चाद्दः॥ क्रिया विशिष्ट
साधनवाचकत्वात्स्वार्थे प्रत्ययः॥ रूढश्चायं शब्दः। अलाबूतिलेत्यादि। भंगाभ्यः इति पाठः॥ भंगाशब्दः शणवचनः॥ विकारप्रत्यया
पवादोयं रजसो विकारत्वात्। अलाबूकटमिति। ओरञ्॥ मयड्वैतयोरिति मयट्। द्व्यचः प्राप्तः॥ तिलोमाशब्दो माषघृतादि
त्वादन्तोदात्ताभ्यामनुदात्तादेश्चेत्यञ् प्राप्तः॥ उमोर्णयोर्वा॥ वुञ्च। अञ्। संज्ञायां तिलयवाभ्यामिति मयड्वैतयोः प्राप्तः॥ तत्र तिल
शब्दस्य घृतादित्वे कल्प्ये नवीजञ्चित्स्यं तएणधान्यानां च घयामिति फिट्सूत्रेणाद्युदात्तस्यैव न्याय्यत्वात्। तथैव तद्
न्तादुदात्तत्वात्। तिलाश्च मे यवाश्च तथैव वेदपाठाच्चेति दिक्। भंगायास्तु रूणधान्यानां च घयामिति फिट्सूत्रेणाद्युदा
त्तत्वाद्दण्प्राप्तः॥ गवांस्थानमिति। तस्येदमित्यर्थे समभ्रगोरजादिषु संगत्य दिति यत्प्राप्तः॥ संघानगृहणमिति।
अप्रस्तावयवः समूहः संघातः॥ प्रस्तावयववस्तु विस्तारः॥ कटस्य यत्त्वो घवपिसाम्नः द्विकानामपवादः॥ द्वित्वसंख्ये
इति। प्रकृत्यर्थस्य द्वित्वविशिष्टत्वे इत्यर्थः। उष्ट्रगोयुगमिति। अवयवसंघातप्राधान्यादेकवचनं। द्वयं युगमित्यादिवत्
एवमन्येपि। अवटीटमिति। नासिकासाधनेन नमनेवर्तमानात्स्वार्थे प्रत्ययः॥ क्लिन्नस्य। अत्र वदंति। अस्येति नव
कार्यं। क्लिन्ने चक्षुषी चिल्लं पिल्लं पुरुषे तु मत्वर्थे चः। आर्शआदिषु स्यागात्हीनादिति सूत्रितत्वात्। अमरोप्याह। सु
क्लिन्नाक्षे चिल्लपिल्लचुल्लाः॥ क्लिन्ने स्युश्चाप्यमी इति। वार्तिकमतेन तु पुरुषे ग्लुसादितानां तद्वयवेलक्षणो बोध्यः
।प्रमाणे द्वयसज्॥ प्रमाणेविद्यमानात्प्रथमांतात्तदस्येति निर्दिष्टे प्रमेये अर्थे त्रयः प्रत्ययाः स्युः॥ प्रमाणेति परि
च्छेदक [illegible] मात्रं तत्र मात्रच्। द्वयसज्दघ्नचोस्तु विशेषस्मर्यते॥ तथा च भाष्यं॥ प्रथमश्च द्वितीयश्च ऊ
र्ध्वमाने मतौ ममेति। ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानं। जान्वादि। तेन तिर्यङ्मानादौ न भवति। अतएव

म॰र॰म॰
१९३
193

वह्निकां डाभ्ये त्रभास्त्रिरित्यत्र द्वयसचो लुगिति प्राचां ग्रंथः प्रामादिक इत्यवोचाम। प्रमाणे ल इति। लुक एवाप्
र्वाचार्यस्य संज्ञा। प्रमाणत्वेनेयप्रसिद्धादिति हस्ताद्दिशश्च ततः परस्यैवायं लुक्। ग्रामो द्विहस्तिर्वितस्तिरिति। एषु च मात्रचो लुक्
इतरयोरसंभवात् ग्रामादीनामनुद्दिश्यमानत्वात्। द्विगोर्नित्यमिति। द्विगोः प्रमाणेवाच्ये इदं तद्धितविध्यभावाद्वपूर्वेणाप्राप्तौ लुग्वि
धीयते। ननु नेह विकल्पः प्रकृतः तत्किं नित्यग्रहणेन॥ अत्राहुः॥ अनुपदं वक्ष्यमाणः संशयेमात्रच्प्रशमनमात्रमि त्यादौ य
था न लुप्यते प्रमाणे ल इत्यस्य पूर्वविधिविषयत्वादेवं द्विगोरपि न लुप्येत इष्यते च लुक् द्वौ शमौ स्यातां
नवा द्विशममिति। तथा चाधिकसंशयार्थं नित्यग्रहणमिति। पुरुषहस्तिभ्यामण् च। इनन्यनपत्य इति त्रह्रेति भावः। हास्ति
नं। अचकारिका। द्विगोर्नित्यं लुक्। द्विपुरुषमुदकमित्यादि। यद्यपि प्रमाणे लो द्विगोरित्यस्यायमनुवादः। पुरुषहस्तिनोः प्र
मादिवत् प्रमाणत्वेनाप्रसिद्धत्वात्। अत एव द्विपुरुषी द्विपुरुषं द्वयसमित्यादौ प्रमाणे ल इति लुङ् न भवति तथाप्यपूर्वो यं त्र लुग्वि
धीयत इति दिगदत्तः। एतच्चासंगतं। मात्रचादीनां प्रतिषेधो वक्तव्यः इत्यत्र मुनित्रयानुक्तत्वादप्रामाण्यमुक्त्वेय त्रिभिर्वि
द्भिः न्यायसाम्यादिना पितथैव वक्तुमुचितत्वात्। वस्तुतस्तु विधीयत इत्यस्यानुमीयत इत्यर्थः। अयं भावः। द्विगोस्त
द्धितलुकीत्यनुवर्तमाने पुरुषात्प्रमाणेन्यतरस्यामिति ङीब्विकल्पनेनैवं लुकमनुमापयतीति। अनुमीयमान
श्च लुग्द्वयसजादीनां न लगेः ग्रहणवलात् प्रातिपदिकेन तद्धितविधिप्रतिषेधान्न द्विगोरणः प्राप्त्यभावात्। यत्तु देतेभ्यः प्र
यानिति। आ सर्वनाम्न इत्यात्वे। ननु प्रमाणे इत्येवानुवर्त्यतां किं परिमाणग्रहणेनेति चेत् अत्र वार्तिकं। यावता
वयर्थविशेष्यात्रिंशिः ध्यगुच्यते। मात्राद्यप्रतिघाताय भावः सिद्धस्वडावताविति। अस्यार्थः। इदकिमोरत्वनुपं विधाय
तस्मिन्परत आत्वे विहितं। पूर्वाचार्यास्तु वतुपं विदधिरे तदीयानि ईकारार्थं डावता विति। विशिष्यत इति विशेषणस्य

शिव ४
३८

भावो वैशेष्यं तस्मादर्थभेदादित्यर्थः॥ प्रमाणपरिमाणयोर्भेदस्य प्रागेवोक्तत्वा[दि]ति भावः॥ स्यादेतत्। एवं [सति] यावानध्यायावतीर
ज्जुरित्यादि न स्यात्। आयामस्तु प्रमाणं स्यादित्युक्तेः॥ उपमानाद्द्विष्यतीति चे[न्न] तर्हि प्रमाणग्रहणमेवानुवर्त्यतां उक्तयोगाश्च
मुस्याः संतु येतु परिमाणे प्रयोगाः यावान्धान्यराशिरित्यादयः॥ अत एवोपमानादवतितत्रापि। मात्राद्यप्रति। विशेषविहितेर्वत
पू मात्रा आदीन्बाधते। तेन तन्मात्रमित्यादि न स्यात्। परिमाणग्रहणे सति तु भिन्नोपाधिकत्वात् बाध्यबाधकभावो नेति भावः॥ नन्वे
वमपि बाधः स्यादेव पूर्वसूत्रे प्रस्थमात्रमित्यादिसिद्धये प्रमाणग्रहणस्य परिच्छेदकमात्रपरतयाख्यातत्वेन वतुपो विहितत्वा
न पायात् तस्माद्वतुब्[...]त्येव कर्त्तव्यतां मास्तु परिमाणग्रहणं॥ अस्तु च प्रमाणे इत्यर्थाधिकारः॥ एवं च यावली रज्जुः यावान्[...]धा
न्यराशिः॥ यावती बुद्धिरित्यादि त्रिविधप्रयोगा अपि उपचारं विनैव निर्वहन्तीत्यपरमनुकूलं अत आह। भावः सिद्धश्चेति। गा
तो रितिर्पचम्यंतं अर्थभेदे सतीवत्यं तान्मात्रजादीनां मुत्पत्तिः सिध्यति। तत्परिमाणमस्य तावद्धान्यं तावत्प्रमाणमस्य कु
आदेः यावद्धान्यं राशीकृतस्य धान्यादेर्दैर्घ्यं तावत् कुड्यादेरपीत्यर्थः॥ एकविषयत्वे तु वतुपैव विशिष्टस्य प्रमेयत्वोक्त
त्वान्न दंतान्मात्रजादयो न स्युः॥ यस्य हि तावत्प्रमाणं तस्य तदपि। एवं च तावच्छब्द एव प्रयुज्यते। अन्यथा मात्रजादि
प्रत्ययमाला प्रसंगात्॥ किमिदंभ्यां। कियानिति। इदंकिमोरीश्की। यस्येति लोपः॥ इयानिति॥ प्रत्ययमात्रमिहाव
शिष्यते। पठन्ति च॥ उदितवति परस्मिन्प्रत्यये शास्त्रयोनोगतवति विलयं च प्राकृते तु प्रपंचे॥ तदिह पदमुदी
तं केवलः प्रत्ययो यत्तदिय दिति मिमीले कोऽह द्वांडि तोपि॥ वैय्याकरणानामोपनिषदानां च घटते यं श्लोकः॥ किम्
संख्या॥ संख्यायाः परिमाणं परिच्छेदः तस्मिन्कर्त्तव्ये यः प्रश्नः तत्र वर्त्तमानात्किमः अस्येत्यर्थे डतिः स्यात्॥ संख्यापरि
माणे किं। क्षेपमात्रा॥ के यमेषां दशानां संख्या॥ अत्र तानाममन्त्राणां जातिमात्रेण उजीविनां सहस्रशः समेतानां
परिषत्त्वं न विद्यते इत्येवं संख्येयप्रकारेण हि संख्यायाः कुत्सा बोध्या॥ संख्याया अवयवे। यं प्रत्ययवये पत्वं सोऽवय
वी। प्रत्ययार्थे अस्येत्यधिकारात्॥ यथा द्वयसज्जादिषु प्रमाणोपक्रमर्थः प्रमेयं प्रत्ययार्थस्तद्वदत्र [...] नि

राशीकृतं

ति

त्वं। इहांतोदात्तत्वं चित्स्वरेणैव सिद्धं। सर्वोदात्तत्वं तु बाधितं। अनुदात्तं पदमेकवर्ज्जमिति वचनात्। न च रुडभये त्यत्रा
मंत्रिताद्युदात्तत्वं बाधितुं वचनं पुरस्तादपवादन्यायेन चित्स्वरस्यैव बाध्यत्वात्। तस्माद्युदात्तवचनसामर्थ्या
दाद्युदात्त एवायं। तथा च प्रयुज्यते। उभयं स्थानवच्चेन इति। तदेतदाहा सचेति। शब्दतविंशतेश्च। प्रत्ययग्रहणप
रिभाषया तदंतविधौ सति तदादिनियमः स्यात्तं वारयितुमंतग्रहणं। तेन एकत्रिंशंशतं एकचत्वारंशमि
त्यादि। न चैवं गोत्रिंशदधिका अस्मिन् गोशते इत्यादावतिव्याप्तिः। संख्याया अवयवे तयप् इत्यतः संख्याग्र
हणानुवृत्तेः। अंतग्रहणं विंशतिशब्दानंतरं बोध्यं। शद्विंशत्यंताच्चेति। तेनैकविंशशतमिति सिध्यति। अन्यथा ग्रह
णवता प्रातिपदिकेन तदंतविधिप्रतिषेधादिदं न स्यात्। तस्य पूरणे डट्। तस्येत्येकत्वमविवक्षितं। पूर्य
तेऽनेनेति पूरणः। एयं नाकरणे ल्युट्। एकादशानामिति। उद्भूतावयवभेदः समुदायः प्रकृत्यर्थः। अवयवः प्रत्ययार्थः
इत्यस्मात्संख्यावाचिनः प्रत्ययविधिः तदीयप्रवृत्तिनिमित्तस्य एकादशत्वादेः पूरणे प्रत्ययः। यथाति शायने
कुत्सितेत्यादिषु प्रवृत्तिनिमित्तस्यैवातिशयादिकं गृह्यते तद्वत्। अत एव हापि यथा च तत्र पाप्पो वैयाक
रणः इति विग्रहः न तु याप्यं वैयाकरणत्वमिति तत्पराऽपि वृत्तिभावः। एवं च व्युत्क्रमेणाध्यायेषु गण्यमानेषु सम
र्थः पदविधिरित्यध्यायोऽपि दाचरमो गण्यते तदा सोऽप्यष्टमो भवत्येव। नांतादसंख्यादेर्मट्। डट इति। डडिति प्रथम
तस्याद्युदात्तस्य तात्स्यादिति पंचम्याः षष्ठी कल्प्यत इति भावः। यद्यपीह मटः प्रत्ययत्वेऽपि न क्षतिः तथाप्युत्तरसूत्रम
टः आगमत्वमेवैष्टव्यं। अनुदात्ततायथास्याद् दि प्रत्ययत्वेऽपि हि आद्युदात्ततास्यात्। तथा चैकरूप्येणोव संभ
व्याख्यानमनुचितं। पंक्तिः। इह षष्ठी निर्द्देशबलात् षडादीनामागमित्वं। एवं चानुवृत्तो डट् अर्थात्सप्तम्या विपरिणम्यते

तद्ग्रहः॥ डटीति। ड इ एव च इह न कृतः षष्ठेङ्शत्वापत्तेः। चतुर्थे रेफस्य विसर्गापत्तेश्च। न चैवं सूत्रे विभुग्ने वा स्त्विति
वाच्यं। पंचमः सप्तम इत्यादौ नलोपाभावापत्तेः॥ आद्यद्वरे इति। अन्तर्हितं व्यंजनमस्य इत्यन्तर्हितस्यादेर्व्यंजनस्येत्यर्थः
आदेरच इति व्याख्याने तु द्विर्वचनन्यायेन तकारस्यापि लोपः स्यादिति हरदत्तः। विशेषणविशेष्यभावव्यत्य-
सेन व्याख्याने तु प्रथमानां तु द्वितीयतृतीयचतुर्थतुर्यचतुर्याणीति निर्देशो बाध्येः। द्वित्रीयः तुटोऽपवाद इति। डटो द्विश-
ब्दस्य वा देशस्तु न भवति। द्वितीये ति निर्देशात्। तृतीय इति। रेफस्य ऋकारः संप्रसारणं। हल इति दीर्घस्तु न। अ-
ण इत्यनुवृत्तेः। त्रेः तृ चेति नोक्तं प्रत्ययो मा विज्ञायीति। विंशत्यादिभ्य इति प्रत्यासत्या पंक्त्यादिसूत्रे निपातिता विंश-
त्यादयो गृह्यन्ते न लोकप्रसिद्धाः विप्रकृष्टत्वादिति भाष्यमतं। लौकिकानां ग्रहणं तु वृत्तिमतं। एकविंशतितम-
मिति। यद्यपि भाष्यमते ग्रहणवता प्रातिपदिकेन तदन्तविधिर्दुर्लभस्तथापि षष्ठ्यादेश्चासंख्यादेरिति सू-
त्रे संख्यादिपर्युदासो ज्ञापयति। इह प्रकरणे तदन्तानामपि ग्रहणमिति। एवं स्थिते एकान्नविंशतेः पूरणः ए-
कान्नविंशतितम इत्यपि सिध्यति। लौकिकानां ग्रहणमिति वृत्तिमते तु नैतत्सिध्येत्। विंशतेः प्राग्भावित्वाद-
स्याः संख्यायाः स्पष्टं चेदं कैयटहरदत्तग्रंथयोः। यत्तु प्राचीनप्रक्रियायां व्याख्याने उक्तं विंशत्यादयो लौकि-
काः गृह्यन्ते न पंक्त्यादिसूत्रनिर्दिष्टाः। तथा सत्येकविंशत्यादेर्न स्यात्। ग्रहणवता तदन्तविधिनिषेधात्।
एकोनविंशत्यादेरतिप्रसंगाच्चेति॥ अत्रेदं वक्तव्यं। मूलग्रंथो भाष्यमतसाधारणः। तस्य बलाद्वृत्तिग्रंथ-
परतया नयनं तावदयुक्तमनुचितं च। किंच। तदन्तविधिप्रतिषेधादतिप्रसंगाच्चेति स्वोक्तिः परस्परविरुद्ध-
पदविहितदन्तविधिः न कुत्रत्यस्तत्र्हेति प्रसंगः। अथ ज्ञापकात्तदन्तविधौ स्थितत्वात्तस्य कथं चित्कृत्वा क्लिर-
पि व्याख्येयत्वाभिमतं। तदपि न। एकोनविंशतितम इत्यस्य वृत्तया तत्रानिष्पत्तेर्दुर्वारत्वात्। प्रत्युतस्व प

म.र.त.

१९५
195

स्तेन आप्याप्तिरेव दोष इत्यास्तां तावत्॥ इदं त्ववधेयं। अनारंभो वा प्रातिपदिकविज्ञाना[नु]यथा सरूपस्त्रादिषु इति वदता कात्याय
नेन यद्यपि पंस्त्रादिसूत्रं प्रत्याख्यातं तथापि इहार्थमावश्यकं तत्। अत एव तत्र भाष्यकृतोक्तं। नास्य या कर्तव्या यत्रानुगमः
क्रियत इति। नित्यं शतादि॥ ननु षष्ठ्यादेश्चासंख्यादेश्चेत्यनेन सूत्रेण सिद्धं किं शतादिग्रहणेनेति चेन्मैवं। असंख्यादेरि
ति वक्ष्यति। एतत्तु संख्याद्यर्थं तदेतत् [illegible] नयन्नुदाहरति। एकशततम इति। मासादेरिति। संख्या वा। वि वा भावे पी
ति भावः। संख्यादेरिति। एतत्तु षष्ठ्यादावुक्तत्वाद्बोध्यं। नित्यं शतादीत्युक्तत्वात्। मतौ छः॥ मत्वर्थ इति। मतो विषय इत्यर्थः। ते
न समर्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थश्चेति सर्वं गृह्यते। तत्र कुशलः॥ गोषदादिभ्यो वुन् [illegible] यतो वुन् अनुव
र्तते। आकर्षादिभ्यः कन्। वुना सिद्धे कन्ग्रहणं पिद्वर्णनार्थं। अशनिकः। शाकुनिकः। त्सरुकः। मुखम इति। हरदत्तस्व
रसादित्यर्थः। उदराट्टगाद्यूने॥ अविजिगीषाविति। दिवो विजिगीषायामिति निष्ठानत्वविधानात्। सस्ये
न। कर्तरि तृतीयेयं। परितो जातः परिजातः परिगत इत्यर्थः। अत एवेति। अकेनोरिति निषेधादिति भावः। तत्रा
दचिरा॥ तं तंतुवायशलाकातन्व्यं तेतं तवोस्मिन्निति सुस्पष्टे। अचिरः कालोपहृतस्येति। कालः परिमाणि
नेति समासः। ब्राह्मणको ष्णिके संज्ञायां। ब्राह्मणशब्दादायुधजीविको [illegible] का प्रथमो लाप्तमप्यर्थे
कन् प्रत्ययः। अन्नशब्दात्तु अल्पलोपाधिकात्। तदाह आयुधेत्यादि। शीतोष्णाभ्यां कारिणि। शीतमिव शीतं म
दमित्यर्थः। शीतं हि मंदत्वात् युक्ते सति शीले कार्यकरणपाटवाभावात्। उष्णमिवोष्णं शीघ्रमित्यर्थः। क्रियावि
शेषणान्या [...] द्वितीयान्ताभ्यां प्रत्ययः। कृद्योगलक्षणा षष्ठी तु क्रियाविशेषणान्नेत्युक्त
।अधिकं। अध्यारूढः शब्दादिति। गत्यर्थाकर्मकेत्यादिना रूढः कर्तरि कर्मणि च क्तो विहितः आद्ये कर्मणो नाभि
हितत्वात् अध्यारूढशब्दयोगे द्वितीया। अध्यारूढो द्रोणः खारीमिति। या मं[illegible]त इति। अध्याधिकशब्देनापि यो

शिवः

४०

वत्।

गे द्वितीयायां प्राप्तायां यस्माद् अधिकं तदस्मिन्नस्तीति च निर्देशाद् अयासं च मी सप्तम्यो भवतः। द्वितीये लुक मर्त्यो अभिहित त्वात् प्रथमा। अधिकार खारी द्रोणेन। अनुका। सूत्रे समाहारे द्वंद्वे लिंगव्यत्ययः। अनत्व भिष्यामिति। ससाधन क्रियावाचिभ्यां मित्याकरः। क्रिया विशिष्ट साधन वाचिभ्याम् इति तस्याशयः। कन्निति स्वार्थे। अनृजुरिति। तिर्यगवस्थानात् आर्य अनृजु तत्सा धर्म्यात् उपायो पि। एवम् अग्रे पि। अयः शूल दण्डाजिन शब्दो गोणी इत्यतो अपार्श्वार्थाय अः शूल दण्डाजिन शब्देभ्यो मुख्यार्थेभ्यः प्रत्ययो न स्यात्। ताव तिथं ग्रहणम् इति लुग्वा। तथा तस्यापत्यम् इत्यत्र तस्येति षष्ठ्यन्तानां सामान्य निर्देशस्तथा त्रर्वं तिथम् इति पूरणप्रत्ययान्ता नां सामान्य निर्देशः। कन्स्याद् इति। अनंतरा वपि ठक् ठञो नानुवर्त्तेते ऽस्वरितत्वाद् इति भावः। पूरणप्रत्ययस्येति। ननु कनः लुग्वा ग्रहणानर्थक्यप्रसंगात्। पंचमं पंचमकं इति द्विरूप द्वयं तेन साध्यं। तत्र महाविभाषाधिकाराद् विकल्पे न कन् तु सत्यासिद्ध एव तस्मात् लुग्वाग्रहणं कुर्वतः सूत्रकारस्य पूरणप्रत्ययस्य लुगेवाभिमतः। वृत्तिकृता च तथैव व्याख्यातम् इति तदनुरोधेना स्माभिरपि तथैव व्याख्यातम् उदाहृतं च। वार्त्तिककारस्तु कन एव लुग् इति व्याख्याम् अभिप्रेत्याह। ताव तिथं ग्रहणम् इति लुग्वा वचनम् अनर्थकं विभाषाग्रहणाद् इति। तन्मते द्वितीयकं द्वितीयम् इत्येव रूपं बोध्यं। श्रोत्रियं श्छंदो धीते। छंदः शब्दस्य श्रोत्रभावः घश्च प्रत्ययः। छंदो ध्यायिनि निपात्यते। श्राद्धमनेन। श्राद्ध शब्दः कर्मनामधेयं तत्साधनेद्रव्ये लक्षणया वर्त्तते। श्राद्धी श्राद्धिक इति। अद्यतन एवेष्यते। अद्य भुक्ते श्वः श्राद्धिक इति मा भूत्। पूर्वादिनिः। पूर्वम् इति क्रियाविशेषणात् द्वितीयान्तात् प्रत्ययः। छंदसि। परिपंथि चेति। परि पर्यवस्थात् शब्दात् तु पर्यात्सार्थे इनि प्रत्ययः। अवस्थात् शब्दस्य च परिपंथ आदेश निपात्यते। अपत्यं परिपंथिनं मा त्वा परिप श्रे विदत्। अथ त्रापि परिशब्दे ऽवग्रहः। लोकेति। अनुपस्थित परिपंथिभिः पार्थिवे शिल्याये। अनुपदम् इति। पदस्य पश्चात्। पश्चाद् अर्थे व्ययीभावः। अनुपदी गवाम् इति। पदापेक्षया षष्ठी। गोपदात् पश्चाद् अन्वेषणं च गवाम् एव। तेन हिरण्याद्यन्वेषणे न भवति। तिहरदन्नः। साक्षाद् द्रष्टरि। साक्षात् इत्यव्ययं। प्रत्येति वद् अनुकरणम् इति स्वार्थं चन्यालुक्। साक्षीति। अव्ययानां भमात्रे टिलोपः। क्षेत्रियच्। परक्षेत्र शब्दात् सप्तम्यंतात् घ

म.र.त.

१९६

196

त२

परशब्दस्यान्तो पश्च निपात्यते। क्षेत्रियो व्याधिरिति। किंचास्मिन्नियं विषयं यत् परशरीरे संक्रमय्य चिकित्स्यते। अपि च। क्षेत्रि
याणि तृणानि। यानि क्षेत्रे जातानि तानि निचिकित्स्यानि नाशयितव्यानि। किं च। क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रं तत्र चि
कित्स्यः निग्रहीतव्यः। सर्वं चैतत् करे स्थितं। इंद्रियमिंद्र। इंद्रशब्द्य इंद्रेण दृष्टं ज्ञातं मम चक्षुर्मम श्रोत्रमित्यादि क्र
मेणास्य च मदृष्टद्वारा। जुष्टं प्रीणितं सेवितं वा दत्तं यथायथं विषयेभ्यः। तदस्यास्त्यस्मिन्निति मतुप्। अस्तीति पुरुष
वचने अविवक्षिते। कालस्तु विवक्षित एव। इति शब्दो विषयविशेषलाभार्थः। तथा हि। भूमनिंदाप्रशंसासु नित्ययोगे
तिशायने। संसर्गेस्ति विवक्षायां भवंति मतुबादयः। अस्ति विवक्षायां ये मतुबादयो [illegible] विधीयंते। ते भूमादिषु
विषयेषु भवंतीति वार्तिकार्थः। भूमा बहुत्वं तच्चापेक्षिकं। यस्य हि यावद् उचितं तावदेव स्वशब्देनाभिधीयते। यथा पंचभि
रपि गोभिः स्वदत्तस्य बहुगोगाव इति व्यवहारः। राज्ञस्तु सहस्रगोरपि गावो ल्पा इति गोमान्। [illegible] यवमान्। इह य
वमतीभिरद्भिर्यूपं प्रोक्षतीत्यादौ जातिमात्रसंबंधस्य विवक्षितत्वात्। भूमाभावे पि मतुप्। भूमादिग्रहणं हि प्रायेण भू
मादयो भिधीयंते इत्येवंपरं। निंदायां ककुदावर्त्तिनी कन्या। प्रशंसायां रूपवान्। नित्ययोगे। क्षीरिणो वृक्षाः। अति
शायने। उदरिणी कन्या। संसर्गे। दंडी। संसर्गः संयोगः। तेन संयुक्तो दंड एवोच्यते। न तु गृहावस्थितदंडो पि। गुणवच
नेभ्य इति। गुणे तद्वति च प्रसिद्धाः शुक्लादय एव गृह्यंते न तु रूपादयो पि। मादुपधायाः। मच अश्च मं। समाहारे द्वंद्वः। तेन
मतुबाक्षिप्तं प्रातिपदिकं विशेष्यते। तदाह। मवर्णावर्णांतादिति। उपधाभूताच्चेति वाक्यांतरं। उपधाभूतान्मात्पर
स्य मतोरित्यर्थः। येन नाव्यवधानन्यायेनात्राव्यवहिते पि भवति। एवमक्षरार्थे [illegible] स्थिते फलितमाह मवर्णाव
र्णोपधादिति। झयः। इदमपि आक्षिप्तस्य प्रातिपदिकस्य विशेषणं तदाह। झयंतादिति। यत्तु केचिद्बहुव्रीहिं ब्रुवानिस्या

शिवः

४१

ता३

दिषु युञ्जते तस्मा मादिकमेव। मत्वेतान्मतुपो निषेधात्। अपदांतेऽडत्वायोगाच्च। प्राणिस्थादातो लजन्यतरस्यां। शिख
वान्दीप इति। प्रत्युदाहरणं दिशि यं दर्शितं। शिखाशब्दस्य ब्रीह्यादिषु पाठेन लचो प्रसंगात्। चूडावान् दृष्ट इति तु प्र
त्युदाहरणं। प्राण्यंगादेवेति। एतच्चेतिकरणानुवृत्त्या लभ्यते। सिध्मादिभ्यश्च॥ अत्र वार्त्तिकं॥ लजन्यतरस्यामिति समुच्च
य इति। अस्यार्थः। प्राणिस्थादिति सूत्रेण लचि विकल्पपक्षे मतुबिति चूडालः। चूडावानिति रूपद्वयं यद्यपि सिध्यति
तथापि सिध्मादिषु दोषः तत्र सिध्मादेः [illegible] निषाव मांसेत्यादयो येऽदंतास्तेभ्य इनिठनौ स्यातां तत्स्यादन्यत
रस्यां ग्रहणं समुच्चयार्थं निपातानामनेकार्थत्वात्। तेन मतुप् समुच्चीयते तस्येयत्र अकृतित्वात्। अस्ति चेह लिं
गं केशाद्वस्त्यत्रान्यतरस्यां ग्रहणं। तद्धि इनिठनोः प्राप्त्यर्थं अन्यतरस्यां ग्रहणं क्रियते। प्रकृतस्यान्यतरस्यां ग्रह
णस्य समुच्चयार्थतां ज्ञापयतीति स्थितमाकरे॥ लच्चेति। वा शब्दः समुच्चये। वास्याद्विकल्पोपमयोरिवार्थेपि समुच्चय
इति कोशात्। वातेत्यादि। सिध्माद्यन्तर्गणसूत्रं। उड् चेति। डित्वादंतरे [illegible] वातूलः इति। अत्रोदरणं [illegible] चावलादेः लः। स्तुक्तं तु
पिच्छयम्। अत्ययस्वरेणामध्योदात्तप्रसंगात्। गणसूत्रबलेनान्तोदात्तस्येष्टत्वात्। पार्ष्णिधमन्योर्दीर्घश्च। पार्ष्णीलः धमनीलः। हुडजंतपता
पाद्वा। यूकालः। मक्षिकालः। उपतायो रोगः विपादिकाजः इत्यादि। वत्सांसाभ्यां कामबलेति। कामबले [illegible] सूत्रे मत्वर्थीयाच्च प्रत
तौ इति भावः। वत्सलः इति। स्नेहवानित्यर्थः। वृत्तिविषये वत्सशब्दः स्नेहवल्लयोर्वर्तते। यद्यपीह [illegible] एवं सर्वत्र मतुप् समुच्चीयते तथापि
ह नेष्यते मतुब् अनेनेत्यर्थान्तरमेव प्रतीयते वत्सवती गौः अंसवान् दुर्बलः। लोमादिपामादिपिच्छादिभ्यः। इह लोमादि पामादि पिच्छादिभ्य
ति सुवचं। नंदित्य [illegible] पचादिभ्य इति वत्। अंगकल्याणमितिगणसूत्रमर्थतः पठति। अंगादिति। अंगना। पला। ली। [illegible] ह्रस्वत्वं च। महत्को

तद्धक्काकिनं।

कं॥ शाकीं। महत्पलालं पलाली। तद्धर पलालिनं। हरिद्रा तैर्यलोपश्च वाह्ः। दद्रूः तस्मोग विशेषः। तद्वान् दर्दुलः। विषुणा इति। विषुनानां
अंचतीति विषुं चितात्मसंसंतीति विषुणाः। विषुवदाख्यः कालः। तस्य दिनानि गतानि दिनानि संति। दिनांतरात्पुंस्युचिक भा
वस्यतन्मूलकत्वात्तेषां मृत्युः वायुः अव्यवस्थितोचितश्च विषुणशब्दार्थः। इत्यध्निकेलेयणो देशः। ऊन्तरपूर्वलोपः स्याल्लत
र्हिवलिलोपे विप्लइ इति स्यात्। अलङ्कारमकृत संधेरिति। समर्थानामिति अस्यापवादोयं। प्रज्ञाश्च। प्राज्ञोव्याकरणमि
ति गुणाभूतया क्रियया कर्मत्वेन संबंधः। कृदूणत्वद्धितप्रयोगे षष्ठीनः। कृतपूर्वी कटमिति वत्। प्राज्ञेति। प्रज्ञादि
भ्यश्चेत्यण्णि। ङीपुं भवति इहलुटाण। इदमेवेह प्रज्ञागुणस्य फलमिति भावः। वृत्तेश्चेति वार्तिकं। काशिकाकृता तु
वृत्तिशब्दः सूत्रे प्रक्षिप्तः। विच्छिन्नस्य प्रतिसंधानं तत्र्तिः। तपस्वीति। असंतत्वात्सिद्धे अणो वाधा मा भूदिति वचनं।
सहस्त्रीति। इह इनिनाठनपि वाध्यते। ज्योत्स्ना इति। ज्योत्स्नाः। तामिस्त्रः कृष्णपक्षः। नरकविशेषश्च तमः स
हस्तेतमिस्त्रं। मत्वर्थीयो रः। तत्र घव यवक्षतानि तमां सि विद्यं ते तदस्मिन्नस्तीति रां तादत्। स्त्रियां तु तामिस्री
यत्तमरेखा। तमिस्त्रा तामसी रात्रिर्ज्योत्स्नी चंद्रिकयान्विते ति। नचरात्मं न वर्णा तपि तिन विशेषः। सिकता
। देशो विशेषस्य वक्ष्यमाणत्वादाह। घटउ इति। अत्रसत्त्वं द्वयस्याद्वैरयामसरः संज्ञयाह। स्त्री शर्करा शार्करिकः
शार्करः शर्करावति। देशएवाद्भिधावेव सुनेयाः। सिकतावति इति। दंतउन्नते। कर्यंत्रणोदंतुरांतरे त्याद्य
स्तु प्रयोगाः। लाक्षाणिकाः। ऊर्णा सुंषि। समाहारद्वंद्वे सोत्रं पुंस्त्वं। ऊर्णा इ रिणा पांसवः। ललाटविच्छिद्रं। खरइति। म
हत्कंठविवरं खंतद्वानित्यर्थः। गर्द भेरू ठोयं। नगरमिति। नगा वृक्षाः पर्वताश्च। ज्ञातिशब्दोयं। तथा च नग
री त्यत्र ज्ञातिलक्षणो ङीष् भवति। पांडुर इति। पांडुः शुक्लो वर्णस्तद्वान्। अव्युत्पन्न एवेति। गुणमात्रे गुणि

२५

शिवः
४२

ति

निचवर्त्तते हरिणः पांडुरित्यमरः। गुणोक्तशुक्लादयः पुंसि गुणि लिंगास्तु तद्वतीत्युक्तेश्च। कद्रुः कद्रूरश्वरेण विशेषः। सुदुन्याम्भः। घु
कौमइति। द्यौरस्यास्ति दिव उदित्युक्तं। केचित्तु युशब्दं मव्युत्पन्नं प्रातिपदिकमुत्का उकारांत मक्षो नामधेयमाहुः। कुर्वृक्षः सोस्या
स्ति जनकं नयेति सोपि वृक्ष एव। पलाशो द्रुमद्रुमागमाइत्यमरः। रूढिशब्दे मतुब्लोपे लौकिकल्पनेन तदर्थस्य मलुपाविधातुमशक्य
त्वात्। हृस्यलतरइति। वप्रत्ययोनुवर्त्तते। अर्णसिवद्रुति। अर्णोजलं। अर्तेरसुन्नुट्‌ चायणेति। सूत्रे सांहितिकोयणः। नन्तु रव्यत्यादि
तिवत्। छंदेन यणादेशस्यानुकरणं। तस्य यणोऽवात्तिदितिभावः। प्रयुज्यते चोभयथा। अधिरोहति गांडिवं महेषाविति। गा
ण्डीवी कनक शिला निभं भुजाभ्यामिति च। आसुनीवल इति। घुम्नुअभिषवे क्विन्। आसुनिरभिषवः। पिरिषद्बलइति। प
रिनः सीदं तिपरिषत्। सत्सद्विषेति। क्विप्। सदिरप्रतेः इति षत्वं। पार्थानराम इति। पृशृभसो दिरित्यादि प्रत्ययो बाहुलकात्
घरपि भवति। तथा च भाष्यं। पार्थं दरुणति रेत्ति चमवतां सर्वं। वेद पार्थं इंशनस्त्वमि तिच। पर्युञ्जते मपर्षदेवाक्ष्णवरोमि
पर्षद्वलास्म घ्ना ब्रुवैरांटनेकटिका प्रमता निति मर्हि। समज्याबरिषत्सर्ष दिति चंद्रकोशः। भ्रातृवल इति। वलेदुतिस्त्र
त्रेऽणइत्यनुवृत्ते नैरुदीर्घः। पुत्रवलादेस्तु स्यात्तचाह। संज्ञायामित्यनुवृत्तेरिति। वर्नगियोरिति स्त्रत्वादितिभावः। रज्यो
त्स्ना। चंद्रप्रभा तत्रावयवी भूतं ज्योतिरस्मी तिमत्वर्थीयोप पत्तिः। एतेन तमः सम्भूतेत्नमिस्त्राशद्वोव्याख्यातः। कथं तर्हि
तमिस्त्रं तिमिरं तमः इत्यमरः। समूहसमूहिनोरभेदोपचारात्। स्त्रीत्वमिति। व्याख्यानमत्रशरणं। ऊर्जस्विन्। ऊर्जोमि
त्यत्रनांतत्वाभिव्यक्तयेनलोपो न कृतः। मधि। तः। तुंदादिभ्य इलच्च मतुपेति। अन्यतरस्यामित्यनुवृत्तेः। अत्र स्यां गाढच
निष्पच्यते। विवृद्ध्युपाधिकार्थ्योगवाचिनः इलजादयः स्युः। विवृद्धौ कर्णाविस्य कर्णिलः। कर्णिकः। कर्णवान्। एकगोपूर्वा
त्। एकशतिकः। एकं च तत्‌ शतं चेति पूर्वकालेत्यादिना कर्मधारयः। मत्वीलब्रूषात्‌ बहुव्रीहेर्ढञ्च चनभिधा
नात्। अलइत्येव नेह। एकविंशतिरस्यास्तीति। यच्चवर्णं वल्कं गोमदिदं नगरमिति नतु वताम्मत्वर्थीयोल्लुप्यते इति

भाष्यमनुपादाय केयटो व्याख्यत् । एकगोपूर्वादिति ठञो लुगिति भाष्यकारकारवचनालोपः ॥ अत इति चानिष्टं गोत्रिकादिति
प्रयोगं वांसम्मतो गोत्रासास्मिन्नस्ति गोत्रिकमिति तन्न भाष्यासिद्धाय वर्णनमात्रं न तु नाष्ट्रिकं । अन्यथा एकवि
शतिः एकचत्वारिंशद्वास्यास्तीत्यत्रातिप्रसंगवारणाय गौरवात् । अत एवापरितोषेणापक्षान्तरमाह अथवेति । अ
स्मिन्नपक्षे गोत्रिकमित्यनभिमतं लक्ष्यते अभिमतत्वे तु भातिस्याद्यत इत्यतो मण्डूकप्लुत्या अत इत्यनुवर्त्यं समन्व
येमं । नित्यग्रहणं मतुपो बाधनार्थं । कथमेकद्रव्यवानिति । असाधुरेवायं । एकेन द्रव्यवानिति विग्रहीतव्यं । कथ
मेकद्रव्यवानिति दर्शितः । एकदेशिनेकाधिकरणे इति निर्देशो ज्ञापयति । इनिरपि क्वचिद्भवतीति । रूपादाहत ।
आहतप्रशंसाविशिष्टेर्थे वर्त्तमानात् रूपशब्दान्मत्वर्थे यप्स्यात् । आहतमिति । आहननमाहतं ताडनमित्यर्थः ॥ तत्त
निष्पन्नं यत्तत्कर्षापणादिरूपं तदपि कार्यकारणोपचारात् आहतमित्युच्यते इति न्यासकारः ॥ हिम्याइति । गुणिय
पाणुणाइति । इष्टिग्रहणादिनिरपि । तथा च माघः ॥ गुण्यगुणाय इति न व्यञ्जीगणत् । अस्माया । यशस्वीति । नसो
मत्वर्थे इति भत्वत्वं न । यशस्वानिति । पूर्वेणानित्यग्रहणेन तत्रासंबद्धमप्यनन्तरस्याग्रहणं मतुप्समुच्चया
र्थमिह संबध्यत एव । तसौ मत्वर्थे इति सूत्रे यशस्वी यशस्वानिति भाष्योदाहरणादिति भावः ॥ किं तत्त्वा
दिति । यत्तु प्राचो रंचोः कुरिति मल्ल । तदपवादतया अस्येति प्रायपन्नेरिति भावः । यदि तु कश्चेति षत्वं स्यादि
यज्ञ्योः पदं तेषु किम्प्रत्ययस्येति कुत्वापवाद इति निष्कर्षो गृह्यते तदा त्विगादिसूत्रेणापदान्तविषये कुत्वनि
पातनादिति वोध्यं । हृदयाच्चालुः । अन्यतरस्यां ग्रहणादिति ठञो भाष्यार्थो चकारस्य ... संज्ञा एवमन्यत्रापीति
हरदत्तः । तेन हृदयालुशब्दो दन्त्यः । शीतोष्णेति । इह चालुरनुवर्त्तते । यत्तु प्राचो ... लुजिति चा
नुवर्त्तते लक्षभयमप्यानाकरत्वादुपेक्ष्यं । पुरोऽग्रशब्द इति । तत्पाठरुच्यचसंज्ञितमतं स्य भाष्येऽनुदाहरणादित्युक्तिः

शिवः
४३

मृधोरुतिरिसुतिप्रयांनतारं

चनथाख्यातंवाहिनिमावः।माधवइति।स्तुत्यान्तुष्टोस्थितामिदं।इमाद्वेति।एकारादिरयंप्रत्ययः।यत्नादिति।
सिध्यादिषुमतर्थेवानूलवलूलगाश्वोप्रकारांतरेणाम्बुदितो।तथ्यर्वमरुद्भ्यां।पितमनुदात्तार्थं।हस्वुदात्तस्तुतन्त्रिति
पठित्वाआद्युदात्तत्वार्थमिकारइत्याहुः।तच्चिंत्यं।मरुतशब्दस्यमध्योदात्तत्वात्।तथाहिमरुच्छब्दोरोदात्तः।तस्मा
नपिमध्योदात्तत्वंस्पष्टं।ततिकृतिस्वरेणाद्युदात्तःस्यात्।नचेष्टापत्तिः।अपसिद्धांतात्।स्यादेतत्।मरुतः
परिवेषारोमरुतस्यावसन्नोहइत्येतरेयब्राह्मणप्रयोगस्तावदाद्युदात्तकेकोस्वरांशेतूपसीनः।एकश्रुसा
पाठान्नतत्कथमवभिमतस्वरावधारणमितिचेत्।प्रथमाध्यायस्याकरणांथेमुएवेत्यर्थे।हि।उपसर्गसंज्ञा
यांहिमरुच्छब्दस्योपसंख्यानंपठ्यते।तत्रयद्यप्यधिकारबलान्निपातसंज्ञाप्राप्तालभ्यापितस्यानिषातेस्व
यांहितस्यांनिपातात्राद्युदात्ताइतिफिट्स्वरःस्यात्।सचमरुतशब्देपिच्छ्यतत्तलीयाकर्वणीतिपूर्व
पदप्रकृतिःस्वरःस्यात्।किंच।निपातत्वेसत्यव्ययत्वंस्यात्।किंचनिपातत्वेसत्यव्ययत्वंस्यात्।नतूपसर्ग
त्वेप्यड्किविधीकुतोनेतिचेत्।अनभिधानाद्बहुलकाद्वेत्युत्तरं।संज्ञाप्रयोजनंतुनत्वासामर्थ्यादर्जंततत्वाभा
वेपितत्वंस्यादितिचेत्सत्यं।नत्वविधानेनोपसर्गसंज्ञाविवक्षैवंएवंचाड्किविधीअपिनेत्याहुः।परम
तुच्छत्वं।एतच्चसर्वंकैयटहरदत्ताभ्यांस्पष्टीकृतं।तदनंतरंतत्प्रत्ययांततयापिमरुतशब्दस्याद्युदात्त
त्वंकरिष्यतेइतिवदन्नेकेपठःस्पष्टमाह।यत्तुमत्वर्थीयप्रकरणेहरदत्तआह।मरुत्त्वएतंदेयास्तुमरुत्वंत
इतिस्युसत्त्वाभावपितत्तीयाकर्णीतिपूर्वपदप्रकृतिस्वरोभवन्नाद्युदात्तएवभवति।उपसर्गाश्चाभिवर्ज
मितिसूत्रादितितदतिरभसात्।यतःप्रथमशेषस्वयमेवाह।नतूपसर्गसंज्ञायामपिउपसर्गाश्चाभिवर्ज

म.र.त.
१९९
199

मित्याद्युदात्तत्वं स्यात्तद्देवनानेनापूर्वमाद्युदात्तत्वं स्यादेव द्वितीयन्तोः किं तर्हि निपातनादित्येव सिद्धे ऽनेः प्रतिषेधार्थमिति तदि
ति। तस्मात्तनोतिर्नित्यं स्त्रीकृत्यपं चमिकोहरदत्तग्रंथः प्राचीनग्रंथविरुद्धोपसिद्धान्तग्रस्तश्चेति स्थितं। एतेन न
नोनुकार आद्युदात्त इति प्राचीनग्रंथं व्याचक्षाणेन नानुक्तिरपि प्रत्युक्ता। इदं तत्त्वं बोध्यं। उकारीत्या उपसर्गाच्छ्वाभि
वर्जमिति फिट्सूत्रं स्तुत्यलं। नाभिरित्येव स्तुवचं। अतिनिष्कर्षे तु नाभिरित्यपि मास्तु एवादिषु अभः स्तु पठित्वा
एवादीनामंत इति फिट्सूत्रे एवमादीनामिति पाठान्तरं। तदेतत्सर्वमाधवेनत्रं भाष्ये ध्वनितं। तथा
।आत्वेनानिषिद्धे तेति मंत्रे उपसर्गाच्छ्वाभि वर्जमिति वचनमातिपदिकांतोदात्तत्वमिति प्रकामानोपत्तोऽ
भिद्रुहन्निति मंत्रे एवमादीनामंत इत्युपन्यास्यते। अलंप्रसक्तानुसक्तेन। अकुलमनुसरामः। स्वामिन्नैश्व
र्ये। ऐश्वर्यवाचकादिति शब्दस्य ऐश्वर्यवाचित्वं एतद्वृत्तिविषयकमेव बोध्यं। कंशंभ्यां। अत्र प्रथमप्रत्यये दंतो
ष्ठ्यादिः नतु पवर्गीयादिः। तदाह अनुनासिको वयाविति। तुंदिवलिवटेर्भः। मद्धैन्त्योपध इति। तथाच तुडितो
डने इति धातोर्माधवेनोक्तं। तुंदिः इन् प्रत्ययान्तो नाभिः सास्यास्तीति तुंदिलः। तुंदादिभ्य इलच्चेत्यत्र स्वांगाद्विवृद्धौ च
ति गणसूत्रेणेलच्। तुंदिल एव तुंदिभः। तुंदिवलिवटेर्भ इति मत्वर्थीयो भ इति। वलिभ इति। वटवेष्टने
।इन्।। ।।इति मत्वर्थीयाः।। ।।एतदोन्। भाष्यारूढोयं पाठः। वृत्तिकारस्तु एतदोऽश् इति पठित्वा शकारः स
र्वादेशार्थ इत्याह। क्षाम्यामिति। सर्वनाम्नः साप्तमिकस्त्रल्। अखादिभ्य इति पर्युदासाश्रयणात्। एतेन तनमत्तो
परं वक्ष्यमाणादित्यत्र तसिलं तत्क्रमेण युष्मदस्मदोरनादेश इत्यात्वमाशंक्य सार्वविभक्तिकस्तसिरिति परिहृत्य
तसश्चेति तस्य तसिलादेशे पुनः शेषे लोपमाशंक्य स्तु विभक्तावेव सहश्यते स्थोस्मे क्षयेव समाधानांतरं
दुर्घटवृत्तिकारः परास्तः। पर्युदासविषयतयाऽकृतासिल्प्रत्ययस्य तसिलादेशस्य चोक्तिसंभवात्। सप्त

शिवः
५४

भावा१

म्यास्तु लुः इह त्रतसिलोस्त्यं त्रौ प्रत्ययो न तु सप्तमीपंचम्योरादेशौ तेन कुत्र बहुत्र कुतः बहुतः इत्यादावव्ययं घेः घोः ङिती
त्यादिकं नेत्यर्थः। लिदिकु। न तु तसिलोपायैवाद्यः काशः कुतो वशीयते कुतो वरोहतीत्यादौ। तसेस्तु ग्रामत आगच्छती
त्यादिरवकाशः। कुत आगच्छतीत्यादावुभयप्रसंगे परत्वात्तसिः। तस्याविभक्तित्वाभावात्तु विभक्तिकार्यालिङ्गस्
रितिचेन्नैवं। तसश्चेति सूत्रेण अद्यादिभ्यः किमादिभ्यः परस्य तसेस्तसिलादेशविधानात्। तस्य च विभक्तित्वा
त्। किमात्। न विभक्तौ तुस्मा इति निर्देशप्रवर्त्तितयमो रूकारणं मकारपरित्राणार्थेनानित्यत्वज्ञापनात्। वागत
ण्णिति किमो देति सूत्रं पठितव्यं ततः धवचश्कंस्सीति। यद्यपि भागवृत्तिकारो भाषायां त्रलं नेच्छति वामनस्याप्य
त्रैव स्वरसः तथापि वामनो कमेकदेशिमतमेव हि पुरस्कृतं बहुप्रयोगदर्शनात्। तथा चामरः। सा तु च यत्र
कुत्रचित्। श्रीहर्षोपि नान्यत्र कुत्रापि च साभिलाषमिति। वाहृच छंदसि। पूर्वोक्तस्य वाग्रहणापकर्षस्य स्फु
टीकरणार्थं निर्देमुपन्यस्तं। अथुना प्रत्यय इति। निपातनादन्यद्यो दात्तो यं। भाष्यमतं चेदं। वृत्तिकारस्त्वाह। इद
मोऽर्थ भावः थुना च प्रत्ययः इति। सद्यः परुत्। अरुत्। नीतिसप्तम्यंतस्याहन्शब्दस्यार्थे इत्यर्थः। तद्दर्शयति। समाने
ह्नि सद्य इति। प्रकारवचने थाल्। सामान्यस्य भेदको विशेषः प्रकारः। यद्यपि प्रकारे गुणवचनस्येत्यत्र सादृ
श्यं प्रकारः तथापि नेह सादृश्यं गृह्यते अनभिधानात्। तेन प्रकारेण तथेति। प्रथमांतात्तु न भवति स प्रकारस्त
थेति। अनभिधानादिति भावः। किंसर्वनामबहुभ्यो विशेषविहितेनापि थाला जातीयर् न बाध्यते अर्थभेदात्। प्र
कारे हि थाल्। जातीयर् तु तद्वति स्वभावात्। अत एव भाष्ये उक्तं तथाजातीयोऽन्यथाजातीय इति। इदमस्थमुः
अनेन एतेन वेति। द्वितीयांतादपि थमुर्न वत्येव इमं मे तं वा प्रकारमापन्न इत्यर्थे। ततः तथा च सोत्रो व्यवहारः
लक्षणेत्थंभूताख्यानेत्यादि। एतेन कथंभूतोपाख्यानः॥ ॥इति प्राग्दिशीयानां पूर्णोवधिः॥ ॥पुरः पुर

स्तादिति। अथ कथं पश्यामि तावन्निलइत्तः पृतरस्य वपश्वादिति भवभूतिः। नीरसस्तरुरिह विलसति पुर
त इति कश्चित्। स्यात्पुरः पुरस्तोग्रत इति। पुरतः प्रथमेयत इति विश्वः। चिंत्यमेतदिति भाषावृत्तिः। कश्चित्तु विभाषापरावराभ्यामिति
विभाषाग्रहणं योगाद्विभज्यते तेन पूर्वशब्दादस्तु च अस्तातिश्चेति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात्पुरादेश इत्युपेक्षित
व्यं। तन्निर्मूलं। पुरस्तादिति तु समानकालीनं पूर्वकालीनं पूर्वकालीनमितिवत् प्रामादिकमेवेति प्रामाणिकाः। संख्याया विभार्थे धा।
विधाग्रहणं स्वार्थो विधार्थः। यद्यप्यादनपिंडापि विधाशब्दो नोच्यते तथापीह न गृह्यते तेनैकागो विधेत्यादौ न भवति। इहहि विधाया
मिति वक्तव्ये अर्थग्रहणस्येदं प्रयोजनं विधाशब्दपर्यायार्थे प्रसिद्धतरः तत्रैव यथा स्यात्। तारशब्दार्थः प्रकार एव। स च क्रियाविष
यक एव गृह्यते अनभिधानस्वभावात् तदाह। क्रियाप्रकारे वर्तमानादिति। कथं तर्हि नवधा द्रव्यं तेषां गुणाश्च त्यादि। अत्रापि क्रि
यादिस्पष्टत्वं निवाभवतीति वा क्रियाबोध्येत्याहुः। याप्यपाशप्। कुत्सित इत्यत्रैव नायं विहितः। निकृष्टात्पिप्रसंगात्। पूरणाद्भागे। पूर
णार्थवात्तीयप्रत्ययः पूरणशब्देनोक्तः। पूरणग्रहणं चेतरार्थमनुवर्तते। यः पार्श्वतीयश्च इत्यत्र तु अनर्थकत्वादेव न भविष्यति। भाग इ
ति पुंस्त्वं विवक्षितं। तेन समानेऽप्यर्थे विभक्तो विवक्षितायां चतुर्थीपंचमीत्येव भवति। अविवक्षिते तु चतुर्थीपंचमा इत्येव प्रसज्ये
त। भूतपूर्वे चरट्। गोभूतवत्त्वमित्यत्रैव तुनोक्तं विशेषविहितेन रचाऽबरलोवाधामाभूत्तन्निधौ हि सामान्यविशेषभावः स्पष्टो न भव
ति। यद्यपि इहरस्यस्यापि बाधो नास्त्येव तथापीह गोरवंस्त्री कल्पड्रेणपाठसामर्थ्याद्बाधो नेति भावः। षष्ठ्या रूप्य च। भूतपूर्व इत्य
नुवर्तते तेन च यद्यपि पूर्वं छत्यनुवर्तते तेत्र प्रातिपदिकस्य विशेषणं तथापीह न षष्ठ्यन्तार्थस्य विशेषणत्वात् तदाश्रितस्य
संबंधिनः प्राधान्यात् प्रधानेतरसन्निधौ प्रधाने कार्यसंप्रत्यय इति न्यायात् तदेतदाह। भूतपूर्वे षष्ठीरूप्यः स्यादिति। अतिशायने
तमबिष्ठनौ। अतिपूर्वाच्छेतेर्ल्युट्। अतिशायनमेवातिशायनं अस्मादेव निर्देशाद्दीर्घः। ननु सौत्रः तेन लोकेऽपि दीर्घः साधुः। अत्रा
कान्यपि निपातनानि भवंति। तेन रूक्षोऽपि साधुः। यद्यपि केवलः शेतिः स्वनेवर्तते तथाप्यतिपूर्वः प्रकर्षे। प्रकर्षश्चात्र नाधिकांकि
वभिभवः सकर्मकोयं। पूर्वान्महाभागा यातिशेरते इति दर्शनात्। अतिशायश्च न प्रत्ययार्थः। तथाहि सति लघुरतिशायनं लघु
नमिति स्यात्। प्रत्ययार्थस्य प्राधान्यात्। नापि प्रकृत्यर्थः। तथा सति हि प्रकर्षातिशयादिन्य एव स्यान्न तु पक्षादेः। किं तु प्रकृत्यर्थ

विशेषणं। प्रत्ययस्तु द्योतकः। तदेतदाह। अतिशयविशिष्टेत्यादि। अवयवे समुदाये यदा एकस्यातिशयो विवक्ष्यते तदा तरबीयसुन
वपवादो वक्ष्यते। परिशेषाद्बहूनां मध्ये एकदेशस्य निर्धारणं सोऽस्य विषयः। नवाह। अयमेषामतिशयेति। आढ्यतम इति। सुबंतात्त
मप्। सुपो धात्विति लुक्। यद्यपि प्रातिपदिकात्तद्धित इति वृत्तिकारस्वरः प्रतीयते तथापि तदीयग्रंथः सुबंतपरतया व्याख्यातो ततः। अ
न्यथा हि पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ घकालतनेषु कालनाम्न इति सप्तम्या अलुग्विधानं बाध्येत। उक्तं च भाष्ये। प्रियकुत्स
नतः नादिषु प्रवर्तते सोऽविभक्त्यंत इति। तिङश्च। तमप्याद्दिति। इष्टन्तु नोक्तः। अजादी गुणवचनादेवेति नियमात्। तरप्तमपौ घः। अ
तिशायनिकप्रकरणे एवतादृशः। घः। पिलो घ इति वा वाच्ये अकार्यान्तरेण गुरुसूत्रकरणं अत्वं न स्वार्थिकस्यापि तरपो ज्ञापकं तेन नाल्या
रं लोपश्च बलवत्तरं कृत्यादि सिद्धं। केचित्तु योगापेक्षं ज्ञापकमित्याश्रित्य ईयसुन्प्रत्ययस्यापि क्वचिदत्वं तस्वार्थिकत्वमाहुः। किमेत्।
आम्रेरुकाद्योयदित्यस्येतत्तर्हि पचतितरामित्यादौ ह्रस्वनद्याप इति नुट् स्यात्। यस्य तिलोपस्य परत्वान्नुटो बाधात्। सिद्धांते त्वानु
बंधपरिभाषया नुड्विधौ नास्य ग्रहणं। द्विवचनविभ। द्वयोरर्थयोर्वचनं द्विवचनं करणे ल्युट्। कर्मण्यण्। षष्ठ्याः समासः। येन पदद्वा
वर्थावुच्येते तद्द्विवचनं विभक्तव्यं विभज्यं अरहको ण्यत्। दिति ण्यति प्राप्ते तदपवादाय न्निपात्यते। तेन विभाग्यमिति न भवति। वि
भाज्यशब्दस्य कुस्मितिषु प्रयुक्तस्य साधुत्वं चिंत्यमिति हरदत्तः। अत्रेयं चिंता। यद्यपि ण्यत एव कुत्स्नैः निपातनेन बाधात् न च निपा
तनान्यबाधकानीति पक्षमाश्रित्य निर्वाहः। कीर्तिशेषं कथः। ण्यति सति कुत्वस्य दुर्वारत्वात्। तथापि ण्यंतादचो यदिति विभाज्य इति सि
द्धं न चार्थभेदः। नित्यं प्रेषणे आकुलत्वेति डिति ण्यन्तावित्ति सूत्रे बुसादनादिति दिक्। द्विवचनं च तद्विभज्यं चेति द्वंद्वः। प
स्योपपदेन कर्मधारयः। तेन द्व्यर्थवाचके न विभजनीये चोपपदे सतीत्यक्षरार्थः। अन्वर्थं चोपपदं रूपो वारितं पदमिति लिंगस्थि
मतद्धितविधौ तस्यासंभवात्। तच्च विग्रहवाक्य एव प्रयुज्यते। हेतोलुगतार्थवान्नावश्यकं। एवं स्थिते रुपपदस्य ग्रहणं सार्थं।
रहेतुपपदे द्वे च प्रकृतौ स्तुप्तिङन्ते प्रत्ययो चद्योतनयापि यथासंख्यं नेष्यते। द्विवचनोपपदमुदाहरति। अनयोरिति। विभ
ज्योपपदमुदाहरति। प्राच्येभ्य इति। पंचमी विभक्त इति पंचमी। कथं तर्हि पटुरस्मि वानपटुरासी। तन्न देयमस्तु पटुतरमिति। अत्रा
हुः। एकस्यापि धर्मिणो गुणभेदेन भेदाध्यारोपात्। प्रतियोग्यपेक्षः प्रकर्षः। तदाश्रयस्य प्रत्यय इति व्यपदिश्यंति च। अन्यए

वासिसंवृत्तः । कश्चित्स एवासिधनंजयस्त्वमिति । अजादी गुणवचनादेव । इष्टतोऽवधारणार्थ एवकारः । तुभ्यं दस्मि । पूर्वेण नियमेन वा
वर्जितयोः प्रतिप्रसवोऽयं न त्वपूर्वो विधिः । तेनोपाधिसंकरो न । दोहीयसीति । इयमनयोरतिशयेन दोग्ध्री । भस्याढे तद्धिते न
सिद्धस्य प्रत्ययविधाविव चेन्नाऽदीपिनि वृत्ते दोग्धृशब्दात्प्रत्ययः । न तस्ताचिनिवृत्तेषु वतुन्शब्दयोरपि न वृत्तिः । अलौकिके वा
क्यप्रागेव तयोः प्रवृत्तिरिति तुल्यत्वं गुणस्तु प्रवर्तते तत्र लिङ्गे चि प्रत्ययलक्षणाऽभावात् । छांदसमपि तु रितिसूत्रेण विधे
यवदित्यातिदेशेन लोके रूपयाख्यमाणत्वादिति पन्यस्तो प्रशस्यस्य श्रः । अजादी इत्यनुवृत्तं समभ्यां विपरिणम्यते इत्याह भ
आद्योरिति । ज्यादादीयसः । ज्यादुत्तरस्य ईयसुन आकारादेशः स्यात् । रभ्रस्य च । स्वरूपस्य ग्रहणं न तु वचित्रियर्स्यौ चामादिरिति प
रिभाषितस्य व्याख्यानात् । अस्य प्रियस्थिरेति षष्ठदिमोऽपि पक्षे भवति । न चलस्येमनि चिस्राव काशतानादिशाख्यादिम
निचोभावात् । एवं चेह्रेव वृद्धस्य वर्षिष्ठेति सूत्रयितुमनुचितं । एवं हि द्विर्वृद्धिग्रहणं न कर्तव्यमिति महदेव लाघवं । स्थूलदू
र । परयणादियविप्रक्षिप्र इत्यत्र पूर्वयणादेर्लोपो माभूदिति । पूर्वग्रहणं तु स्पष्टार्थं । परस्मिंस्तु तत्सामर्थ्यात्पूर्वस्यैव गुण
लाभात् । स्थविरइति । अत्र ओर्गुण इत्येव सिद्धे तत्किं गुणवचनेनेति चेन्नैवं । परयणादिलोपस्याभीयत्वेनासिद्धत्वात् । चि
प्रओरभावात् । क्षुद्रेत्यत्वाभावाच्च । इष्टस्य यिट् । पूर्वसूत्रं संपूर्णमनुवर्त्यते तदा एव हो रित्यादिभ्य रादेशस्त्वेत्यपि ड
ष्ठवं । आत्रआदिलोपे कृते पिशब्द आगमः । यद्वा । लोपापवादो यकार आगमः । इकारस्तूच्चारणार्थः । प सद्वयमपीदं भाष्ये
स्थितं । युवाल्पयोः । युवेति स्वरूपग्रहणं न तु युवापत्यस्य । विन्मतोर्लुक् । स्त्रजिष्ठ इति । विनोर्लुकि कृते भवात्पदकार्यामिति
स्युः भावः । अस्मादेव ज्ञापकाद् विन्मतोरजादौ । प्रशंसायां रूपप् । प्रकृत्यर्थस्य परिपूर्णतेह प्रशंसा न तु स्तुतिः । तेन रूपि
नवाति । चोररूपो यायदस्यणारण्यं जनं हरति । गुणवस्य पहरेणेन चौर्यं परिपूर्यते । पचतिरूपमिति । क्रियाप्रधानत्वा
ख्यातं क्रियायाश्चासत्वरूपत्वेऽपि एकवचनं भवति औत्सर्गिकत्वात् । तेन पचतोरूपं पचन्तिरूपं इत्यादि । रूपप्रत्ययान्ते
वधितत्कां तु राणामप्राप्तेरित्याहुः । पश्य त्यादिप्रयोगे कर्मणि द्वितीयाप्यस्तीति तत्वं । क्लीबत्वं लोकात् । एवं पचतिकल्प
मित्यादावपि बोध्यं । विभाषासुपः । सूत्रे सुप इति षष्ठ्यन्तं षष्ठ्यन्तसमर्थप्रत्ययेन लुक् । सुबन्तादिति । प्रागित्यपकृष्यते

ननु

शिवः
५६

तत्र यद्यपि सौत्रस्य पुरस्तादुक्तस्य विवरणं तत्समानार्थं । तथापि तद्योगे षष्ठी न प्रवर्त्तते अव्ययादिति सूत्रे अंचूत्तरपदस्यापि दि
क्शब्दस्य ग्रहणात् सर्वप्रत्ययेनेत्येतत्साधनार्थं पृथग्ग्रहणमिति सिद्धांतयित्वा प्राक्प्रत्ययस्याव्ययात् आदित्युदाहृतत्वात् । काशिका
यां तु प्राचः पुरस्तादुक्तः प्रयुक्तः ॥ अत एव सुबंतादिति तदुक्तिर्हरदत्तेन भंक्त्वा चोभयी ख्याता ॥ ल्यब्लोपे पंचमी । एवं च
तं सुबंतं प्रकृतित्वेन । अित्येत्यर्थः ॥ यत्तु प्राचो ग्रंथव्याचक्षाणेः सुबंतादिति ल्यब्लोपे एषा पंचमीति तन्न प्रमसात् । नित्यं
हरदत्तेन काशिकायां त्कानीत्येवं सर्वत्र यानेयांवेषम्यस्य स्फुटत्वात् । प्रागेवेति । अत्र तु शब्दोऽवधारणे वर्त्तते इति
भावः ॥ तेन बहुजेव विकल्प्यते न तु पूर्वं । अन्यथा प्राक्के विकल्प्येत न चाच पक्षे बहुच्चरः स्यात् । भाष्यकारस्त्वाह । तु श
ब्दस्य नेदं फलं तथाहि । उदभिलोन्यतरस्यामित्यादौ प्रत्ययएव विकल्प्यते प्रधानत्वात् । न तु परत्वं गुणत्वात् । गुणानां
च परार्थत्वादसंबंधः इति न्यायात् । तद्वदिहापि विभाषाग्रहणेन बहुजेव संबध्यते न पुरस्तादित्यितन्न किं तु अवधारणा
र्थस्य तु शब्दस्येहान्यदेव पुरस्तादेव सर्वं यथा स्यात् । तेन लिंगसंख्ये अपि प्राक्प्रत्यययोः प्रकृत्यवस्थायामेव दृष्टान्ते
वस्तः प्रयोगस्य प्राक्प्रत्यययोर्यत्तेः सुलेरिति । तेन बहुगुडो द्राक्षा । लघु बहुकुल्लेणोनरः इत्यादौ न विशेष्यनिघ्नता
न तु स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्त्तन्ते इत्येव सिद्धमिति चेत्सत्यं । एतदेव ज्ञापयति ईषदसमाप्तौ ये स्वार्थि
कास्तेषु अभिधेयवदेव लिंगवचने स्तः इति । तेन गुडकल्पा द्राक्षा शर्कराकल्पो गुड इत्यादि सिद्धं । यत्तु काशिकायां ब
हुगुडा इति स्त्रीलिंगं पठितं तन्न भाष्यादिकं भाष्यविरोधादिति हरदत्तः ॥ प्रागिवात्कः ॥ सुप इत्यनुवर्त्तते तेन तिङंतानां
न । अव्ययसर्वनाम्नां । तिङश्चेति प्रकृतं नकल्पयेति भावः ॥ प्रातिपदिकात्सुप इति चानुवर्त्तते एव । कस्य चदः ॥ कात्ता
यस्येति । सर्वनामग्रहणं लिङ्गग्रहणं च नेह संबध्यते तयोः कात्तत्वासंभवात् । अधोकं अधोगित्यादौ टिः आसिद्धं क
वां । यद्यपि अधोक्कोलेयं [illegible] लुकि लङि । लिपि अप्रासगितिमवति तथापि यङ्लुकः सार्वत्रिकत्वात् इह
शंलक्ष्यमस्तीति भावः ॥ ओकारसकारेति । अकच्चि घोस्तु पोय्यनुवृत्यासर्वनाम्नाः सुपा च र्विशेषणे नाम न चाराद

अवस्थाप्रसंगे अवस्थाश्रीयते। ओकारसकारेत्यादि। सोके च ब्रह्म पुष्पदन्तस्य मात्र विषयः। तथैव भाष्ये उदाहृतत्वात्। अन्येषां तु वि
शेषेणप्रातिपदिकस्यैव हे। प्रागकथ्य नतु स्त्रुवंतस्य तेन सर्वकेण इमकेन भवकेतं इत्यादि सिध्यति। शीलेकइति। शीलं स्वभा
वो नियमश्च। तूष्णीकइति। केणइति ह्रस्वस्तु न भवति भाष्यकृता दीर्घस्यापाठितत्वात्। संज्ञापूर्वकस्यानित्यत्वात्। कुर्ण
द्वृत्तिकारस्तु नकपीत्यत्र नेतियोगविभागादित्याह। नीतो च तथा स्यात्। कृतं तेधानकाइति। धानाशब्दः स्त्रीलिंगः। तत्ते
कः। केणइति ह्रस्वः। कृत्त्रल्ययान्तत्वाट्टाप्। अत्र प्रत्ययस्थादिती त्वं न भवितव्यं प्रायेण तु धानकाइति पठ्यते तत्रालि
गावृत्तिर्द्दृष्टेति रक्षितः। णच स्त्रियामिति। णेरिति सूत्रे स्त्रीग्रहणेन ज्ञापितं स्वार्थिकाः प्रकृतिलिंगं कचिदतिवर्त्तन्त
पीति। तेनैतस्य पुंस्त्वमिति भावः। घनिलचौ च। चकारात्ययथाप्राप्तमिति काशिका। इहपूर्वसूत्रेणैव सिद्धेऽङ्गित्वेऽपि वावचना
त्कोऽपि। चकारेणानुकस्याप्यनुज्ञेति चिंत्यं। योगविभागफलमपि चिंत्यमिति रक्षितः। गजादौ समाहारद्वंद्वे सोऽत्रं पुंस्त्वं
आदिग्रहणं चिंत्यप्रयोजनं। यस्मिन् विधिस्तदाद्यविप्येव सिद्धं। अस्मिन्प्रकरणे। प्रत्यासत्त्यात योरेवार्थयोर्बुद्धौ सन्निधा
नादिति भावः। सर्वल्लुप्यते इति। एतच्च कृर्थ्य ग्रहणसामर्थ्याल्लभ्यते। अन्यथा स्यादेः परस्येति द्वितीयादचो यः परः त
स्यादेरेव लोपः स्यात्। ननु उग्रहणं व्यर्थं इकादेशे कृते जातिसयेव सिद्धमिति चेन्न। उकोऽद्वितीयकत्वे लतः परस्याष्ठाव
स्था यामेव लोपे ठस्य कादेशार्थं उग्रहणात्। इदं ध्वनयन्नुदाहरति। वायुक इति। किंच। यदाचित्र गुणे प्रभृति न्यप्पच्चुत
दा प्रथमादिकादेशस्यासंभवेनाजादिलक्षणो लोपो न स्यादिति तदर्थमपि उग्रहणं बोध्यं। प्राचामुपादेः। उपेन्द्रदत्त इ
ति। स्यादेतत्। कृतसंधेरुपेंद्रशब्दादेकादेशस्य पूर्वान्तत्वेनग्रहणात् उपादेशिति विधीयमानो प्रत्यया स्तानाम। लोपस्तु न
कारादेरेव स्यात्। तत्रच उपडकउपडइति रूपेन स्यातां। एवं घनिलचैट्चापि दोष एव तस्मादिहे वद्वितीयं संध्यक्षरं चेति
दितिद्वितीयं वार्त्तिकं वक्तुमुचितमिति चेत्सत्यं। प्रकारान्तरेणैव निर्बाधं वा हृस्यं भवान्तो क्तं तथाहि। अकृतव्यूहपरिभा
षया आकृणा पूर्वमेव प्रत्ययः। न च परिनिष्ठितत्वपरेण समर्थग्रहणेन सोऽस्थितिः। वेक्षमाणेरित्यत्र वपरिभाषाबाधः

शंकाः। जातिश्चाइति सूत्रे समर्थग्रहणानि वर्तन्ते इत्युक्तत्वात् धात्वङ्कृ ज्ञापकबलेन समर्थग्रहणप्रत्याख्याने पक्षेऽपि ज्ञापकस्य विशे
षपरत्वादिति दिक्। उपेन्द्रः उपगुरुः उपकर्त्रेत्यादिषु उपपदादीनां पंचानां रूपसाम्येऽपि शकरणादिना विशेषोऽध्यवसेयः। जा ति
गोत्रीरिति। वाचि आशीर्यस्येति विग्रहः। नाचिक इति। यद्यत्र द्वितीयादचः ऊर्ध्वस्य लोपः स्यात् तदा कृतव्युत्पादिभाष
यावाच आह क इति स्थिते यस्येति लोपे तस्य स्थानिवत्त्वेन आकारांतस्य भत्वेऽतं वर्णितोनी विभक्तिमाश्रित्य च कौ
रान्तस्य पदत्वेन कुत्वजश्त्वयोः कृतयोः कृतयोः। वागिक इति स्यात्। उत्तरपदलोपे तु अइकोलादेशत्वेन स्थानिवद्भा
वाभावात्तुल्यौ। पदविधिकयाभसंज्ञया पदसंज्ञा बाध्यते। तत्रापि तद्धितान्त्र यायाः अपवादत्वाद् एव बाधः। विभक्त्याश्रया
लुएक संज्ञाधिकारात् परत्वाद्बाध्यते इति विवेकः। कथमिति। अत्राप्युत्तरपदलोपे जश्त्वं न स्यादिति प्रश्नः। अथ
इति। अत्र सोत्र एव लोपः इष्यते तेन वोपसंख्यानिक इत्यर्थः। वत्सोक्षाश्व। तनुत्वं न्यूनता। सा च प्रवृत्तिनिमित्तस्य
प्रत्यासत्तेः। कञ्चित्तु तत्सहितधर्मान्तराणां। तत्र वत्सः प्रथमवयाः प्रथमस्य न्यूनत्वं नाम वयोल्पत्वम्। तदाह
द्वितीयमिति। तरुणउक्षा तारुण्यस्य तनुत्वं तृतीयवयप्राप्तिः। अश्वेनाश्वायामुत्पन्नो अश्वः। अश्वत्वं च जाति
तात्सहितस्य तु धर्मस्य न्यूनत्वं अन्यपितृकत्वात्। तथा च गर्दभेनयः अश्वायामुत्पन्नो सादितः अश्वतरः।
ऋषभोभारवाहो नन्दशक्तिस्तु ऋषभतरः। किंयत्तद्ः। निर्धार्यमाणं वाचि त्यः प्रत्ययोऽयं अभिधानस्वभावात्
द्वाः। कयोरन्यतरो देवदत्तः। ययोस्तयोरिति। एकस्येति किं। द्वयोरिति कर्मणि षष्ठी मा भूत्। तथा हि साति अस्मि
न्नोपे को देवदत्तयज्ञदत्ता विति अत्रापि स्यात्। वा बहूनां। जातिश्च परिप्रश्नश्चेति समाहारद्वंद्वः। तत्र जाता विति
सर्वेषां विशेषणं। परिप्रश्नग्रहणं तु योग्यताबलात् किम एव विशेषणं। तच्च द्वेपनिवृत्त्यर्थं तत्र जातिग्रह
णं प्रायोभिप्रायं। क्रियागुणसंज्ञाभिरपि निर्धारणे दृतमच्च इष्टत्वात्। तथा च पूर्वसूत्रे द्वयोरिति प्रायोभिप्रायं। ब

कृतां निर्धारणे ऽनयश्च प्रसक्तत्वात्। तथा च वार्त्तिकं। किमादीनां द्विबह्वर्थे प्रत्ययविधानाद्

टः। द्वयोरिति जातिपरिप्रश्न इति च न कर्त्तव्यमिति भावः। इति। यद्येतदा रुप्रत्याख्यानमाकर इति। अत्र केय

ताम ध्यापकः। भरो देवदत्तो वेति सिद्धं भरुणाविभाषयेति। सन्नर्थ प्रथमसमरुणायो प्राग्दिश इति सूत्रे निवृत्त

पि वाग्रहणमनुवर्त्तते सूक्तत्वादिति भावः। एतेन वाग्रहणस्यापि निवृत्तिरिति प्राचोगं यं स्ये व्याचक्षाणानां उपे

तीयतां ध्वनयति। किमोस्मिन्निति। द्वयोरित्यस्य प्रत्याख्यानत्वादिति भावः। इति प्रागिवीयानां पूर्णो वधिः॥

॥ ॥ अश्वक इति। नायं स्वार्थिकः अश्वशब्दाद्यश्चे एव वर्त्तते। कन्प्रत्ययस्तु प्रतिकृतिरूपे सदृशे इत्यके। अन्ये तु गोर्वा हीक

इति वत् अश्वशब्दस्य सादृश्यनिबंधनाद भेदोपचारात् प्रतिकृतौ वर्त्तते कन्प्रत्ययस्वोपचारिके तद्योतक इत्याहुः। प्रतिकृतौ

किं। गोरिव गवयः। तणचर्मकाष्ठादिनिर्मितं प्रति पर्यायं वस्तु प्रतिकृतिः। गवयस्तु नैवं। अश्वसदृशस्येति प्रकृतिप्रत्ययः

समुदायः संज्ञेति बोध्यं। वास्त्वस्वरत्यादि। याः प्रतिमाः प्रतिगृह्य गृहा गृहं भिक्षमाणा अटति ता एवमुच्यन्ते। देवलकाना मि

तनेन तएवाभिक्षवोभिप्रेताः। यास्त्वायतनेषु प्रतिष्ठाप्यन्ते पूज्यन्ते च तासु तु स्यात् एव। पूर्वोत्तरेण तुल्यफलं। अर्चास्तु पूज

नार्थास्तु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिभ्य इति। अर्चासु। शिवः। विष्णुः। चित्रकर्मणि। अ

र्जुनः। दुर्योधनः। ध्वजेषु। कपिः। गरुडः। सिंहः। उहस्तिकानितिः। ईदृशमेव विषयमभिप्रेत्य पठंति॥ रामं सीतां ल

क्ष्मणं जीविका र्थे विक्रीणीते। नेयोरन स्त्रंचाधिगृ धिकू। अस्मिन्नधेयोपशब्दं न वेत्ति य चंप्रजं पंडितं तंचाधिगिधि

गितिद्रव्यं च भयं। कुशाग्रादिवार्थे यतः। समासाच्च तद्विषयात्। इवच्छः। स्यादिति। इवार्थे वृत्तिरिति बोध्यं। पुगा

न्यः इत्यतः प्राक्। इवत्यधिकारात्। शस्त्री श्यामेत्यादेः त्वेक एव इवार्थः सच समासे तद्गते इति छोऽन भवति। का

कतालीय इति। अहत्वस्त्राद्येव ज्ञापकादिवार्थे समासः। सुप्सुपेति वा। उतयथापि विशेष संज्ञा वि नि

र्मु क्तः स च छ प्रत्यय विषय एव। तेन स्वातन्त्र्यं उपाध्यंतर्गतेः योगो विग्रह श्वने त्याकरः। पूगान्म्यः। अग्राम

शिवः

णीपूर्वादिति किं देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः। स एषां ग्रामणीरिति कन्। अत्र समुदायः पूगवचनः। ज्ञानकर्मणोः
ऽन्नेधजीवित्वं ब्रातस्य पूगाद्विशेषः। पार्श्व इति। पर्श्वादियौधेयादिभ्यामणञाविति अञ् न पदवचनः। शस्त्रः। मतोऽपत्ये मञ्जे गधेत्यण्। बहुत्वेन
प्राज्ञत्वाल्लुक्। पुनः संघविवक्षायामनेनाण्। यौधेय इति युध्यते सो युधा। इगुपधेति कः। युधाया अपत्यं द्व्यचइति ढक्
ऽकु। तदन्ता संघविवक्षायामनेनाञ्। आयुधजीवित्वं। किं च। यौधेयस्यांकोलक्षणं वा यौधेयः संयांकलक्षणोलक्ष्म
एवं यौधेयादिषु येऽदन्तास्तेषु सर्वेषु प्रयोजनं नैद्ययस्य सं। यौधेया इति। अञोल्लुक्। अंतोदात्तं। पादस्य शतेस्याः। तद्धि
तार्थ इति समास इति। यद्यपि प्रकृत्युपाधि विशेषीभूतवीक्षा न तथापि पुनो ग्रहत्यत्तिलितद्धितार्थो भवत्येवेति भावः। दोदोपा
दो ददातीति। समर्थ्यणात्रमिदं ददलेरर्थः। ननु परस्वत्वापादनपर्यन्तं तथाप्यहि उत्तरस्य त्वविषयत्वं स्यात्। केचित्तु व्यव
स्त्रजते र्धा लोः प्रयोगे सत्यय उत्तरस्य च स्यप्रत्ययः माङः। दद्व्यवसर्गयोश्च। अत्राप्युदाहरणे तद्धितार्थ इति समासः
स्त्रीलिंगं च तद्धितार्थः। यष्टि। प्रकृत्यर्थ एव तद्धितार्थः। स्वार्थिकत्वाद्वुन्। स्थूलादिभ्यः। प्रकारो भेदः सादृश्यं चो भयत्रा
पि यथा संभवं कन्। चंचत्क इति। चंचति स्खलनकर्मा। चंचन्नेव कः चंचत्कः। एवं बृहत्किशेषो बृहत्कः। यद्वा। अचं
चलं बृहत्वं पिञ्जभा विशेषाद्वं चलितवद्वृहन्ति च मणिविशेषालस्यते सोऽर्थः। अषडक्षीणं। सुरक इति। कुत्स इति ह्रस्वः। कि
न्तकमिति। ईषत्तुच्छिन्नमित्यर्थः। प्रकृतिवाच्यया क्रियया न्कप्रत्ययस्य वाच्यस्य साधनस्य व्याप्तिरत्यंतगतिः सहनाम्नि। न
साम्निवचने। प्रकृत्येवेति। साम्निवचनेनेत्यर्थः। अषडक्षीणं। अविद्यमानान्यक्षीण्यस्मिन्निति बहुव्रीहिः। अक्षिशब्दोऽत्रे
न्द्रियवर्त्तते बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्। मंत्रो मंत्रणं। आशितंगवीनमिति। अश्नातेराङ्पूर्वाद्दाशितः कर्तरि ज्ञापकात्कर्त
रि क्तः। एयं तावत्कर्मणि वा उभयथापि प्रभूतत्वयवसंतर्पणमिति फलितोर्थः। अलंपुरुषीणः। अतिसङ्गलादिः। ईश्वराधीन इति। आधि
शब्दः शौंडादिरित्युक्तं। आध्यक्ष इति। अवक्षेपणे कन्निति विहितात्। आप्कुन इति। पादशातनेति विहितात्। आमाद्य इति। किमेधिडः
वयघादामित्यादयः। वृत्तीनात्यंताशनि। हृदतीयदेन दृष्टस्यास्माच्छादन इति विहितः। कत्तुपलक्ष्यते। ज्ञात्यंलशब्देन ज्ञात्यंताच्छः

तिविहितः। बहुवचननिर्देशात्पाशाबादीनां ग्रहणं। योहि वैयाकरणपाशादिशब्दे रर्थः प्रतीयते नासौ प्रकृतिमात्रेण। अतसोपि तम
बादिवन्नित्याएवेति स्थितमाकरे। सूत्रे तु वाचकप्रयोगेस्तु आर्षगं पान्तुवादस्तान्तदोषाय। विभाषाचेः। दिक्षासो स्त्री चेतिक
र्मधारयः। प्राचीनाब्राह्मणीति। क्रियानिमित्तो देशकालनिमित्तो वा अयं शब्दः। प्राचीनमिति। प्राच्यां दिशि इत्यर्थे। दिक्शब्दे
भ्यष्ठत्यस्तातिः। अंचेर्लुगिति लुक्। कुत्साद्धितलुकीति ङीपो लुक्। तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात्स्त्रीत्वाभावः। खे
लु कृते स्वभावान्नपुंसकत्वं। ब्राह्मणजातीय इति। मतुल्लपुरुषः। भावप्रधानेन सह कर्मणो धारयो वा आलेरिति। अयं
भावः। बंधशब्दाद्विविधः। सह योगिकस्य। तत्राद्योह्यालिषु रूढः। प्रसिद्धश्च। आम्पर्यायः। पुल्लिंगएव सनेहणाद्यलेवं
चुनातिनपुंसकनिर्देशात्। किंतु प्रकृतिक्रियाशब्दोयं बध्यंते शौनैर्यास्मिन्नाति रितिविग्रहकाले। महत्त्वं हीत्यादिना भ
धिकरणेउप्रत्ययः। पितृस्थानीय इति। स्थानं संबंधविशेषः। पदमिति यस्य प्रसिद्धिः। पितुरिव स्थानमस्येति बहुव्रीहिः।
गास्थानमिति। स्थानं देशः। इतिकरणो विवक्षार्थः। तेन तुल्यस्थानशब्देन। अनुगादिनः। अस्मादेव निपातनात्सि
त्रिरिति उत्तरसूत्रे च हरदत्तः। वस्तुतस्तु सस्यपाठात्वितिसूत्रेणैव। त्रपीति रितितत्रैव वक्ष्यामः। संख्यायाः।
अभ्यावृत्तिशब्देन द्विलीयादिप्रत्ययग्रहणं प्रकृतत्वः प्रवृत्तोपं चकृत्व इति स्यात्। अतो विवक्षितमर्थमाह। अभ्या
वृत्तिर्जन्मेति। भूरिवारानिति। भूरिशब्दस्य लोकेवसंख्यावाचित्वेपि नेह ग्रहणं। बहुगणेति सूत्रे बहुग्रहणस्य
नियमार्थत्वात्। अनियतसंख्यावाचिनां चेद्भवति तर्हि बहोरेवेति नियमशरीरं। कृपेविभाषा भावेपि वस्तुग
तिमनुरुध्याह। संयोगांतस्येति। प्राचोगं पंतेरस्येति। नत्विति। यदि सोसकारे उच्चारणार्थस्तर्हि निरनुबंधकत्वा
स एवमाश्रयेन तु सुच्। यदि तु उकार इत्संज्ञस्तथापि सुजग्रहणे तु लेनः। सुचः उकारस्योच्चारणार्थत्वात्। अपायम
पीत्संज्ञक इति दुराग्रहः। तथापि तदनुबंधकग्रहणे नातदनुबंधकस्य ग्रहणमिति परिभाषयादोषएव। किंचास्तु
तिसीतिसाहचर्यात्। द्विरनक्त्यएवमत्वगयं लेन तदाह सिच इवेति। बहुधा दिवसस्य भुंक्त इति। कृत्वार्थप्रयोगे काले

शिवः
५९

धिकरतो इति षष्ठीविग्रहस्तु। एतच्च प्रागादिकं शेषाधिकारबलेनापकृष्य आः समासघटितफलकलयातिष्ठंते नोदाहरणं

मिति प्रागुक्तनिष्कर्षविरोधात्। तत्र कृतवचनेमयट् प्राचुर्येणेति। यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः। तथापी हनंग्य

हणाद यं विशेषोलभ्यते तद्वियादृशस्य प्रकृतस्य लोके मयट् वचनं तत्तयप्रशस्यादिष्वेवमर्थः। आद्य इति। प्रथमातात्प्रकृ

तवाच्यप्रत्ययः स्वार्थिकत्वात् प्रकृतिलिंगं। अस्मिन्पक्षे तत्र दृतांव्यर्थः। द्वितीय इति। अस्मिन्पक्षे उच्यमानताप्रक

तताच प्रकृत्यर्थविशेषणत्वमुत्तेतकमधिकरणत्वं कुम्पयद्वर्थः। अत एवाधिशेषानिघ्नता। तदाह। अन्नमयोयज्ञ इति। प्र

त्वं प्रकृतमुच्यते अस्मिन्निति त्वर्थः। यत्तु प्राचोक्तं। तादिति प्रथमासमर्थात् प्राचुर्ये ~~स्वार्थे मयट्~~ स्वार्थे प्रस्तुतमत्रेत्यर्थे मय

यट् स्यादिति। यच्च व्याचख्युः प्राचुर्येण। यदि प्रत्ययार्थविशेषणमिति तत्र वेदं व कव्यं। प्रकृत्यर्थत्यागात् न्यूनता अधिक

रणस्य क्रियासापेक्षत्वेन तदध्याहारे गौरवं चेति मूले दोषः। टीकायां तु प्रकृत्यर्थेति वक्तव्ये प्रत्ययार्थे इत्युक्तिः रभस

कृता आकरविरुद्धा चेत्यास्तां तावत्। निपातसमुदाय इति उपदेशपारंपर्येवर्त्तते। वचनाद्वा प्रातिपदिकादपि प्रत्ययः

भेषजमिति। भिषज्यतः कंड्वादियगंतात्क्विप्। भिषक्। भिषजामिदं भेषजं। अस्मादेव निपातनादिकारः। पितृदेवत्य

मिति। पितरएव देवता इति कर्मधारयः। ततोयत्। अर्घ्यमिति। मूल्ये पूजाविधावर्घ इत्यमरः। आग्नीध्रमिति। अग्नीधः

शरणे रणं चेति भं तोदात्तं शेषिकेषु व्युत्पादितं तस्मादत्र्। आग्नीध्रशालं फलं। फलांगरनाम स्त्रियामिति। समानं

धाणमस्याः साधारणी। अनेकं प्रत्यविशिष्ट संबंधाः। एषा दरादिवात्समानस्य समावः। ततोत्र् ङीप्। अजन्तावेष्टाप्। व

णाच नित्यं। अनित्यत्वमिह स्वसमानाधिकरणध्वंसप्रतियोगित्वं। अत एव रक्ते इत्युत्तरसूत्रं स्वार्थकं। लाक्षादिना

रक्ते लोहित्येस्यावदाश्रयमव स्थाने नानित्यत्वयापूर्वेणासिद्धः। लिंगबाधनं वेति। प्रातिपदिकात्तद्धिता इति पक्षेप्र

तिपदविधानमात्रेणापवादत्वमिति पक्षं वाश्रित्येदं वार्त्तिकं अत्र चैवेत्यवविधेयंशे बानुवादः। प्रतिपदविहितेन

कनालिंगनि। धमित्तप्रत्ययस्यानित्यं बाधः प्राप्तः सवावक्तव्यः। इत्यर्थः। न च शाश्वमहणसामर्थ्यादिष्टसिद्धिः। एतश्येत

श्वार्थ्यामत्यं त स्वार्थिके। कनि प्राप्ते तद्बाधनेन चरितार्थत्वात्। वस्तुतस्तु सूत्रं वं तान्न द्विनो। निरवकाशत्वेनेवाप

वादत्वं तथा चेदं वार्त्तिकं न कर्तव्यं। अत एव भाष्यकृता अर्थमिति स्वंपीत्येवरूपं प्रबलमित्यवोचाम। उपायेति। उपा

वच२

यथा वृषकंबलम तेऽस्य सत्वे चेत्यर्थः। अकस्मादि। नीरूपत्वेन तद्यांतं न तु नामं तेन नकादेशेन। अव्ययत्वाद्विलोपः। आकस्मिकं। वा
चिकमिति। अति वर्त्तंते पि स्वार्थिकाः क्वचिल्लिङ्गमिति नपुंसकत्वात्तद्धितकत्वे। प्रत्ययस्यादित्वे वासि ह्रस्वकारोच्चारणं प्र
क्रियाल्लाघवार्थं। टापो लुक्यपि प्रवणार्थं च। पंचभिर्भुक्ति कामः क्रीतः पंचमतिकः घटः। सप्तकेः। इत्यप्रशंसायां रूपपु इ
त्यस्यानंतरं वक्तव्ये छायांति त्वतल्लिलो छंदसीति हस्तो तिकं स्येति वक्तुमुचितं तथा तु न कृतमित्येव। बहुल्या
र्थत्रि। कारकात्कि। बहूनां स्वामी। अर्थग्रहणात्पर्यायेभ्यो विशेषेभ्यश्चेति भोर शोददाति। त्रिंशः मंगलेति। आधिक्ये वे
तव्या अन्यत्रापि दृश्यते। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः इति। कारकत्वं तु समसनक्रियां प्रति पंचम्याः कर्मणा
त। तदभिधायित्वाच्चाल्पशः ह्रस्व। तथा चव्याचष्टे। अल्पापंचमी समस्यत इति। परिमाणशब्दादिति। तथाच एवं
चनग्रहणेन हृत्वा वे कार्थनानियताः परिमाणशब्दा एवं वृत्ते इतिभावः। भलुशब्दपुदाहरति। घटं घटमिति। घट
दयो हि जातिशब्दा नैकार्था भवंति। जातियोगस्यानेकसाधारणत्वात् किं त्वमेदे कत्वसंख्यामुपाददते। ए
तत्सर्वं जयादित्यमतेनोक्तं। वामनस्तु मन्यते जातिशब्देभ्योपि भवत्येवेति। तथा च जनशः सौरि तिस्र त्रेजसास्त
रितस्य शसोग्रहणादिहन भवति। कुडशो ददाति वनशः प्रविशन्ति। अथ कथमेते केकशः संयुक्तानीति। द्विवच
नशासोः सहप्रयोगइति चेत्तत्रैव केचिदेव दृष्टयः कुर्वंतीति हरदत्तः। अत एवकुप्रइतिसूत्रे एकैकश इति प्राचो
ग्रंथः प्रामादिक इत्यवोचाम। इत्योरिति। कथं तर्हि अजातानामनंत्यानां जातिमात्रोपजीविनां सहस्रशः समेतानां
परिचत्वं न विघटत इति। न ह्यत्र वीप्सास्ति नापि कारकत्वमिति चेदत्राहुः सहस्रंसहस्रं ये संमताः तेषामपि पारि
षत्वं ने त्यर्थः। तथाच सत्तवाघक्रियां प्रति कर्त्तृत्वं वीप्सा चास्त्येवेति एकश एकवचनादि संज्ञा भिस्युरिति व्याख्या
तं। एकशब्दार्थस्यास्ति क्रियां प्रति कर्तृत्वात्तत्कृत्मलः प्रतीति प्रतिनिधिप्रतिदानेच यस्मादिति पंचमी। आद्या
दिभ्य इति। तस्यादित उदात्तमर्द्धह्रस्वमित्यत्र यदवलिंगं। वक्तव्यमिति। वृत्तिकारस्तु अनुलनज्ञाबेइति सूत्रम
प्यधिकृत। अकर्मतः। चिद्मेति। पूर्वेणासिद्धस्य चेरनुवादोयं। लोपस्यनत्वं नियोगशिष्टत्वार्थं। विभाषासातौ। अ

विकल्प्यते

भाष्यते इति विभाषा। गुरोश्च हल इत्यकारप्रकारः। अलक्षणम्। न त्विदमवयं। द्यावापृथिव्योर्मध्ये पयस्तु विभाषयेत्याद्ये
विभक्ते ईश्वरात्। ङो विवक्षितेति। परस्परमन्योन्यस्याश्रयः स्यात्। ङाचिकते द्वित्वे सति ह्रस्व एव राईमा तस्याश्चेस्
त्यांङाङिति भावः। स्वरस्वरस्ताकरोतीति। स्वरट् द्वित्वे सति स्य द्वित्वादिपूर्ववत्। अन्ते वराडो दिसु चेतनस्याद
नस्यस्याईश्च च किंतु अच्। यत्नु प्राचैकं टिलोपे कृते सति सवर्णदीर्घ धयत्व धर्मस्येति तन्न। सत्वं तस्य भिन्नं लवाद
स्वरट् स्वरटाकरोतीत्याद्यावयात्मेस्व। यदपि व्याचख्युः। परस्यापकर्षं क्रियमाणोऽयमचो वश्यंभाव्य पकर्षी विवक्षि
तस्त्वीहटिलोपे सति सिद्धि। तदप्युक्तदोषादाकर विरोधान्नोपेक्ष्यं नीजेन सहेति। इजिविषये बीजशब्दो बीजावापस
हितवर्त्तते। समयाच्च। कालं यापयतीत्यर्थ इति। हरदत्तस्त्वाह। समयो नित्यः। अध्यकर्त्तव्यत्वेन निवर्त्तितमर्थं विघटयितुं अव
भपारवश्यंभ्वोऽस्यसमय इत्येवं योऽव कृष्णदिवसेषु आरम्भ एवमुच्यते इति। सपत्रनिष्पत्रात्। पतत्यनेनेति पत्रं। शराणां पुंखगतावे
ह:। सपत्रं निष्पत्रं वा करोति मूललाभिति। पत्राणि पर्णानि। मूलोत्पाके। पाकं विं। कूलं करोति कदन्नं। शूलमुदररोगः। सत्याद
शपथे। भांड रक्तादि द्रव्यजातं। कृतव्येमिति। मये तज्जायमिति बुध्यापरीक्षादिनासत्यंकार द्रव्यप्रधानेच घटं करोतीत्यर्थः।
तथैव तथ्यापादार्घाभ्यां चेति चकारस्यानुक्तसमुच्चयार्थत्वात्तद्वार्थं यत्। परिवापणमिति। कर्मव्यापारवाचिनावपेर्हेतुम
ति चिल्लुट्। मंगल्यमुंडनेनेति। चौलदीक्षादौ। मद्राच्चेति। मद्रादित्यर्थग्रहणं तु नोक्तं। मंगल्यादिष्यापि प्रसंगात्। ॥इति
तद्धितप्रक्रिया॥ ॥ सर्वस्य द्वे। नित्यवीप्सयारित्यवमादीनां विधेयकार्यिणोरनिर्देशेन साकांक्षत्वात्तदुपरितत्वाद्वेत्यधि
कारोऽयं। तदाह। इत्यधिकृत्येति। एतदर्थरूपमधिकृत्येत्यर्थः। स्वरूपग्रहणं तु न भवति। नाम्रेडितस्यांत्यस्य तु वेति लिं
गात्। सर्वशब्दोवयवकार्त्स्न्ये। सर्वावयवोपेतस्य द्वित्वं न तु कस्यचिदवयवस्य वा वर्ज्जनमित्यर्थः। इह द्वे इत्यस्य संख्यापेक्ष
यां शब्दरूपग्रहणे तेशब्दानुशासनप्रस्तावात्सर्वस्येति स्थाने षष्ठी। सोऽयं स्थाने द्विर्वचनपक्षः। यदि तूच्चारणमेव संख्या
यं तदास्यान्यादेशभावो नास्ति। निरवृत्तिधर्मा हि स्थानी। सर्वं चेन्निवृत्तं किमुच्चार्यते अतः सर्वस्येति स्थाने षष्ठी। अध्याहर्त

म.र.त.

२०६

206

चारणाश्लेषस्या कर्तृकर्मलोः कृती तिकर्मणि षष्ठी। सर्वं द्विरुच्चार्यते इति फलितोऽर्थः। सोयं द्विः प्रयोगो द्विर्वचनमिति पक्षः। न
न्वाद्यपक्षे स्थानिवद्भावेन समुदायस्यैव पदत्वं स्यान्नावयवयोः। न तत्र पदकार्याणि न स्युः। तद्यथा। अपचन्नपचन्नि।
वृक्षान्वृक्षान्सानि तिपंतस्य णत्वनिषेधः। अग्नेऽग्ने एङः पदांतादिति पूर्वरूपत्वमित्यादि। किं च। अपदांतत्वप्रयुक्ता
नि कार्याणि स्युः। तद्यथा। अग्नीनाग्नीन भक्तोगुणो इति पररूपं स्यादिति चेन्न। अत्राहुः। यदि प्रत्यस्तमितावयवभेदः समुदा
य एक एव आदेशः स्यात्। द्वे इति द्विवचनमनुपपन्नं स्यात्। अतो द्वे इति वचनमनुपपन्नं स्यात्। अतो द्वे इति वचनादेकस्य प
दस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते तत्र स्थानिवद्भावेन समुदायस्य पदत्वे। स्वत एव चावयवयोरपि नि
न कश्चिद्दोषः। द्विःप्रयोगपक्षे तु प्रत्येकं पदसंज्ञा स्पष्टैव। समुदायस्य त्विथं। पचसि पचसीत्यादौ स एव धातुः प्रत्ययश्च द्विः
पद्यते ततः यस्मात्प्रत्ययो विहितः तदादि तदंतमिति विधीयमाना पदसंज्ञा समुदायस्यापि प्रवर्त्तते तेन नावग्रहादि सिध्यति। य
द्यपीह समुदायस्यैव पदत्वं नावयवानामिति भाष्यस्वरसः तथापि भंक्त्वानेयं। अवयवे पदकार्याणि आगुक्तानांनि वा स्युः
डस्मत्रैव्यं धिस्वरः। सर्वस्येति किं। स्वादिष्विति पदसंज्ञामादाय पृथक्त्वाभ्यामित्यादेशप्रकृतिभागमादायैव स्यमासमूह। नित्यवीप्स
योः। द्यात्येइति। नपुंसकमनपुंसकेऽन्येकशेषः एकवद्भावश्च बाध्यः। पदस्येति। वक्ष्यमाणान्निलोपकृत्यमिति भावः। तेन
नित्यतायां विधीयमानं द्विर्वचनं धातुमात्रस्य न भवति। किंच पदस्याभ्यामानत द्विर्वचनं बहिरंगं धातोर्यङं न बाधते। अन
था हि भृशार्थे सावकाशोयं पौनःपुन्ये परेण द्विर्वचनेन बाध्येत। यत्तु वदंति। परिनिष्ठितसाधनक्रियाव्यवहारोपयो
गिनी तद्दर्नाभिधानाद्धातुमात्रस्य द्वित्वं नेति तन्न। द्विर्यंवनकरोत्यानानाकारकविशिष्टक्रियासमर्पकस्य वाक्यस्यैव द्विर्वा
नेः। किंच। भावार्थकलकारस्यैतानां भयात कृतांचत्व कृत्करीत्याद्वित्वं न स्यात्। ननु तत्र नित्यतावगत्यनंतरं पदांत
रेः साधनाकांक्षापरिपूर्यत इति चेन्न तर्हि तत्रैव धातुमात्रस्याद्वित्वं केन वार्यतां। किंच। तद्देव कर्तृकर्मलकारस्य लोपि
धातुमात्रं कुर्वीरन्नित्यास्तांतावत्। नन्वेवं पदाधिकारस्यापकर्षे सगतिकस्य द्विर्वचनं न स्यादिति चेन्न। वार्त्तिककार
वचनादेव तत्सिद्धेस्तथापि द्योबेवगतिः। यत्तु वदंति। प्रपचति प्रपचतीत्यादौ धातूपसर्गयोः समुदायः क्रियाविशेष

ला

शिवः

५१

वाची। अग्न्यादिष्वव्ययस्यार्थे परं धातूपसर्गयोः पृथक्कृत्यनं तलस्य क्रिया धर्मो नित्यता समुदायस्येति न स्येव द्विर्वचनं प्र
त्यादि। अत्रेदं वक्तव्यं। कल्पितेनैव पृथक्कृत्य केन यथा गुरागमः प्राप्तं द्वित्वं चव्यावस्थितं तिष्ठते। एवमाग्रमिक द्वित्वस्यापि
धवृत्तिं को वारयेत्। क्रियाधर्मो नित्यत्वमित्यपि यत्तु उपन्यासः। लकारार्थयोः कर्तृकर्मणोरपि क्रियानिरूपणतया
विशिष्याद्दुर्बलकारापत्तेः। तस्य धातुत्वं नास्तीति चेत्तर्हि न स्पुरेवलादयः। तद्धितानां निरूपसर्गचरितार्थत्वात्
इदं त्ववधेयं सगतिकस्याद्वित्वे एकपद्यं नास्त्येव स्यात्। नितः पदत्वाभावेन आदेशोपि तस्य क्षेत्र्भ्याप्तेः। तद्धिः प्रयोगु
पक्षे तु प्रथमगतिं विहाय यावच्छिष्टस्य समुदायस्य पदत्वं प्राप्तं तस्मिन्नस्त्यपि न स्याति। वस्तुतस्त्विरुद्धिः प्रयोगप
दुर्बलः। पौनःपुन्यं पौनःपुनिक इति समुदायाद्व्यञ्जनोरनुत्पत्तिप्रसंगात्। न चाहि अन्तरंगत्वादव्ययात्त्यपो लु
कि द्वित्वं प्रवर्तते। किं च नत्रैकपद्याभावे पुनः पुनरयिमाना पुराणी त्यादावव्ययत्वेपि न सिध्येद्वित्व वत्र विस्तरः। आभी
क्ष्ण्यमिति। तद्धि क्रियाविशेषणं तेन न तद्योतनार्थं द्वित्वं क्रियाप्रधानानामेवन्यायं क्रियाप्रधान्यं चाख्याते स्ति। कृद्विशे
षेच। अव्ययकृतो भावइति वक्ष्यमाणत्वादिति भावः। वीप्सायामिति। व्याप्तुमिच्छा वीप्सा। व्याप्तिप्रतिपादयिषेति
यावत्। सा च प्रयोक्तृधर्मः। आबाधवत्। गतगत इत्युक्ते प्रियस्य विरहगमनादिना पीडितो वाक्यं प्रयुंक्ते इति यथा
प्रतीयते। तथा वृक्षं वृक्षं सिंचतीत्याद्यपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात्। शब्दबोध्य विषयस्तु व्या
प्तिरेव सा च कात्स्न्र्यं। तच्चाधिकारिकं। सर्वे ब्राह्मणा आनं त्रिणा इत्यादौ यथा। नहि साक्षात्सर्वादिप्रयोगेपि असंकु
चदृष्टतिमानियंतुं शक्यात्पदमहिम्ना संकोचकस्यावश्यकत्वात्। यत्र तु संकोचकं नास्ति तत्रासंकोच इष्ट एव
ब। ज्ञातो ज्ञातो निधनमुपैतीति वत्। न च वंद्वसंदृष्टमित्यादौ बहुवचनप्रसंगः। बहूनामाने पि बहुत्वसंख्याया स्त
त्राभावात्। प्रत्येकं तिक्ष्णे कर्त्वं हि तत्र भासते। अत एव प्रत्येकं विधेयसंबंधो लभ्यते। तथा हि। ग्रामे ब्राह्मणाय ब्राह्म
णाय शतं देयमित्युक्ते नियमेन प्रत्येकं शतं दीयते। ब्राह्मणाय शतं देयमित्युक्ते प्रत्येकं शतं दीयते। एकशेषे तु ब्राह्मणेभ्यः श
तं देयमित्युक्ते। नियमेन प्रत्येकं शतं देयमित्यर्थलाभात्। अत एवैकशेषे एकवचनं न। यदा तु परिसिद्धो तद्वित्व

म॰र॰त॰
२०७
207

नांवीप्सातस्याश्रासणाभ्यां। श्रातंदेयमितिभवत्येव। एवं त्रिभ्यः त्रिभ्यइत्याद्यप्यूह्यं। तदयं निर्गलितोऽर्थः। द्विर्वचने एकशे
षयोरनेकप्रतीतिर्नियता। किंत्वाद्ये एकत्वं द्वित्वं वा व्यवस्थितमेव प्रतीयते पदार्थकात्स्न्यं च। द्वितीये तु द्वि
त्वबहुत्वे एव प्रतीयेते न तु कार्त्स्न्यं स्यादेतत्। परिगृहीतैकत्वानामपि बहुत्वमभिधातुं द्विर्वचनादुत्तरं का
ले बहुवचनोत्पत्तिरस्तु। तथाहि। एकशेषे यथान्येषामर्थः शिष्टेन गम्यते तद्वदत्राद्विशेषे पि शिष्टार्थधीः। यत्तु
वदंति। अप्रातिपदिकत्वान्नम विभक्तिरिति तन्नेदं व्यापकं। सर्विभक्तिषु चेत्यादावुक्तदोषानिस्तारादि
ति चेदत्रोच्यते। अंतरंगत्वसंख्यावरुद्धोद्दिरूक्तार्थः। संख्यांतरेऽनिराकांक्ष एव। नहि वस्तुगत्या बहुत्व
मस्तीत्येतावतैव तस्य शाब्दबोधमापादयितुं शक्यते। असत्वार्थकेष्वपि तदापत्तेः। अयोग्यं तदिति चेत्समं प्रकृ
तेऽपि। अत्र लिंगं एकैकस्य प्राचाम्निति निर्देश इति दिक्। परेर्वर्जने। अन्यत्र वा निर्कां। परेरससमासे। नेह। परि त्रिगर्त्तं वृष्टो
देवः। वेति वक्तव्यं। तथा च कारके यथा हतं मे परुषैः परिहरेः संसार इति। उपर्यध्यधसः। कथं तर्हि उपरि शिरसो घटं
धायतीति। अत्राहुः। औत्तराधर्य्यमात्रमिह विवक्षितं न तु सामीप्यं। अतो वस्तुतस्तत्सत्त्वेपि न द्वित्वं। विवक्षा हि शब्दवृ
त्तेः प्रधानं कारणं। अत्र च उपर्युपरि क्रमेन दाद्या चिरवा सायामिति सन्नंत प्रयोगो ज्ञापक इति। वाक्यादेः। सुंदर सुंदरे
त्यादि। स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु आम्रेडितं भर्त्सने इति सूत्राभ्यां यथाययं प्राप्तः। प्लुतः वैकल्पिकत्वान्नेह
कृतः। उक्तं हि प्राक्। सर्वः प्लुतो वैकल्पिक इति। एकं बहुव्रीहिवत्। वेत्यनुवर्त्तते तच्चानुवाद्यसमर्प्पकं तदा हद्विरुक्त इति। तेन
ति। यद्यप्यत्र बहुव्रीहेर्विशिष्यन विहितो न चापि तत्र सुप्राविलयस्तावले वा तिदिश्यते इति भावः। सुब्लुकायात्स्तुबिति। तच्चैकवच
नमेव यथा चैतत्तथा प्रागेवोक्तं। पूर्वभाग इति। न तूत्तरभाग पि। तथा हि द्विधात्र पुंवद्भावः सर्वनाम्नो वृत्तिमात्रे इति वा स्त्रि
याः पुंवदिति वा तत्राद्यः पूर्वभागस्यैव। भस्त्रैषेति ज्ञापकात् इदित्युक्तं। द्वितीयस्तु समानाधिकरणोत्तरत्वे विधीयते। न
चोत्तरभागस्य तदस्तीति भावः। एतेनेरुक्त्वे इत्यस्मान्नलुक्त्वो एकेत्यत्र पुंवद्भावापादनं रुरदत्तादिभिः कृतं प्रत्युक्तं।

शिव॰
५२

एकैकपत्यत्र पूर्वभागे शपो निवृत्तिरिति स्वग्रंथविरोधाच्च। ई इत्यस्यानुवृत्तिस्तु स्पष्टार्था। उत्तरसूत्रार्था चेत्यन्ये। ननु। आबा
धे च। ८।१।१०। बहुव्रीहिवद्भावादित्यनुवर्त्तते। तथा च स्त्रियाः पुंवदिति प्रवर्त्तते। न चेदमुत्तरपदं नेति वाच्यं। अतिदेशब
लेनैव उत्तरपदत्वस्यापि लाभात्। स्यादेतत्। अनेनात्र न लोपो नञ इत्यपि नहि स्यादिति वाच्यं। अतिदेशबलेनैव उत्तरप
दत्वस्यापि लाभात्। चेत्। मैवं। तत्र हि उत्तरपदाधिकारात् विशेषेपि नञः साक्षाच्छ्रूयमाणकार्यित्वेन निमित्तभावो बोध्य
ते। तथा च मक्षुदोमक्षुदित्यत्र अचो रहाभ्यामिति रेफस्य द्वित्वप्रसंगे आकरे उदाहृतत्वात्। उक्तं। ने मोरस्यैकाषि
णो किं तु निमित्तं द्विर्वचनस्येति। नन्वेवमपि धूः। धुः। पंथाः पंथा इत्यादौ इस समासांतः स्यादिति चेन्न। समासाच्च तद्विषयादि
तीत्यतः समासादित्यनुवर्त्तमाने पुनः समासग्रहणं हि समासाधिकारविहितो यः समासः तत्परिग्रहार्थं। तेनानातिदे
शिके समासे। तानाम प्रवृत्तेरिति दिक्। प्रकारे गुणवचनस्य। यद्यपि भेदोपि प्रकार इत्युच्यते बहुभिः प्रकारैर्भुक्ते इति
कुत्रिर्दिबसे रिस्विवगमात्त तथापीह विवक्षितार्थमाह। सादृश्ये इति। अत्र व्याख्यानमेव शरणं। अस्ति च सादृश्ये प्रकार
शब्दः। ब्राह्मणप्रकारोयं माणवकः। ब्राह्मणसदृश इत्यर्थः। पुंवद्भाव इति। पुंवत्कर्मधारयेत्यादिसूत्रात्। तच्च कोपधादिप्र
तिषेधवर्त्तनेनैव बहुव्रीहिवद्भावे प्रकृते कर्मधारयोत्त्थैर्वर्थेति बोध्यं। पटुपटु इति। इह द्वित्वेन जातीयरो वा घोने ध्य
ते इति वामनः। अन्यथा ब्राह्मणजातीय इत्यादावगुणवचनेन गुणवचनेपि भेदरूपेर्थे सावकाशो जातीयर्। गुणवचने
षु सादृश्ये परेण द्वित्वेन बाध्येतेति भावः। जयादित्यस्तु जातीयर् विधौ विशेषण एव प्रकारशब्दार्थ इत्याह। गुणवचन
स्येति किं। सिंहो माणवकः। अग्निर्माणवकः। यद्यपीह अग्निसिंहशब्दाभ्यां जघन्यवृत्त्या गुणो गम्यते तथापि गुणवचन
ग्रहणसामर्थ्यान्मुख्यवृत्त्या गुणपराणामेव द्वित्वं न त्वन्येषामिति आकरः। न वं न वंद्यीतिरहोकरोतीत्यत्र वीप्सायां द्वित्वं। अ
नेन तु द्वित्वे सुब्लुक् स्यात्। यथा नवनवा वनवाप्युभिरादद् इति पुंवद्भावः। कथं भीनभीत इव शीतमयूखः इति भार
विः। इवशब्देन सादृश्यस्योक्तत्वात् इह प्रकारे द्वित्वायोगात्। सत्यं। भीनेभ्यो भीन इति कथंचिद्व्याख्येयं तेनातिभीत इ
ति फलितं। यत्तु आधिक्ये द्वे इति वार्त्तिकेन भीतभीतादौ द्वित्वमिति तिदुर्घटादिनिरुक्तं नदतिरभसोक्तिमात्रं। अथक

थं स्विन्नः स्विन्नः शिखरिषु पदं न्यस्य गंतासि यत्र स्रोतः क्षीणः परिलघु पयः स्रोतसां चोपयुज्येति मेघदूतः। एकस्यापि
रेवदावस्थासु क्षयावस्थासु भेदः परिकल्प्य वीप्सा बोध्या। अथ कथं मंदं मंदं नुदति। अयं यो रवं मंदं नुदति पवनश्चानुकू
लो यथा त्वामिति मेघदूतः। मंदं मंदं नुदति रवं इति वस्तुकृपाप्तेः वीप्सार्थस्य चासंभवादिति चेत्सत्यं। स्वल्पमंदगति
मंत्वा पवनो मंदं नुदतीति यथा कथंचिद्व्याख्येयं सिद्धस्य गतेश्चिंतनीयत्वात्। आनुपूर्व्येण लिवीप्साभावादारंभः।
न्यायसिद्ध इति। यावद्भिः शब्दैः संबोध्योऽर्थस्तावद्गच्छतीति तावतां प्रयोक्तव्यत्वादिति भावः। कर्मव्यतिहार इति। क्रिया
विनिमय इत्यर्थः। द्वे इति। नित्यमेवेदं द्वित्वं। बाहुलकं तु समासवद्भावस्यैव। सुपः सुर्वक्तव्य इति। अत्र केचित्। द्वि
तीयादीनामेवेदं स्वादेशविधानं। अत एवोत्तरदले पि द्वितीयाद्यय एव न तु प्रथमा। तत्रापि वचनांतरं मैव एतेन
दुर्गपरिशिष्टकंठाभरणादिष्वर्वाचीन ... ग्रंथेषु स्पष्टं लदे तदुक्तं प्राचा द्वितीयैकवचनांतत्वं परपदस्येति
एतच्च सर्वमपाणिनीयं भाष्यादावनुक्तत्वात्। लदेतद्धु नयन्वचनांतरमुदाहरति। अन्योन्याविति। त्यादि। माघ
इति। स च भाष्यानुगुण एवेति भावः। तत्पाचार्वाचीनमतं कवयापि नानुरुध्यं नेइत्युक्तं। तथा च भारविः। स्तिमित
नभःस्थुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैरिति प्रायुंक्त। तत्र हि अदृष्टः परस्परो यैस्त इति विग्रहो य
थातथास्यष्टवेति दिक्। तृतीयादिषु पुंवदिति प्राचोग्रंथं परिष्कुर्वन्नाह। अत्र केचिदिति। वस्तुस्थितिमाह
अन्ये त्विति। अतिप्रसंगादिति। तथा च एकशेषाधिकरण इति प्रतिबंधाद्द्विवचनस्यापि वृत्तित्वमाश्रित्य तद्धले
नपुंवद्भावोऽनशंकाः। लक्ष्यविरोधात्। कारकं। च हितानीयाद्यां यां पमन्येन सामनवदित्यकवथितस्तत्र माघ
विरोधाच्चेति भावः। यत्तु प्राचो ग्रंथं व्याचक्षाणेनोक्तं अन्योन्यमित्यादावन्याम न्यामिति द्विवचनेऽन्ते सर्वना
म्नो ... तेमाते पुंवद्भावशतिपूर्वोत्तरपदयोर्द्वयोरपि पुंवद्भावद्भाव इत्यादि तत्सर्वं रभसात्। एतच्च मूल
एव ध्वनितं यदपि तृतीयादिषु पुंवदिति प्राचोग्रंथं व्याचक्षाणेनोक्तं। तृतीयादिषु पुंवद्भावो विशेषः। तेन

टापूनः। अत्र तृतीयादिष्विति अविवक्षितं द्वितीयायामपि पुंवत्वस्येष्टत्वादिति तच्चिंत्यं। पुंवत्वविशेषइति वि
शेषाभिधानमविवक्षितमिति व्याख्याकेः परस्परव्याघातात् मूलकृता पुंवद्भावस्यास्पष्टत्वात्। तद्ग्रंथस्यां
तस्यैनैव व्याख्यातत्वाच्चेति दिक्॥ यथायथमिति। नलोके तिषष्ठी निषेधः। ज्ञालेल्यस्य लन्कंतत्वात्॥ सि
द्धांतकौमुदी व्याख्यायेयं प्रौढमनोरमा॥ समाप्तं तत्र पूर्वार्द्धं तेन तुष्यतु शंकरः॥१॥ ॥इति श्रीमद्दी
क्षित भट्टोजि विरचितायां सिद्धांतकौमुदी व्याख्यायां प्रौढमनोरमायां पूर्वार्द्धं समाप्तम्॥ ॥शुभं॥ ॥





मन्त्रोद्धारविधिसमाप्त

५५००